616

सभापर्वम् (महाभारते)

Sabha Parva from		Title
	Maha Bharata	Author
		Editor
		Year, Vols.
		Publisher
616		Remarks

Puranic lit Critical

श्रीमन्महागणपतयेनमः निर्विघ्नमस्तु नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींव्यासंततोजयमुदीरये
त् १ वैशंपायनउवाच ततोब्रवीन्मयःपार्थंवासुदेवस्यसंनिधौ प्रांजलिःश्लक्ष्णयावाचापूजयित्वापुनःपुनः अस्मा
च्चकृष्णात्संरब्धात्पावकाच्चदिधक्षतः त्वयात्रातोस्मिकौंतेयब्रूहिकिंकरवाणिते अर्जुनउवाच कृतमेवत्वयासर्वंस्व
स्तिगच्छमहासुर प्रीतिमान्भवमेनित्यंप्रीतिमंतोवयंचते मयउवाच युक्तमेतत्त्वयिविभोयथात्थपुरुषर्षभ प्रीतिपू
र्वमहंकिंचित्कर्तुमिच्छामिभारत अहंहिविश्वकर्मावैदानवानांमहाकविः सोहंवैत्वत्कृतेकर्तुंकिंचिदिच्छामिपांडव अ
र्जुनउवाच विमोचितंप्राणकृच्छ्रादात्मानंमन्यसेनघ एवंगतेनशक्ष्यामिकिंचित्कारयितुंत्वया नचापितवसंकल्पं
मोघमिच्छामिदानव कृष्णस्यक्रियतांकिंचित्तथाप्रतिकृतंमयि वैशंपा० चोदितोवासुदेवस्तुमयेनभरतर्षभ
मुहूर्तमिवसंदध्यौकिमयंचोद्यतामिति ततोविचिंत्यमनसालोकनाथःप्रजापतिः चोदयामासतंकृष्णःसभावैक्रि
यतामिति यदित्वंकर्तुकामोसिप्रियंशिल्पवतांवर धर्मराजस्यदैतेययादृशीमिहमन्यसे यांकृतांनानुकुर्युस्ते श्रीः
कुशलाःप्रेक्ष्यमानवाः मनुष्यलोकेकृत्स्नेस्मिंस्तादृशींकुरुवैसभां यत्रदिव्यानभिप्रायान्पश्यामविहितांस्त्व
या असुरान्मानुषांश्चैवतांसभांकुरुवैमय वैशंपा० प्रतिगृह्यतुतद्वाक्यंसंप्रहृष्टोमयस्तदा विमानप्रति
मांचक्रेपांडवस्यसभांतदा ततःकृष्णश्चपार्थश्चधर्मराजेयुधिष्ठिरे सर्वमेवतदाख्यायदर्शयामासतुर्मयं

किंकुम्नतोद्विरलिरुकहिवतारिंशादंगुलः ४

तस्मैयुधिष्ठिरःपूजांयथार्हमकरोत्तदा सतुतांप्रतिजग्राहमयःसत्कृत्यसत्कृतः सपूर्वदेवचरितंतदातत्रविशांपते क
थयामासदैतेयःपांडुपुत्रेषुभारत सकालंकंचिदाश्वस्यविश्वकर्माविचिंत्यच सभांप्रचक्रमेकर्तुंपांडवस्यमना
मां अभिप्रायेणपार्थानांकृष्णस्यचमहात्मनः पुण्येहनिमहातेजाःकृतकौतुकमंगलः तर्पयित्वाद्विजश्रेष्ठान्पाय
सेनससर्पिषा धनंबहुविधंदत्वातेभ्यएववीर्यवान् सर्वर्तुगुणसंपन्नांदिव्यरूपांमनोरमां दशकिष्कुसहस्रांतांमा
पयामाससर्वतः इतिमहाभारतेसभापर्वणिसभोपन्यासः १ वैशं० उषित्वाखांडवप्रस्थेसुखवासंजनार्द
नः पार्थैःप्रीतिसमायुक्तःपूजनार्होभिपूजितः गमनायमतिंचक्रेपितुर्दर्शनलालसः धर्मराजमथामंत्र्यपृथांचपृथुलो य
चनः ववंदेचरणौमूर्ध्नाजगद्वंद्यःपितृष्वसुः सतदामूर्ध्न्युपाघ्रायपरिष्वक्तश्चकेशवः ददर्शानंतरंकृष्णोभगिनींस्वांमहा
यशाः तामुपेत्यहृषीकेशःप्रीत्याबाष्पसमन्वितः पथ्यंतथ्यंहितंवाक्यंगुरुत्वल्पाक्षरंमृदु उवाचभगवान्भद्रांसुभद्रां
भद्रभाषिणीं तयास्वजनगामीनिश्रावितोवचनानिसः संपूजितश्चाप्यसकृच्छिरसाचाभिवादितः तामनुज्ञाप्यवार्ष्णेयः
प्रतिनंद्यचभामिनीं ददर्शानंतरंकृष्णोधौम्यंचापिजनार्दनः ववंदेचयथान्यायंधौम्यंसपुरुषोत्तमः द्रौपदींसांत्वयित्वा
चतथामंत्र्यजनार्दनः भ्रातॄनभ्यगमद्धीमान्पार्थेनसहितोबली भ्रातृभिःपंचभिःकृष्णोवृतःशक्रइवामरैः यात्रा
कालस्ययोग्यानिकर्माणिगरुडध्वजः कर्तुकामःशुचिर्भूत्वास्नातवान्समलंकृतः अर्चयामासदेवांश्चद्विजांश्चयदु

सभा० २

दुर्पुंगवः माल्यजाप्यनमस्कारैर्गंधैरुच्चावचैरपि स कृत्वा सर्वकार्याणि प्रतस्थे तस्थुषां वरः उपेत्य स यदुश्रेष्ठो बाह्यकक्षां
विनिर्गतः स्वस्ति वाच्यार्हतो विप्रान्दधिपात्रघृताक्षतैः वसु प्रदाय च ततः प्रदक्षिणमवर्तत कांचनं रथमास्थाय तार्क्ष्य
केतनमाशुगं गदाचक्रासिशार्ङ्गाद्यैरायुधैश्च वृतं शुभे तिथावथ नक्षत्रे मुहूर्ते च गुणान्विते प्रययौ पुंडरीका
क्षः शैब्यसुग्रीववाहनः अन्वारुरोह चाप्येनं प्रेम्णा राजा युधिष्ठिरः अपास्य चास्य यंतारं दारुकं यंतृसत्तमं अभीषू
न्संप्रजग्राह स्वयं कुरुपतिस्तदा उपारुह्यार्जुनश्चापि चामरव्यजनं सितं रुक्मदंडं बृहन्मूर्ध्नि दुधाव प्रदक्षिणं त
थैव भीमसेनोऽपि यमाभ्यां सहितो बली पृष्ठतोऽनुययौ कृष्णमृत्विक्पौरजनैः सह स तथा भ्रातृभिः सर्वैः केशवः परि
वीरहा अन्वीयमानः शुशुभे शिष्यैरिव गुरुः प्रियैः पार्थमामंत्र्य गोविंदः परिष्वज्य च पीडितं युधिष्ठिरं पूजयित्वा
भीमसेनं यमौ तथा परिष्वक्तो भृशं ताभ्यां यमाभ्यामभिवादितः योजनार्धमथो गत्वा कृष्णः परपुरंजयः युधिष्ठि
रं समामंत्र्य निवर्तस्वेति भारत ततोऽभिवाद्य गोविंदः पादौ जग्राह धर्मवित् उत्थाप्य धर्मराजस्तु मूर्ध्न्युपाघ्राय केश
वं पांडवो यादवश्रेष्ठं कृष्णं कमललोचनं गम्यतामित्यनुज्ञाप्य धर्मराजो युधिष्ठिरः ततस्तैः संविदं कृत्वा यथावन् श्रीः
मधुसूदनः निवर्त्य च तथा कृच्छ्रात्पांडवान्सपदानुगान् स्वां पुरीं प्रययौ हृष्टो यथा शक्रोऽमरावतीं लोचनैरनुजग्मु २
स्ते तमा दृष्टिपथात्तदा मनोभिरनुजग्मुस्तं कृष्णं प्रीतिसमन्वयात् अतृप्तमनसामेव तेषां केशवदर्शने क्षिप्र

मंतर्दधे शौरिश्चक्षुषां प्रियदर्शनः अकामा एव पार्थास्ते गोविंदगतमानसाः निवृत्योपययुः सर्वे स्वपुरं पुरुषर्षभाः स्यंदने
नाथ कृष्णोऽपि त्वरितं द्वारकामगात् सात्वतेन च वीरेण पृष्ठतो यायिना तदा दारुकेण च सूतेन सहितो देवकीसुतः स गतो
द्वारकां शौरिर्गरुत्मानिव वेगवान् वैशं० निवृत्य धर्मराजस्तु सह भ्रातृभिरच्युतात् सुहृत्परिवृतो राजा प्रविवेश
पुरोत्तमं विसृज्य सुहृदः सर्वान्भ्रातॄन्पुत्रांश्च धर्मराट् मुमोद पुरुषव्याघ्रो द्रौपद्या सहितो नृपः वैशं० केशवोऽपि
मुदा युक्तः प्रविवेश पुरोत्तमं पूज्यमानो यदुश्रेष्ठैरुग्रसेनमुखैस्तथा आहुकं पितरं वृद्धं मातरं च यशस्विनीं अभिवाद्य
बलं चैव स्थितः कमललोचनः प्रद्युम्नशांबनिशठांश्चारुदेष्णं गदं तथा अनिरुद्धं च भानुं च परिष्वज्य जनार्दनः स वृद्धैरभ्य
नुज्ञातो रुक्मिण्या भवनं ययौ मयोऽपि स महाभागः सर्वरत्नविभूषितां विधिवत्कल्पयामास सभां धर्मसुताय वै ॥छ॥
इति सभापर्वणि २ वैशं० अथाब्रवीन्मयः पार्थमर्जुनं जयतां वरं आपृच्छे त्वां गमिष्यामि क्षिप्रमेष्यामि चाप्यहं
उत्तरेण तु कैलासान्मैनाकं पर्वतं प्रति यियक्षमाणेषु पुरा दानवेषु मया कृतं चित्रं मणिमयं भांडं रम्यं बिंदुसरः प्रति सभायां सत्य
संधस्य यदासीद्वृषपर्वणः आगमिष्यामि तद्गृह्य यदि तिष्ठति भारत ततः सभां करिष्यामि पांडवस्य यशस्विनीं मनःप्रह्ला
दिनीं चित्रां सर्वरत्नविभूषितां अस्ति बिंदुसरस्युग्रा गदा च कुरुनंदन निहिता वृषपर्वेण राज्ञा हत्वा रणे रिपून् सुवर्णबिंदु
भिश्चित्रा गुर्वी भारसहा दृढा सा वै शतसहस्रस्य संमिता शत्रुघातिनी अनुरूपा च भीमस्य गांडीवं भवतो यथा वारुणश्च
महाशंखो देवदत्तः सुघोषवान् सर्वमेतत्प्रदास्यामि भवते नात्र संशयः इत्युक्त्वा सोऽसुरः पार्थं प्रागुदीचीं दिशं गतः अथो

सभा० ३

उत्तरेण तु कैलासं मैनाकं पर्वतं प्रति हिरण्यशृंगः सुमहान्महामणिमयो गिरिः रम्यं बिंदुसरो नाम यत्र राजा भगीरथः

दृष्ट्वा भागीरथीं गंगामुवास बहुलाः समाः यत्रेष्टं सर्वभूतानामीश्वरेण महात्मना आहृताः क्रतवो मुख्याः शतं भरतस

त्तम यत्र यूपा मणिमयाश्चैत्याश्चापि हिरण्मयाः शोभार्थं विहितास्तत्र न तु दृष्टांततः कृताः यत्रेष्ट्वा स गतः सिद्धिं स

हस्राक्षः शचीपतिः यत्र भूतपतिः सृष्ट्वा सर्वलोकान्सनातनः उपास्यते तिग्मतेजाः स्थितो भूतैः सहस्रशः नरना

रायणौ ब्रह्मा यमः स्थाणुश्च पंचमः उपासते तत्र यत्र सत्रं सहस्रयुगपर्यये यत्रेष्टं वासुदेवेन सत्रैर्वर्षपूगान्बहून्

श्रद्दधानेन सततं धर्मसंप्रतिपत्तये सुवर्णमालिनो यूपाश्चैत्याश्चाप्यतिभास्वराः ददौ यत्र सहस्राणि प्र

युतानि च केशवः तत्र गत्वा स जग्राह गदां शंखं च भारत स्फाटिकं च सभाद्रव्यं यदासीद्वृषपर्वणः किंकरैः सह र

क्षोभिर्यदरक्षन्महद्धनं तदगृह्णान्मयस्तत्र गत्वा सर्वं महासुरः तदाहृत्य तु तां चक्रे सोऽसुरोऽप्रतिमां सभां विश्रु

तां त्रिषु लोकेषु दिव्यां मणिमयीं शुभां गदां च भीमसेनाय प्रवरां प्रददौ तदा देवदत्तं चार्जुनाय शंखप्रवरमुत्तमं य

स्य शंखस्य नादेन भूतानि प्रचकंपिरे सभा च सा महाराज शातकुंभमयद्रुमा दश किष्कुसहस्राणि समंतादाय श्री: ३

ताभवत् यथा वह्नेर्यथार्कस्य सोमस्य च यथा सभा भ्राजमाना तथात्यर्थं दधार परमं वपुः अभिघ्नतीव प्रभया

प्रभामर्कस्य भासुरां प्रबभौ ज्वलमानेव दिव्या दिव्येन तेजसा नवमेघप्रतीकाशा दिवमावृत्य विष्ठिता आ

यता विपुला श्लक्ष्णा विचित्रमणिवेदिका उत्तमद्रव्यसंपन्ना रत्नप्राकारमालिनी बहुचित्रा बहुधना

विहिता विश्वकर्मणा न दाशार्ही सुधर्मा वा ब्रह्मणो वाथ तादृशी सभा रूपेण संपन्ना यां चक्रे मति

मान्मयः तां स्म तत्र मयेनोक्ता रक्षंति च वहंति च सभामष्टौ सहस्राणि किंकरा नाम राक्षसाः अंतरिक्ष

चरा घोरा महाकाया महाबलाः रक्ताक्षाः पिंगलाक्षाश्च शुक्तिकर्णाः प्रहारिणः तस्यां सभायां

नलिनीं चकाराप्रतिमां मयः वैडूर्यपत्रविततां मणिनालोज्ज्वलांबुजां हैमसौगंधिकवतीं नानाद्वि

जगणायुतां पुष्पितैः पंकजैश्चित्रां कूर्मैर्मत्स्यैश्च कांचनैः चित्रस्फटिकसोपानां निष्पंकसलिलां

शुभां मंदानिलसमुद्धूतां मुक्ताबिंदुभिराचितां महामणिशिलापट्टबद्धपर्यंतवेदिकां आविश्य

मानवाः केचिद्दृष्ट्वापि न विजानते तेऽज्ञानात्प्रपतंति स्म नरा विभ्रांतचेतसः तां सभामभितो नित्यं

पुष्पवंतो महाद्रुमाः आसन्नानाविधा नीलाः शीतच्छाया मनोरमाः काननानि सुगंधीनि पु

ष्करिण्यश्च सर्वशः हंसकारंडवोपेताश्चक्रवाकोपशोभिताः जलजानां च पद्मानां स्थलजा

नां च सर्वशः मारुतो गंधमादाय पांडवान्स्म निषेवते ईदृशीं तां सभां कृत्वा मासैः परिचतुर्द

यो० न्ये०

श्रीः निश्चितो धर्मराजाय मयो राज्ञां विदधत् इति सभापर्वणि ३ वैशंपायन उवाच ततः प्रवेशनं तस्यां चक्रे
सभा० राजन्युधिष्ठिरः ~~सोऽन्नपायसेन~~ अयुतं भोजयित्वा तु ब्राह्मणानां युधिष्ठिरः साज्येन पायसेनैव मधुना मिश्रितेन च
४ भक्ष्यैर्मूलैः फलैश्चैव मांसैर्वराहहारिणैः कृसरेणाथ जीर्तल्या विष्णुना च सर्वशः मांसप्रकारैर्विविधैः खाद्यैश्चापि तथा नृप
न्ये४ चोष्यैश्च विविधै राजन्पेयैश्च बहुविस्तरैः अहतैश्चैव वासोभिर्माल्यैरुच्चावचैरपि तर्पयामास विप्रेंद्रान्नानादिग्भ्यः स
मागतान् ददौ तेभ्यः सहस्राणि गवां प्रत्येकशः पुमान् पुण्याहघोषस्तत्रासीद्दिवस्पृगिव भारत वादित्रैर्विविधैर्गंधैरु
च्चावचैरपि पूजयित्वा कुरुश्रेष्ठो दैवतानि निवेश्य च तत्र मल्ला नटा झल्लाः सूता वैतालिकास्तथा उपतस्थुर्महात्मानं धर्मपु
त्रं युधिष्ठिरं तथा स कृत्वा पूजां तां भ्रातृभिः सह पांडवः तस्यां सभायां रम्यायां रेमे शक्रो यथा दिवि सभायामृषयस्तस्यां
पांडवैः सह आसते आसांचक्रुर्नरेंद्राश्च नानादेशसमागताः असितो देवलः सत्यः सर्पिमाली महाशिराः अर्वावसुः
सुमित्रश्च मैत्रेयः शुनको बलिः बको दाल्भ्यः स्थूलशिराः कृष्णद्वैपायनः शुकः सुमंतुर्जैमिनिः पैलो व्यासशिष्यास्तथा व न्ये५
यं तित्तिरिर्याज्ञवल्क्यश्च ससुतो लोमहर्षणः अप्सुहोम्यश्च धौम्यश्च अणीमांडव्यकौशिकौ दामोष्णीषस्त्रैवलिश्च पर्णा यो०
दो घटजानुजः मौंजायनो वायुभक्षः पाराशर्यश्च सारिकः बलीवाकः शिनीवाकः सत्यवाकः कृतश्रमः आत्कर्णः शिखावां ६
श्च आलंबः पारिजातकः पर्वतश्च महाभागो मार्कंडेयो महामुनिः पवित्रपाणिः सावर्णो भालुकिर्गालवस्तथा जंघाबं
धश्च रैभ्यश्च कोकवेगाश्च वागुरुः हरिबभ्रुश्च कौंडिन्यो बभ्रुमाली सनातनः कक्षीवान्कुशिजश्चैव नाचिकेतोथ

थ गौतमः पैंगो वराहः शुनकः शांडिल्यश्च महातपाः कुक्कुरो वेणुजंघोथ कालपः कठ एव च मुनयो धर्मविद्वांसो धृतात्मानो जि
तेंद्रियाः एते चान्ये च बहवो वेदवेदांगपारगाः उपासते महात्मानं सभायामृषिसत्तमाः कथयंतः कथाः पुण्या धर्मज्ञाः शुचयो
मलाः तथैव क्षत्रियश्रेष्ठा धर्मराजमुपासते श्रीमान्महात्मा धर्मात्मा मुंजकेतुर्विवर्द्धनः संग्रामजिद्दुर्मुखश्च उग्रसेन
श्च वीर्यवान् कक्षसेनः क्षितिपतिः क्षेमकश्चापराजितः कंबोजराजः कमठः कंपनश्च महाबलः सततं कंपयामास यवना
न् एक एव यः बलपौरुषसंपन्नान्कृतास्त्रानमितौजसः यथासुरान्कालकेयान्देवो वज्रधरस्तथा जटासुरो मद्रकाणां च
राजा कुंतिः पुलिंदश्च किरातराजः तथांगवंगौ सह पुंड्रकेण पांड्योड्रराजौ च सहांध्रकेण अंगो वंगः सुमित्रश्च शैब्यश्चा
मित्रकर्शनः किरातराजः सुमना यवनाधिपतिस्तथा चाणूरो देवरातश्च भोजो भीमरथश्च यः श्रुतायुधश्च कालिं
गो जयसेनश्च मागधः सुशर्मा च चेकितानश्च पुरुश्चामित्रकर्शनः केतुमान्वसुदानश्च वैदेहोथ कृतक्षणः सुधर्मा
चानिरुद्धश्च श्रुतायुश्च महाबलः अनूपराजो दुर्धर्षः क्रमजिच्च सुदर्शनः शिशुपालः सह सुतः करूषाधिपतिस्तथा
वृष्णीनां चैव दुर्धर्षाः कुमारा देवरूपिणः आहुको विप्रथुश्चैव गदः सारण एव च अक्रूरः कृतवर्मा च सत्यकश्च शिनेः सुतः
भीष्मकोथाहृतिश्चैव द्युमत्सेनश्च वीर्यवान् केकयाश्च महेष्वासा यज्ञसेनश्च सोमकिः केतुमान्वसुमांश्चैव कृतायुश्च महा
बलः एते चान्ये च बहवः क्षत्रिया मुख्यसत्तमाः उपासते सभायां स्म कुंतीपुत्रं युधिष्ठिरं अर्जुनं ये च संश्रित्य राज
पुत्रा महाबलाः अशिक्षंत धनुर्वेदं रौरवाजिनवाससः तत्र शिक्षिता राजन्कुमारा वृष्णिनंदनाः रौक्मिणेयश्च सांब
श्च युयुधानश्च सात्यकिः सुधर्मा चानिरुद्धश्च शैब्यश्च नरपुंगवः एते चान्ये च बहवो राजानः पृथिवीपते धनंजयसखा

सभा०
५

न्ननित्यमाक्तोस्मतुंबरुः उपासते महात्मानमासीनं सप्तविंशतिः चित्रसेनः सहामात्यो गंधर्वाप्सरसस्तथा गीतवादित्रकु
शलाः शम्यातालविशारदाः प्रमाणेथलयस्थाने किंनराः कृतनिश्रमाः संचोदितास्ते तुंबुरुणा गंधर्वसहितास्तथा गायंति
दिव्यतानैस्ते यथान्यायं मनस्विनः पांडुपुत्रान्नृषींश्चैव रमयंत उपासते तस्यां सभायामासीनाः सुव्रताः सत्य
संगराः दिवीव देवा ब्रह्माणं युधिष्ठिरमुपासते इति सभापर्वणि ४ वैशं० तथा तत्रोपविष्टेषु पां
डवेषु महात्मसु महत्सूपविष्टेषु गंधर्वेषु भारत वेदोपनिषदां वक्ता ऋषिः सुरगणार्चितः इतिहासपुराण
ज्ञः पुराकल्पविशेषवित् न्यायविद्धर्मतत्वज्ञः षडंगविदनुत्तमः ऐक्यसंयोगनानात्वसमवायविशारदः वक्ता प्रग
ल्भो मेधावी स्मृतिमान्नयवित्कविः परावरविभागज्ञः प्रमाणकृतनिश्चयः पंचावयवयुक्तस्य वाक्यस्य गुणदोष
वित् उत्तरोत्तरवक्ता च वदतोपि बृहस्पतेः धर्मकामार्थमोक्षेषु यथावत्कृतनिश्चयः तथा भुवनकोशस्य स
र्वस्यास्य महापतिः प्रत्यक्षदर्शी लोकस्य तिर्यगूर्ध्वमधस्तथा सांख्ययोगविभागज्ञो निर्विवित्सुः सुरासुरान्
संधिविग्रहतत्वज्ञस्त्वनुमानविभागवित् षाड्गुण्यविधियुक्तश्च सर्वशास्त्रविशारदः युद्धगांधर्वसेवी च सर्वत्रा
प्रतिमस्तथा एतैश्चान्यैश्च बहुभिर्युक्तो गुणगणैर्मुनिः लोकाननुचरन्सर्वानागमत्तां सभां नृप नारदः सुमहात श्रीः ५
जाः सर्षिभिः सहितस्तदा पारिजातेन राजेंद्र रैवतेन च धीमता सुमुखेन च सौम्येन देवर्षिरमितद्युतिः सभा
स्थान्पांडवान्द्रष्टुं प्रीयमाणो मनोजवः जयाशीर्भिस्तु तं विप्रो धर्मराजानमर्चयत् तमागतमृषिं दृष्ट्वा नारदं

अष्टौ गुणाः पुरुषं दीपयंति प्रज्ञा च कौल्यं च दमः श्रुतं च पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च ८
षड्गुणाः अंगानि सप्त शक्तित्रयं

सर्वधर्मवित् तुतोष च यथावच्च पूजां प्राप्य युधिष्ठिरात् सोर्चितः पार्थैः सर्वैर्महर्षिर्वेदपारगः धर्मकामार्थसंयुक्तं पप्रच्छेदं
युधिष्ठिरं नारदः कच्चिदर्थाश्च कल्प्यंते धर्मे च रमते मनः सुखानि चानुभूयंते मनश्च न विहन्यते कच्चिदाचरितां पूर्वैर्नर
देवपितामहैः वर्त्तसे वृत्तिमक्षुद्रां धर्मार्थसहितां शुभां कच्चिदर्थेन वा धर्मं धर्मेणार्थमथापि वा उभौ वा प्रीतिसारेण न का
मेन प्रबाधसे कच्चिदर्थं च धर्मं च कामं च जयतां वर विभज्य काले कालज्ञः समं वरद सेवसे कच्चिद्राजगुणैः षड्भिः सप्तो सांधिवि
स्वाम्यमात्य पायांस्तथानघ बलाबलं तथा सम्यक्चतुर्दश परीक्षसे कच्चिदात्मानमन्विक्ष्य परांश्च जयतां वर तथा संधाय क
प्रजाः र्माणि अष्टौ भारत सेवसे कच्चित्प्रकृतयः सप्त न लुप्ता भरतर्षभ आढ्यास्तथाव्यसनिनः स्वनुरक्ताश्च सर्वशः कच्चिन्न
कृतकैर्दूतैर्ये चाप्यपरिशंकिताः त्वत्तो वा तव वामात्यैर्भिद्यते मंत्रितं तथा मित्रोदासीनशत्रूणां कच्चिद्वेत्सि चिकीर्षितं कच्चि
त्संधिं यथाकालं विग्रहं चोपसेवसे कच्चिद्वृत्तिमुदासीने मध्यमे चानुमन्यसे कच्चिदात्मसमा वृद्धाः शुद्धाः संबोधनक्षमाः
कुलीनाश्चानुरक्ताश्च कृतास्ते वीर मंत्रिणः विजयो मंत्रमूलो हि राज्ञो भवति भारत कच्चित्संवृतमंत्रैस्तैरमात्यैः शा
स्त्रकोविदैः राष्ट्रं सुरक्षितं तात शत्रुभिर्न विलुप्यते कच्चिन्निद्रावशं नैषि कच्चित्काले विबुध्यसे कच्चिच्चापररात्रेषु चिंतय दू
स्यर्थमर्थवित् कच्चिन्मंत्रयसे नैकः कच्चिन्न बहुभिः सह कच्चित्ते मंत्रितो मंत्रो न राष्ट्रं परिधावति कच्चिदर्थान्विनि
श्चित्य लघुमूलान्महोदयान् क्षिप्रमारभसे कर्तुं न विघ्नयसि तादृशान् कच्चिन्न सर्वे कर्मांताः परोक्षास्ते विशंकिताः
सर्वे वा पुनरुत्सृष्टाः संसृष्टं ह्यत्र कारणं आप्तैरलुब्धैः क्रमिकैस्ते च कच्चिदनुष्ठिताः कच्चिद्राजन्कृतान्येव कृतप्रायाणि वा पुनः

स्वत्यक्ताः १ न संक्रमेनि पुरुषा अधिकारि पाकर्मीताः २

सभा०
६
विषुस्ते वीरकर्माणि नानाख्यानि कानि चित् कच्चित्कारणिका धर्मे सर्वशास्त्रेषु कोविदः कारयंति कुमारांश्च योधमुख्यांश्च
सर्वशः कच्चित्सहस्रैर्मूर्खाणामेकं क्रीणासि पंडितं पंडितो ह्यर्थकृच्छ्रेषु कुर्यान्निःश्रेयसं परं कच्चिद्दुर्गाणि सर्वाणि धनधान्या
युधोदकैः यंत्रैश्च परिपूर्णानि तथा शिल्पिधनुर्धरैः एकोप्यमात्यो मेधावी शूरो दांतो विचक्षणः राजानं राजपुत्रं वा
राजनीतिशास्त्र प्रापयेन्महतीं श्रियं कच्चिदष्टादशान्येषु स्वपक्षे दशपंच च त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः कच्चिद्द्विषाम तीर्थानुपायाः
विदितः प्रतिपन्नश्च सर्वदा नित्ययुक्तो रिपून्सर्वान्वीक्षसे रिपुसूदन कच्चिद्विनयसंपन्नः कुलपुत्रो बहुश्रुतः अनुसूय यु
रसंकीर्णः सत्कृतस्ते पुरोहितः कच्चिदग्निषु ते युक्तो विधिज्ञो मतिमानृजुः कृतं च हूयमानं च काले वेदयसे सदा
कच्चिदंगेषु निष्णातो ज्योतिषः प्रतिपादकः उत्पातेषु च सर्वेषु दैवज्ञः कुशलस्तव कच्चिन्मुख्या महत्स्वेव मध्यमेषु च मध्य
माः जघन्याश्च जघन्येषु भृत्याः कर्मसु योजिताः अमात्यानुपधातीतान्पितृपैतामहांछुचीन् श्रेष्ठाञ्श्रेष्ठेषु कच्चित्त्वं नि प
योजयसि कर्मसु कच्चिन्नोग्रेण दंडेन भृशमुद्विजसे प्रजाः राष्ट्रं तवानुशासंति मंत्रिणो भरतर्षभ कच्चित्त्वां नावजानंति या
जकाः पतितं यथा उग्रप्रतिग्रहीतारं कामयानमिव स्त्रियः कच्चिद्धृष्टश्च शूरश्च मतिमान्धृतिमाञ्छुचिः कुलीनश्चानु
रक्तश्च दक्षः सेनापतिस्तव कच्चिद्बलस्य ते मुख्याः सर्वयुद्धविशारदाः धृष्टावदाता विक्रांतास्त्वया सत्कृत्य मानिताः श्रीः
कच्चिद्बलस्य भक्तं च वेतनं च यथोचितं संप्राप्तकाले दातव्यं ददासि न विकर्षसि कालातिक्रमणाद्ध्येते भक्तवेतन ६
योर्भृताः भर्तुः कुर्वंति दौर्गत्यात्सोनर्थः सुमहान्स्मृतः कच्चित्सर्वेनुरक्तास्त्वां कुलपुत्राः प्रधानतः कच्चित्प्राणांस्तवार्थे

षु संत्यजंति सदा युधि कच्चिन्नैको बहूनर्थान्सर्वशः सांपरायिकान् अनुशास्सि यथाकामं कामात्मा शासनातिगः कच्चि
त्पुरुषकारेण पुरुषः कर्म शोभयन् लभते मानमधिकं भूयो वा भक्तिवेतन कच्चिद्विद्याविनीतांश्च नरान्ज्ञानविशारदान्
यथार्हं गुणतश्चैव दानेनाभ्युपपद्यसे कच्चिद्दारान्मनुष्याणां तवार्थे मृत्युमीयुषां व्यसनं चाभ्युपेतानां बिभर्षि भरतर्ष
गतं ८ भ कच्चिद्भयादुपगतं क्षीणं वा रिपुमागतं युद्धे वा विजितं पार्थ पुत्रवत्परिरक्षसि कच्चित्त्वमेव सर्वस्याः पृथिव्याः पृथिवी
पते समश्चानभिशंक्यश्च यथा माता यथा पिता कच्चिद्व्यसनिनं शत्रुं निशम्य भरतर्षभ अभियासि जवेनैव समीक्ष्य त्रिवि
६ धं बलं यात्रामारभसे दिष्ट्या प्राप्तकालमरिंदम पार्ष्णिमूलं च विज्ञाय व्यवसायं पराजयं बलस्य च महाराज दत्वा वेतनमग्र
रक्षे तः कच्चिच्च बलमुख्येभ्यः परराष्ट्रे परंतप उपच्छन्नानि रत्नानि प्रयच्छसि यथार्हतः कच्चिदात्मानमेवाग्रे विजित्य विजि
तेंद्रियः पराञ्जिगीषसे पार्थ प्रमत्तानजितेंद्रियान् कच्चित्ते यास्यतः शत्रून्पूर्वं यांति स्वनुष्ठिताः सामदानं च भेदश्च दंडश्च
६ विधिवद्गुणाः कच्चिन्मूलं दृढं कृत्वा परान्यासि विशांपते तांश्च विक्रमसे जेतुं जित्वा च परिरक्षसि कच्चिदष्टांगसंयुक्ता चतु
र्विधबला चमूः बलमुख्यैः सुनीता ते द्विषतां प्रतिबाधिनी कच्चिल्लवं च मुष्टिं च परराष्ट्रे परंतप अविहाय महाराज निहं
सि समरे रिपून् कच्चित्स्वपरराष्ट्रेषु बहवोधिकृतास्तव अर्थान्समधितिष्ठंति रक्षंति च परस्परं कच्चिदभ्यवहार्याणि
गात्रसंघर्षणानि च घ्रेयाणि च महाराज रक्षंत्यनुमतास्तव कच्चित्कोशश्च कोष्ठं च वाहनं द्वारमायुधं आयश्च कृतक
ल्याणैस्तव भक्तैरनुष्ठितः कच्चिदाभ्यंतरेभ्यश्च बाह्येभ्यश्च विशांपते रक्षस्यात्मानमेवाग्रे तांश्च स्वेभ्यो मिथश्च तान्

रथानां गाहना योधाः पत्तयः कर्मकारकाः। चरा देशिकमुख्याश्च ८

सभा० ७ कच्चिन्न पाने द्यूते वा क्रीडासु प्रमदासु च प्रतिजानंति पूर्वाह्णे व्ययं व्यसनजं तव कच्चिदायस्य चार्द्धेन चतुर्भागेन वा पुनः पादभा
गैस्त्रिभिर्वापि व्ययः संशोध्यते तव कच्चिज्ज्ञातीन्गुरून्वृद्धान्वणिजः शिल्पिनः श्रितान् अभीक्ष्णमनुगृह्णासि धनधान्येन दुर्ग
तान् कच्चिदायव्ययुक्ताः सर्वे गणकलेखकाः अनुतिष्ठंति पूर्वाह्णे नित्यमायव्ययं तव कच्चिदर्थेषु संप्रौढान् हितकामान
नुप्रियान् नापकर्षसि कर्मभ्यः पूर्वमप्राप्य किल्बिषं कच्चिद्विदित्वा पुरुषानुत्तमाधममध्यमान् त्वं कर्मस्वनुरूपेषु नियो
वैरिणो वा ५ जयसि भारत कच्चिन्न लुब्धाश्चौरा वा वैरिणो वा विशांपते अप्राप्तव्यवहारा वा तव कर्मस्वनुष्ठिताः कच्चिन्न लुब्धैश्चौरैर्वा कुमारैः
स्त्रीबलेन वा त्वया वा पीड्यते राज्यं कच्चित्तुष्टाः कृषीवलाः कच्चिद्राष्ट्रे तडागानि पूर्णानि च बृहंति च भागशो विनिवि
देशो नद्य- ष्टानि न कृषिर्देवमातृका कच्चिन्न बीजं भक्तं वा कर्षकस्यावसीदति पादिकं च शतं वृद्ध्या ददास्यृणमनुग्रहं कच्चित्स्व
नुष्ठिता तात वार्ता ते साधुभिर्जनैः वार्तायां संश्रितस्तात लोकोयं सुखमेधते कच्चिच्छूराः कृतप्रज्ञाः पंच पंच स्वनुष्ठि
ताः क्षेमं कुर्वंति संहत्य राजन्जनपदे तव कच्चिन्नगरगुप्त्यर्थं ग्रामा नगरवत्कृताः ग्रामवच्च कृता घोषास्ते च सर्वे त्वदर्थ
काः कच्चिद्बलेनानुगताः समेषु विषमेषु च पुराणचौरा निघ्नंतश्चरंति विषये तव कच्चित्स्त्रियः सांत्वयसि कच्चित्ताश्च
सुरक्षिताः कच्चिन्न श्रद्दधास्यासां कच्चिद्गुह्यं न भाषसे कच्चिदात्ययिकं श्रुत्वा तदर्थमनुचिंत्य च प्रियाण्यनुभवंछेषे न त्व श्रीः
मंतःपुरे नृप कच्चिद्द्वौ प्रथमौ यामौ रात्र्यां सुप्त्वा विशांपते संचिंतयसि धर्मार्थौ याम उत्थाय पश्चिमे कच्चिद्दर्शयसे नित्यं म
नुष्यान्समलंकृतः उत्थाय काले कालज्ञः सह पांडव मंत्रिभिः कच्चिद्रक्ताम्बरधराः खड्गहस्ताः स्वलंकृताः उपासते त्वा

५२

मभितो रक्षणार्थमरिंदम कच्चिद्दंड्येषु समवत्पूज्येषु च विशांपते परीक्ष्य वर्तसे सम्यक् प्रियेषु वाप्रियेषु च कच्चिच्छारीरमाबाधम
षधैर्नियमेन वा मानसं वृद्धसेवाभिः सदा पार्थापकर्षसि कच्चिद्वैद्याश्चिकित्सायामष्टांगायां विशारदाः सुहृदश्चानुर
क्ताश्च शरीरे ते हिताः सदा कच्चिन्न लोभान्मोहाद्वा मानाद्वापि विशांपते अर्थिप्रत्यर्थिनः प्राप्तान्न पश्यसि कथंचन क
च्चिन्न लोभान्मोहाद्वा ~~मानाद्वापि विशांपते~~ विश्रंभात्प्रणयेन वा आश्रितानां मनुष्याणां वृत्तिं त्वं संरुणद्धि वै कच्चित्पौ सि
रा न सहिता ये च ते राष्ट्रवासिनः त्वया सह विरुध्यंते परैः क्रीताः कथंचन कच्चित्ते दुर्बलः शत्रुर्बलेन परिपीडितः मंत्रेण
बलवान्कश्चिदुभाभ्यां वा कथंचन कच्चित्सर्वेनुरक्तास्त्वां भूमिपालाः प्रधानतः कच्चित्प्राणांस्त्वदर्थेषु संत्यजंति त्व
या दृताः कच्चित्ते सर्वविद्यासु गुणतोर्चा प्रवर्तते ब्राह्मणानां च साधूनां तव निःश्रेयसी शुभा दक्षिणास्त्वं ददास्येषां नित्यं
स्वर्गापवर्गदाः कच्चिद्धर्मे त्रयीमूले पूर्वैराचरिते जनैः यतमानस्तथा कर्तुं तस्मिन्कर्मणि वर्तसे कच्चित्तव गृहेन्नानि स्वादून्य
श्नंति वै द्विजाः गुणवंति गुणोपेतास्तवाध्यक्षं सदक्षिणं कच्चित्क्रतूनेकचित्तो वाजपेयांश्च सर्वशः पुंडरीकांश्च कार्त्स्न्येन य
तसे कर्तुमात्मवान् कच्चिज्ज्ञातीन्गुरून्वृद्धान्दैवतांस्तापसानपि चैत्यांश्च वृक्षान्कल्याणान्ब्राह्मणांश्च नमिष्यसि कच्चि नमस्यसि ८
च्छोको न मन्युर्वा त्वया प्रोत्पाद्यतेनघ अपि मंगलहस्तश्च जनः पार्श्वेनुतिष्ठति कच्चिदेषा च ते बुद्धिर्वृत्तिरेषा च तेनघ
आयुष्या च यशस्या च धर्मकामार्थदर्शिनी एतया वर्तमानस्य बुद्ध्या राष्ट्रं न सीदति विजित्य च महीं राजा सोत्यंतं सुखमे
धते कच्चिदार्यो विशुद्धात्मा क्षारितश्चौरकर्मणि अदृष्टशास्त्रकुशलैर्न लोभाद्वध्यते शुचिः दुष्टो गृहीतस्त

आक्षारितः क्षारितोभिशस्ते

सभा० ८

तत्त्वकारीतहेतुर्दृष्टः सकारणः कच्चिन्नमुच्यते स्तेनो द्रव्यलोभान्नरर्षभ उत्पन्नान्कच्चिदाढ्यस्य दरिद्रस्य च भारत अर्था
न्न मिथ्या पश्यंति तवामात्या हृता धनैः नास्तिक्यमनृतं क्रोधं प्रमादं दीर्घसूत्रतां अदर्शनं ज्ञानवतामालस्यं क्षिप्तचि
त्ततां एकचिंतनमर्थानामनर्थज्ञैश्च चिंतनं निश्चितानामनारंभं मंत्रस्यापरिरक्षणं अमंगल्यप्रयोगं च प्रसंगं वि
षयेषु च कच्चित्त्वं वर्जयस्येतान्राजदोषांश्चतुर्दश प्रायशो यैर्विनश्यंति कृतमूला अपि पार्थिवाः कच्चित्ते सफला वेदाः क
च्चित्ते सफलं धनं कच्चित्ते सफला दाराः कच्चित्ते सफलं श्रुतं युधिष्ठिरः कथं वै सफला वेदाः कथं वै सफलं धनं कथं वै
सफला दाराः कथं वै सफलं श्रुतं नारदः अग्निहोत्रफला वेदा दत्तभुक्तफलं धनं रतिपुत्रफला दाराः शीलवृत्तफलं श्रु
तं वैशं० एतदाख्याय स मुनिर्नारदो वै महातपाः पप्रच्छानंतरमिदं धर्मात्मानं युधिष्ठिरं नारदः कच्चिदभ्यागता दूराद्व
णिजो लाभकारणात् यथोक्तमवहार्यंते शुल्कं शुल्कोपजीविभिः कच्चित्ते पुरुषा राजन्पुरे राष्ट्रे च मानिताः उपानयंति पण्या
नि उपधाभिरवंचिताः कच्चिच्छृणोषि वृद्धानां धर्मार्थसहिता गिरः नित्यमर्थविदां तात यथाधर्मार्थदर्शिनां कच्चित्ते कृषि
तंत्रेषु गोषु पुष्पफलेषु च धर्मार्थं च द्विजातिभ्यो दीयते मधुसर्पिषी द्रव्योपकरणं किंचित्सर्वदा सर्वशिल्पिनां चातु
र्मास्यावरसम्यक्नियतं संप्रयच्छसि कच्चित्कृतं विजानीषे कर्तारं च प्रशंससि सतां मध्ये महाराज सत्करोषि च पूजय
न् कच्चित्सूत्राणि सर्वाणि गृह्णासि भरतर्षभ हस्तिसूत्राश्वसूत्राणि रथसूत्राणि वा विभो कच्चिदभ्यस्यते सम्यक् श्री: ८
गृहे ते भरतर्षभ धनुर्वेदस्य सूत्रं वै यंत्रसूत्रं च नागरं कच्चिदस्त्राणि सर्वाणि ब्रह्मदंडश्च तेनघ विषयोगास्त
णिस अभिचारिकं

तैर्भेन दृष्टिसागरनेरवत्नांत ५

था सर्वे विदिताः शत्रुनाशनाः कच्चिदग्निभयाच्चैव सर्पव्यालभयात्तथा रोगरक्षोभयाच्चैव राष्ट्रं स्वं परिरक्षसि कच्चिदंधाश्च
मूकांश्च पंगून्व्यंगानबांधवान् पितेव पासि धर्मज्ञ तथा प्रव्रजितानपि षडनर्था महाराज कच्चित्ते पृष्ठतः कृताः निद्रालस्यं भ
यं क्रोधो मार्दवं दीर्घसूत्रता वैशं० ततः कुरूणामृषभो महात्मा श्रुत्वा गिरो ब्राह्मणसत्तमस्य प्रणम्य पादावभिवाद्य हृ
ष्टो राजाब्रवीन्नारदं देवरूपं युधिष्ठिरः एवं करिष्यामि यथा त्वयोक्तं प्रज्ञा हि मे भूय एवाभिवृद्धा उक्त्वा तथा चैव
चकार राजा नारदः एवं यो वर्त्तते राजा चातुर्वर्ण्यस्य रक्षणे स विहृत्येह सुसुखी शक्रस्यैति सलोकतां इति स
भापर्वणि नारदप्रश्नः ५ वैशं० संपूज्याथाभ्यनुज्ञातो महर्षेर्वचनात्परं प्रत्युवाचानुपूर्व्येण धर्मराजो युधि
रः भगवन्न्याय्यमाहैतं यथावद्धर्मनिश्चयं यथाशक्ति यथान्यायं क्रियतेयं विधिर्मया राजभिर्यद्यथा कार्यं पुरा घ
वै तन्न संशयः यथान्यायोपनीतार्थं कृतं हेतुमदर्थवत् वयं तु सत्पथं तेषां यातुमिच्छामहे विभो न तु शक्यं तथा गंतुं यथा
तैर्नियतात्मभिः वैशं० तं तु विश्रांतमासीनं देवर्षिममितद्युतिं एवमुक्त्वा स धर्मात्मा वाक्यं तदभिपूज्य च मुहूर्तात्प्रा
प्तकालं च दृष्ट्वा लोकचरं मुनिं नारदं स्वस्थमासीनमुपासीनो युधिष्ठिरः अपृच्छत्पांडवस्तत्र राजमध्ये महाद्यु
तिं युधिष्ठिरः भवान्संचरते लोकान्सदा नानाविधान्बहून् ब्रह्मणा निर्मितान्पूर्वं प्रेक्षमाणो मनोजवः ईदृशी भवता
काचिद्दृष्टपूर्वा सभा क्वचित् इतो वा श्रेयसी ब्रह्मंस्तन्ममाचक्ष्व पृच्छतः तच्छ्रुत्वा नारदस्तस्य धर्मराजस्य भाषितं तं

सभा० ८

यन्म^

पांडवं प्रत्युवाचेदं स्मरन्मधुरया गिरा नारदः मानुषेषु न मे तात दृष्टपूर्वा न च श्रुता सभा मणिमयी राजन्यथेयं त
व भारत सभां तु पितृराजस्य वरुणस्य च धीमतः कथयिष्ये तथेंद्रस्य कैलासनिलयस्य च ब्रह्मणश्च सभां दिव्यां कथ
यिष्ये गतक्लमां दिव्यादिव्यैरभिप्रायैरुपेतां विश्वरूपिणीं देवैः पितृगणैः साध्यैर्यतिभिश्च यतात्मभिः जुष्टां मुनि
गणैर्दिव्यैर्वेदयज्ञैः सदक्षिणैः यदि ते श्रवणे बुद्धिर्वर्तते भरतर्षभ नारदेनैवमुक्तस्तु धर्मराजो युधिष्ठिरः प्रांजलि
र्भ्रातृभिः सार्धं तैश्च सर्वैर्द्विजोत्तमैः नारदं प्रत्युवाचेदं धर्मराजो महामनाः सभाः कथय ताः सर्वाः श्रोतुमिच्छामहे वयं किं
द्रव्याः स्ताः सभा ब्रह्मन्किंविस्ताराः किमायताः पितामहं च के तस्यां सभायां पर्युपासते वासवं देवराजं च यमं वैवस्वतं च
के वरुणं च कुबेरं च सभायां पर्युपासते एतत्सर्वं यथान्यायं ब्रह्मर्षे वदतस्तव श्रोतुमिच्छामि सहिताः परं कौतूहलं
हि नः एवमुक्तः पांडवेन नारदः प्रत्यभाषत क्रमेण राजन्दिव्यास्ताः श्रूयंतामिह नः सभाः इति सभापर्वणि ६
नारदः शक्रस्य तु सभा दिव्या भास्वरा कर्मनिर्जिता स्वयं शक्रेण कौरव्य निर्मितार्कसमप्रभा विस्तीर्णा योजनशतं
शतमध्यर्धमायता वैहायसी कामगमा पंचयोजनमुच्छ्रिता जराशोकक्लमापेता निरातंका शिवा शुभा वेश्मासनवती
रम्या दिव्यपादपशोभिता तस्यां देवेश्वरः पार्थ सभायां परमासने आस्ते शच्या महेंद्राण्या श्रिया लक्ष्म्या च भार
त बिभ्रद्वपुरनिर्देश्यं किरीटी लोहितांगदः विरजोंबरश्चित्रमाल्यो ह्रीकीर्तिद्युतिभिः सह तस्यामुपासते नित्यं म
हात्मानं शतक्रतुं मरुतः सर्वशो राजन्सर्वे गृहमेधिनः सिद्धा देवर्षयश्चैव साध्या देवगणास्तथा मरुत्वंतश्च

स२

श्रीः ९

श्र-

सहिता भास्वंतो हेममालिनः एते सानुचराः सर्वे पार्थ शक्रमुपासते अमला धूतपाप्मानो दीप्यमाना इवाग्नयः तेजस्विनः
सोमसुतो विशोका विगतज्वराः पराशरः पर्वतश्च तथा सावर्णिगालवौ शंखश्च लिखितश्चैव तथा गौरशिरा मुनिः दुर्वासाः
क्रोधनः श्येनस्तथा दीर्घतमा मुनिः पवित्रपाणिः सावर्णिर्याज्ञवल्क्योथ भालुकिः उद्दालकः श्वेतकेतुस्तांड्यो भांडायनि
स्तथा हविष्मांश्च गविष्ठश्च हरिश्चंद्रश्च पार्थिवः हृद्यश्चोदरशांडिल्यः पाराशर्यः कृषीवलः वातस्कंधो विशाखश्च वि
धाता काल एव च करालदंतस्त्वष्टा च विश्वकर्मा च तुंबरुः अयोनिजा योनिजाश्च वायुभक्षा हुताशनः ईशानं सर्वलो
कस्य वज्रिणं समुपासते सहदेवः सुनीथश्च वाल्मीकिश्च महातपाः शमीकः सत्यवाक्चैव प्रचेताः सत्यसंगरः मेधाति
थिर्वामदेवः पुलस्त्यः पुलहः क्रतुः मरुत्तश्च मरीचिश्च स्थाणुश्चात्रिर्महातपाः कक्षीवान्गौतमस्तार्क्ष्यः तथा वैश्वानरो मुनिः
मुनिः कालकवृक्षीय आश्राव्योथ हिरण्मयः संवर्तो देवहव्यश्च विष्वक्सेनश्च वीर्यवान् दिव्या आपस्तथौषध्यः श्रद्धा
मेधा सरस्वती अर्थो धर्मश्च कामश्च विद्युतश्चैव पांडव जलवाहास्तथा मेघा वायवः स्तनयित्नवः प्राची दिग्यज्ञवाहा
श्च पावकाः सप्तविंशतिः अग्नीषोमौ तथेंद्राग्नी मित्रश्च सविता र्यमा भगो विश्वे च साध्याश्च गुरुः शुक्रस्तथैव च विश्वा
वसुश्चित्रसेनः सुमनस्तरुणस्तथा यज्ञश्च दक्षिणाश्चैव ग्रहास्तोभाश्च भारत यज्ञवाहाश्च ये मंत्राः सर्वे तत्र समा
सते तथैवाप्सरसो राजन्गंधर्वाश्च मनोरमाः नृत्यवादित्रगीतैश्च हास्यैश्च विविधैरपि रमयंति स्म नृपते देवराजं श
तक्रतुं स्तुतिभिर्मंगलैश्चैव स्तुवंतः कर्मभिस्तथा विक्रमैश्च महात्मानं बलवृत्रनिषूदनं ब्रह्मराजर्षयश्चैव सर्वे देवर्षि

×भृगुःसनत्सुयस्तथा एवासभामयाराजन् २

सभा० यैस्तथा विमानैर्विविधैर्दिव्यैर्दीप्यमानाइवाग्नयः स्रग्विणोभूषिताश्चान्ये यांतिचायांतिचापरे बृहस्पतिश्चशुक्रश्चनित्यमा
१० स्तांहितत्रवै एतेचान्येचबहवोमहात्मानोयतव्रताः विमानेश्चंद्रसंकाशैःसोमवत्प्रियदर्शनाः ब्रह्मणास्सहशाराऊर्ध्वंह
ष्टापुष्करमालिनी शतक्रतोर्महाबाहोयस्यामेपिसभांभृणु इतिसभापर्वणिइंद्रसभावर्णनं ७
नारदः कथयिष्येसभांयाम्यां युधिष्ठिरनिबोधतां वैवस्वतस्ययांपार्थविश्वकर्माचकारह तेजसीसासभाराजन्ब
भूवशतयोजना विस्तारायामसंपन्नाभूयसीचापिपांडव अर्कप्रकाशाभ्राजिष्णुःसर्वतःकामरूपिणी नातिशी
तानचात्युष्णामनसश्चप्रहर्षिणी नशोकोनजरातस्यांक्षुत्पिपासेनचाप्रियं नचदैन्यंक्लमोवापिप्रतिकूलंनचाप्यु
त सर्वेकामास्थितास्तस्यांयेदिव्यायेचमानुषाः रसवच्चप्रभूतंचभक्ष्यभोज्यमरिंदम लेह्यंचोष्यंचपेयंचहृद्यंस्वा
दुमनोहरं पुण्यगंधाःस्रजस्तत्रनित्यकामफलाद्रुमाः सेवंतिवितताथानिशीतान्युष्णानिचैवह तस्यांराजर्षयःपुण्या
स्तथादेवर्षयोमलाः यमंवैवस्वतंतातप्रहृष्टाःपर्युपासते ययातिर्नहुषःपूरुर्मांधातासोमकोनृगः त्रसदस्युश्चराज
षिःकृतवीर्यःश्रुतश्रवाः अविप्रणेमुःसिद्धश्चकृतवेगःकृतिर्निमिः प्रतर्दनःशिबिर्मत्स्यःपृथुलाक्षोबृहद्रथः वार्तोमरुत्तःकु
शिकःसांकाशःसांकृतिर्ध्रुवः चतुरश्वःसदश्वोर्मिःकार्तवीर्यश्चपार्थिवः भरतःसुरथश्चैववसुनीथोनिशठोनलः दिवोदासश्च श्रीः
सुमनाअंबरीषोभगीरथः व्यश्वःसदश्वोवध्र्यश्वःपृथुवेगःपृथुश्रवाः पृषदश्वोवसुमनाःक्षुपश्चसुमहाबलः रुषद्गुर्वृष १०
सेनश्चपुरुकुत्सोध्वजीरथी आर्ष्टिषेणोदिलीपश्चमहात्माचाप्युशीनरः औशीनरिःपुंडरीकःशर्यातिःशरभःशुचिः अं

क्षुप २

स्म ३
गोरिष्टश्चवेणश्चदुःषंतःसंजयोजयः भांगासुरिःसुनीथश्चनिषधोथवहीनरः करंधमोबाह्लिकश्चसुद्युम्नोबलवान्मधुः
ऐलोमरुत्तश्चतथा बलवान्पृथिवीपतिः कपोतरोमातृणकःसहदेवार्जुनौतथा व्यश्वःसाश्वःकृशाश्वश्चशशबिंदुश्चपार्थि
वः रामोदाशरथिश्चैवलक्ष्मणोथप्रतर्दनः अलर्कःकक्षसेनश्चगयोगौराश्वएवच जामदग्न्यश्चरामोत्रनाभागसगरौतथा
भूरिद्युम्नोमहाश्वश्चहयाश्वोजनकस्तथा राजवैन्योवारिसेनःपुरुजिज्जनमेजयः ब्रह्मदत्तस्त्रिगर्तश्चराजोपरिचरस्त
जानुर्गैत ५ था इंद्रद्युम्नोभीमगजाश्वःपृष्ठोगवोजयः पद्मोथमुचुकुंदश्चभूरिद्युम्नश्चसेनजित् अरिष्टनेमिःप्रद्युम्नःशंभुर्द्वावि
थिस्तथा शतमत्स्यानृपतयःशतंनीपाःशतंहयाः धृतराष्ट्राश्चैकशतमशीतिर्जनमेजयाः शतंचब्रह्मदत्तानांवीराणांसी
रिणांशतं भीष्माणांद्वेशतेभीमानांतुतथाशतं शतंचप्रतिविंध्यानांशतंनागाःशतंहयाः पलाशानांशतंज्ञे
यंशतंकाशकुशादयः शांतनुश्चैवराजेंद्रपांडुश्चैवपितातव उषंगवःशतरथोदेवराजोजयत्सेनः वृषादर्भिश्चराज
र्षिर्बुद्धिमान्सहमंत्रिभिः अथापरेसहस्राणियेगताःशशिबिंदवः इष्ट्वाश्वमेधैर्बहुभिर्महद्भिर्भूरिदक्षिणैः ए
तैर्भिराजर्षयःपुण्याःकीर्तिमंतोबहुश्रुताः तस्यांसभायांराजर्षेवैवस्वतमुपासते अगस्त्योथमतंगश्चकालोमृत्यु
स्तथैवच यज्वानश्चैवसिद्धाश्चयेचयोगशरीरिणः अग्निष्वात्ताश्चपितरःसामपाश्चोष्मपाश्चये स्वधावंतोबर्हिषदोमू
र्तिमंतस्तथापरे कालचक्रंचसाक्षाच्चभगवान्हव्यवाहनः नरादुष्कृतकर्माणोदक्षिणायनमृत्यवः कालस्यनयने
युक्तायमस्यपुरुषाश्चये तस्यांशिंशपपालाशास्तथाकाशकुशादयः उपासतेधर्मराजंमूर्तिमंतोजनाधिपः एव

सभा० ११

चान्येचबहवःपितृलोकसभासदः नशक्याःपरिसंख्यातुंनामभिःकर्मभिस्तथा असंबाधाहिसापार्थरम्याकाम
गमासभा दीर्घकालंतपस्तप्त्वानिर्मिताविश्वकर्मणा ज्वलंतीभासमानाचतेजसास्वेनभारत तामुग्रतपसोयांतिसु
व्रताःसत्यवादिनः शांताःसंन्यासिनःसिद्धाःपूताःपुण्येनकर्मणा सर्वभास्वरदेहाश्चसर्वेचविरजोंबराः चित्रांगदाश्चित्र
माल्याःसर्वेज्वलितकुंडलाः सुकृतैःकर्मभिःपुण्यैःपरिबर्हैश्चभूषिताः गंधर्वाश्चमहात्मानःसंघशश्चाप्सरोगणाः वादि
त्रंनृत्यगीतंहास्यंलास्यंचसर्वशः पुण्याश्चगंधाःशब्दाश्चतस्यांपार्थसमंततः दिव्यानिचैवमाल्यानिउपतिष्ठंति
नित्यशः शतंशतसहस्राणिधर्मिणांतंप्रजेश्वरं उपासतेमहात्मानंरूपयुक्तामनस्विनः ईदृशीसासभाराजन्पि
तृराज्ञोमहात्मनः वरुणस्यापिवक्ष्यामिसभांपुष्करमालिनीं इतिसभापर्वणिसभावर्णनं ८ नारदः
युधिष्ठिरसभादिव्यावरुणस्यापितत्प्रभा प्रमाणेयथायाम्यायाःशुभ्रप्राकारतोरणा अंतःसलिलमास्थायविहिता ल० १
विश्वकर्मणा दिव्यरत्नमयैर्वृक्षैःफलपुष्पप्रदैर्युता नीलपीतासितश्यामैःसितैर्लोहितकैरपि अवतानैस्तथागुल्मै
र्मंजरीजालधारिभिः तथाशकुनयस्तस्यांविचित्रामधुरस्वराः अनिर्देश्यावपुष्मंतःशतशोथसहस्रशः सासभासु
सुखसंस्पर्शानशीतानचघर्मदा वेश्मासनवतीरम्यासितावरुणपालिता यस्यामास्तेसवरुणोवारुण्याचसम श्रीः
न्वितः दिव्यरत्नांबरधरोदिव्याभरणभूषितः स्रग्विणोदिव्यगंधाश्चदिव्यगंधानुलेपनाः आदित्यास्तत्रवरुणंजलेश्व ११
रमुपासते वासुकिस्तक्षकश्चैवनागश्चैरावतस्तथा कृष्णश्चलोहितश्चैवपद्मश्चित्रश्चवीर्यवान् कंबलाश्वतरौनागौ
त्या २

कुंडधारश्चकर्कोटकधनंजयौ पाणिमा २

धृतराष्ट्रबलाहकौ मणिमान्कुंडु...श्चबलवान्पृथिवीपते प्रह्लादोमूषिकादश्चतथैवजनमेजयः पताकिनोमंडलिनःफण
वंतश्चसर्वशः एतेचान्येचबहवःसर्पायुधिष्ठिर उपासतेमहात्मानंवरुणंविगतक्लमाः बलिर्वैरोचनोराजानरकःपृथिवी
जयः प्रह्लादोविप्रचित्तिश्चकालकंजाश्चदानवाः सुहनुर्दुर्मुखःशंखःसुनामासमनिस्वनः घटोदरोमहापार्श्वःक्रथनः
पिठरस्तथा विश्वरूपःसरूपश्चविरूपाथमहाशिराः दशग्रीवश्चवालीचमेघवासादशावरः टिट्टिभोविटभूतश्चसंह्रा
दश्चेंद्रतापनः दैत्यदानवसंघाश्चसर्वेरुचिरकुंडलाः स्रग्विणोमौलिनश्चैवतथादिव्यपरिच्छदाः सर्वेलब्धवराःशूराः
सर्वेविगतमृत्यवः तेतस्यांवरुणंदेवंधर्मपाशधरंसदा उपासतेमहात्मानंसर्वेसुचरितव्रताः तथासमुद्राश्चत्वारोन
दीभागीरथीचसा कालिंदीविदिशावेणानर्मदावेगवाहिनी विपाशाचशतद्रुश्चचंद्रभागासरस्वती इरावतीवितस्ताचसिंधु
र्देवनदीतथा गोदावरीकृष्णवेणानर्मदावेगवाहिनी विपाशाचशतद्रुश्चकावेरीचसरिद्वरा किंपुनाचविशल्याचतथावैतर
णीनदी तृतीयाज्येष्ठिकाचैवशोणश्चापिमहानदः चर्मण्वतीतथाचैवपर्णाशाचमहानदी शरयूर्वारवत्याचलांगली
चसरिद्वरा एताश्चान्याश्चराजेंद्रसुतीर्थालोकविश्रुताः सरितःसर्वतश्चान्यास्तीर्थानिचसरांसिच कूपाश्चसप्रस्रवणा
देहवंतोयुधिष्ठिर पल्वलानितडागानिदेहवंत्यथभारत दिशस्तथामहीचैवतथासर्वेमहीधराः उपासतेमहात्मानंसर्वे
जलचरास्तथा गीतवादित्रवंतश्चगंधर्वाप्सरसांगणाः स्तुवंतोवरुणंतस्यांसर्वएवसमासते महीधरारत्नवंतोरसायां
यप्रतिष्ठिताः कथयंतःसुमधुराःकथास्तत्रसमासते वरुणस्यतथामंत्रीसुनाभःपर्युपासते पुत्रपौत्रैःपरिवृतोगोना
स्य २

सभा० ब्रह्मा पुष्करेण च सर्वे विग्रहवंतस्ते तमीश्वरमुपासते एषा मया सभा तात वारुणी भरतर्षभ दृष्टपूर्वा सभा रम्या कुबेरस्य सभां
१२ शृणु इति सभापर्वणि वरुणसभावर्णनं ९ नारदः सभा वैश्रवणी राजन्शतयोजनमायता विस्तीर्णा सप्त
तिश्चैव योजनानि सितप्रभा तपसा निर्मिता राजन्स्वयं वैश्रवणेन सा शशिप्रभा खेचरी सा कैलासशिखरोपमा गुह्य
श्लो४ कैरुह्यमाना सा खे विषक्तेव शोभते दिव्या हेममयैरुच्चैः प्रासादैरुपशोभिता महारत्नवती चित्रा दिव्यगंधा मनोरमा
भाग सिताभ्रशिखराकारा प्लवमानेव दृश्यते दिव्या हेममयैरंगैर्विद्युद्भिरिव चित्रिता तस्यां वैश्रवणो राजा विचित्राभर
णांबरः स्त्रीसहस्रैर्वृतः श्रीमानास्ते ज्वलितकुंडलः दिवाकरनिभे पुण्ये दिव्यास्तरणसंवृते दिव्यपादोपधाने च निष धानि६
ण्णः परमासने मंदाराणामुदाराणां वनानि परिलोडयन् सौगंधिकवनानां च गंधं गंधवहो वहन् नलिन्याश्चालकाख्या
या नंदनस्य वनस्य च शीतो हृदयसंह्लादी वायुस्तमुपसेवते तत्र देवाः सगंधर्वा गणैरप्सरसां वृताः दिव्यतानैर्महाराज गा
यंतिस्म सभासते मिश्रकेशी च रंभा च चित्रसेना शुचिस्मिता चारुनेत्रा घृताची च मेनका पुंजिकस्थला विश्वाची सहज
८ न्या च प्रम्लोचा उर्वशी इरा वर्गा च सौरभेयी च समीची बुद्बुदा लता एताः सहस्रशश्चान्या नृत्यगीतविशारदाः उपतिष्ठं
ति धनदं गंधर्वाप्सरसां गणाः अनिशं दिव्यवादित्रैर्नृत्यगीतैश्च सा सभा अशून्या रुचिरा भाति गंधर्वाप्सरसां गणैः श्लो:
किन्नरा नाम गंधर्वा नरा नाम तथापरे मणिभद्रोथ धनदः श्वेतभद्रश्च गुह्यकः कशेरको गंडकंडुः प्रद्योतश्च महाबलः कुस्तुं १२
बरुः पिशाचश्च गजकर्णो विशालकः वराहकर्णस्ताम्रोष्ठः फलकक्षः फलोदकः हंसचूडः शिखावर्तो हेमनेत्रो विभीषणः

पुष्पाननः पिंगलकः शोणितोदः प्रवालकः वृक्षवास्यनिकेतश्च चीरवासाश्च भारत एते चान्ये च बहवो यक्षाः शतसहस्रशः सदा भगव
ती लक्ष्मीस्तत्रैव नलकूबरः अहं च बहुशस्तस्यां भवंत्यन्ये च मद्विधाः ब्रह्मर्षयो भवंत्यत्र तथा देवर्षयोपरे क्रव्यादाश्च तथैवान्ये
गंधर्वाश्च महाबलाः उपासते महात्मानं तस्यां धनदमीश्वरं भगवान्भूतसंघैश्च वृतः शतसहस्रशः उमापतिः पशुपतिः शूल
धृग्भगनेत्रहा त्र्यंबको राजशार्दूल देवी च विगतक्लमा वामनैर्विकटैः कुब्जैः क्षतजाक्षैर्महारवैः मेदोमांसाशनैरुग्रैरुग्रधन्वा महा
बलः नानाप्रहरणैरुग्रैर्वातैरिव महाजवैः वृतः सखायमन्वास्ते सदैव धनदं नृप प्रहृष्टाः शतशश्चान्ये बहुशः सपरिच्छदाः
गंधर्वाणां च पतयो विश्वावसुर्हाहाहूहूः तुंबरुः पर्वतश्चैव शैलूषश्च तथापरः चित्रसेनश्च गीतज्ञस्तथा चित्ररथोपि च
एते चान्ये च गंधर्वा धनेश्वरमुपासते विद्याधराधिपश्चैव चक्रधर्मा सहानुजैः उपाचरंति तत्र स्म धनानामीश्वरं प्र
भुं किन्नराः शतशस्तत्र धनानामीश्वरं प्रभुं आसते चापि राजानो भगदत्तपुरोगमाः द्रुमः किंपुरुषेशश्च उपास्ते धनदेश्व
रं राक्षसाधिपतिश्चैव महेंद्रो गंधमादनः सहयक्षैः सगंधर्वैः सह सर्वैर्निशाचरैः विभीषणश्च धर्मिष्ठ उपास्ते भ्रात
रं प्रभुं हिमवान्पारियात्रश्च विंध्यकैलासमंदराः मलयो दर्दुरश्चैव महेंद्रो गंधमादनः इंद्रनीलः सुनाभश्च तथा दिव्यौ च
च पर्वतौ एते चान्ये च बहवः सर्वे मेरुपुरोगमाः उपासते महात्मानं धनानामीश्वरं प्रभुं नंदीश्वरश्च भगवान्महाकालस्त
थैव च शंकुकर्णमुखाः सर्वे दिव्याः पारिषदस्तथा काष्ठकूटी मुखो दंती विजयश्च तपाधिकः श्वेतश्च वृषभस्तत्र नर्दन्ना
स्ते महाबलः धनदं राक्षसाश्चान्ये पिशाचाश्च उपासते पारिषदैः परिवृतमुमापतिमहेश्वरं सदा हि देवदेवेशं त्रैलोक्यस्य भा

सभा० वनं प्रणम्य मूर्ध्ना पौलस्त्यो बहुरूपमुमापतिं ततोभ्यनुज्ञां संप्राप्य महादेवाद्धनेश्वरः आस्ते कदाचिद्भगवान्भवो धन
१३ पतेः सखा निधिप्रवरमुख्यौ च शंखपद्मौ धनेश्वरौ सर्वान्निधीन्प्रगृह्याथ उपास्तां वै धनेश्वरं सा सभा तादृशी रम्या मया
दृष्टांतरिक्षगा पितामहसभां राजन्कीर्तयिष्ये निबोध तां इति सभापर्वणि धनदसभावर्णनं १० नारदः
पितामहसभां तात कथ्यमानां निबोध मे शक्यते या न निर्देष्टुमेवंरूपेति भारत पुरा देवयुगे राजन्नादित्यो भगवान्दिवः
आगच्छन्मानुषं लोकं दिदृक्षुर्गतक्लमः चरन्मानुषरूपेण सभां दृष्ट्वा स्वयंभुवः स तामकथयन्मह्यं दृष्ट्वा तत्त्वेन पांडव अप्र
मेयां सभां दिव्यां मानसीं भरतर्षभ अनिर्देश्यां प्रभावेन सर्वभूतमनोरमां श्रुत्वा गुणानहं तस्याः सभायाः पांडवर्षभ दर्शने
प्सुस्तथा राजन्नादित्यमिदमब्रुवं भगवन्द्रष्टुमिच्छामि पितामहसभां शुभां येन सा तपसा शक्या कर्मणा वापि गोपते औषधै
र्वा तथा युक्तैरुत्तमा पापनाशिनी तन्ममाचक्ष्व भगवन्पश्येयं तां सभां यथा स तन्मम वचः श्रुत्वा सहस्रांशुर्दिवाकरः प्रोवाच
भरतश्रेष्ठ व्रतं वर्षसहस्रिकं ब्रह्मव्रतमुपास्स्व त्वं प्रयतेनांतरात्मना ततोहं हिमवत्पृष्ठे समारब्धो महाव्रतं ततः स भगवान्सू
र्यो मामुपादाय वीर्यवान् आगच्छत्तां सभां ब्राह्मीं विपाप्मा विगतक्लमः एवंरूपेति सा शक्या न निर्देष्टुं नराधिप क्षणेन हि
बिभर्त्यन्यदनिर्देश्यं वपुस्तथा न वेद परिमाणं वा संस्थानं वापि भारत न च रूपं मया तादृग्दृष्टपूर्वं कदाचन सुसुखा सा सभा श्रीः
राजन्न शीता न च घर्मदा न क्षुत्पिपासे न ग्लानिं प्राप्य तां प्राप्नुवंत्युत नानारूपैरिव कृता मणिभिः सा सुभास्वरैः स्तंभैर्न १३
च धृता सा तु शाश्वती न च सा क्षरा दिव्यैर्नानाविधैर्भावैर्भासद्भिरमितप्रभैः अति चंद्रं च सूर्यं च शिखिनं च स्वयंप्रभा दीप्य

तेनाकपृष्ठस्था भर्त्सयंतीव भास्करं तस्यां स भगवानास्ते विदधद्देवमानुषान् स्वयमेकोनिशं राजन्सर्वलो
कपितामहः उपातिष्ठंति चाप्येनं प्रजानां पतयः प्रभुं दक्षः प्रचेताः पुलहो मरीचिः कश्यपः प्रभुः भृगुरत्रि
र्वसिष्ठश्च गौतमोथ तथांगिराः पुलस्त्यश्च क्रतुश्चैव प्रह्लादः कर्दमस्तथा अथर्वांगिरसश्चैव वालखिल्या म
रीचिपाः मनोंतरिक्षं विद्याश्च वायुस्तेजो जलं मही शब्दस्पर्शौ तथा रूपं रसो गंधश्च भारत प्रकृतिश्च विका
रश्च यच्चान्यत्कारणं भुवः अगस्त्यश्च महातेजा मार्कंडेयश्च वीर्यवान् जमदग्निर्भरद्वाजः संवर्तश्च्यवनस्तथा
दुर्वासाश्च महाभाग ऋष्यशृंगश्च धार्मिकः सनत्कुमारो भगवान्योगाचार्यो महातपाः असितो देवल
श्चैव जैगीषव्यश्च तत्त्ववित् ऋषभो जितशत्रुश्च महावीर्यस्तथा मणिः आयुर्वेदस्तथाष्टांगो देहवांस्त
त्र भारत चंद्रमाः सहनक्षत्रैरादित्यश्च गभस्तिमान् वायवः क्रतवश्चैव संकल्पः प्राण एव च मूर्तिमंतो
महात्मानो महाव्रतपरायणाः एते चान्ये च बहवो ब्रह्माणं समुपस्थिताः अर्थो धर्मश्च कामश्च हर्षो द्वेष
स्तपो दमः आयांति तस्यां सहसा गंधर्वाप्सरसां गणाः विंशतिः सप्त चैवान्ये लोकपालाश्च सर्वशः शुक्रो
बृहस्पतिश्चैव बुधोंगारक एव च शनैश्चरश्च राहुश्च ग्रहाः सर्वे तथैव च मंत्रो रथंतरं चैव हरिमान्वसुमा
नपि आदित्याः साधिराजानो नामद्वंद्वैरुदाहृताः मरुतो विश्वकर्मा च वसवश्चैव भारत तथा पितृगणाः

सभा० सर्वे सर्वाणि वहंवीषाथा॥ ऋग्वेदः सामवेदश्च यजुर्वेदश्च पांडव अथर्ववेदश्च तथा सर्वशास्त्राणि चैव ह। इतिहासोपवेदा
१५ श्च वेदांगानि च सर्वशः ग्रहा यज्ञाश्च सोमाश्च देवताश्चापि सर्वशः सावित्री दुर्गतरणी वाणी सप्तविधा तथा मेधा धृतिश्च
श्रुतिश्चैव प्रज्ञा बुद्धिर्यशः क्षमा सामानि स्तुतिशास्त्राणि गाथाश्च विविधास्तथा भाष्याणि तर्कयुक्तानि देहवंति विशांपते नाट
का विविधाः काव्याः कथाख्यायिककारिकाः तत्र तिष्ठंति ते पुण्या ये चान्ये गुरुपूजकाः क्षणा लवा मुहूर्ताश्च दिवा रात्रिस्तथैव च
अर्द्धमासाश्च मासाश्च ऋतवः षड् भारत संवत्सराः पंच युगमहोरात्रश्चतुर्विधः कालचक्रं च तद्दिव्यं नित्यमक्षयमव्ययं धर्मचक्रं
तथा चापि नित्यमास्ते युधिष्ठिर अदितिर्दितिर्दनुश्चैव सुरसा विनता इरा कालका सुरभी देवी सरमा चाथ गौतमी प्रभा कद्रू
श्च वै देव्यौ देवतानां च मातरः इंद्राणी श्रीश्च लक्ष्मी च भद्रा षष्ठी तथापरा पृथिवी गां गता देवी ह्रीः स्वाहा कीर्तिरेव च सुरा दे
वी शची चैव तथा पुष्टिररुंधती संवृत्तिराशा नियतिः सृष्टिर्देवी रतिस्तथा एताश्चान्याश्च वै देव्यो उपतस्थुः प्रजापतिं आदित्या व
सवो रुद्रा मरुतश्चाश्विनावपि विश्वेदेवाश्च साध्याश्च पितरश्च मनोजवाः पितॄणां च गणान्विद्धि सप्तैव पुरुषर्षभ मूर्तिमंतो
वै चत्वारस्त्रयश्चाप्यशरीरिणः वैराजाश्च महाभागा अग्निष्वात्ताश्च भारत गार्हपत्या नाकचराः पितरो लोकविश्रुताः सोमपा
एकशृंगाश्च चतुर्वेदाः कलास्तथा एते चतुर्षु वर्णेषु पूज्यंते पितरो नृप एतैराप्यायितैः पूर्वं सोमश्चाप्यायते पुनः तएते पितरः स श्रीः
र्वे प्रजापतिमुपस्थिताः उपासते च संहृष्टा ब्रह्माणममितौजसं राक्षसाश्च पिशाचाश्च दानवा गुह्यकास्तथा नागाः सुपर्णाः १८
पशवः पितामहमुपासते स्थावरा जंगमाश्चैव महाभूतास्तथापरे पुरंदरश्च देवेंद्रो वरुणो धनदो यमः महादेवः सहोमोत्र सदा

गच्छति सर्वशः महासेनश्च राजेंद्र सदोपास्ते पितामहं देवो नारायणस्तस्यां तथा देवर्षयश्च ये ऋषयो वालखिल्याश्च योनि
जायोनिजास्तथा यच्च किंचित्त्रिलोकेस्मिन्दृश्यते स्थाणुजंगमं सर्वं तस्यां मया दृष्टं इति विद्धि नराधिप अष्टाशीतिसहस्रा
णि ऋषीणामूर्ध्वरेतसां प्रजावतां च पंचाशदृषीणामपि पांडव ते स्म तत्र यथाकामं दृष्ट्वा सर्वे दिवौकसः प्रणम्य शिरसा
तस्मै सर्वे यांति यथागतं अतिथीनागतान्देवान्दैत्यान्नागांस्तथा द्विजान् यक्षान्सुपर्णान्कालेयान्गंधर्वाप्सरसस्तथा म
हाभागानमितधीर्ब्रह्मा लोकपितामहः दयावान्सर्वभूतेषु यथार्हं प्रतिपद्यते प्रतिगृह्य च विश्वात्मा स्वयंभूरमित
द्युतिः सांत्वमानार्थसंभोगैर्युनक्ति मनुजाधिप तथा तैरुपयातैश्च प्रतिपद्भिश्च भारत आकुला सा सभा तात भवति स्म
गण सुखप्रदा सर्वतेजोमयी दिव्या ब्रह्मर्षिगणसेविता ब्राह्म्या श्रिया दीप्यमाना शुशुभे विगतक्लमा सा सभा तादृशी दृष्टा
मया लोकेषु दुर्लभा सभेयं राजशार्दूल मनुष्येषु यथा तव एता मया दृष्टपूर्वाः सभा देवेषु भारत सभेयं मानुषे
लोके सर्वश्रेष्ठतमा तव इति सभापर्वणि ब्रह्मसभावर्णनं ११ युधिष्ठिरः प्रायशो लोकराजेंद्र त्वया कथि
ता वदतां वर वैवस्वतसभायां तु यथावद्वदसि प्रभो वरुणस्य सभायां तु नागास्ते कथिताः प्रभो दैत्येंद्राश्चापि भूयि
ष्ठाः सरितः सागरास्तथा तथा धनपतेर्यक्षा गुह्यका राक्षसास्तथा गंधर्वाप्सरसश्चैव भगवांश्च वृषध्वजः पिताम
हसभायां तु कथितास्ते महर्षयः सर्वे देवनिकायाश्च सर्वशास्त्राणि चैव ह शक्रस्य तु सभायां तु देवाः संकीर्तिता

सभा० मुने तद्देशतश्चर्गं धर्वा विविधाश्च महर्षयः एकस्तु राजर्षिर्हरिश्चंद्रो महामुने कथितस्ते सभायां वै देवेंद्रस्य म
१५ हात्मनः किं कर्म तेनाचरितं तपो वा नियतव्रत येनासौ सह शक्रेण स्पर्द्धते सुमहायशाः पितृलोकगतश्चैव त्वया वि
प्र पिता मम दृष्टः पांडुर्महाभागः कथं वापि समागतः किमुक्तवांश्च भगवंस्तन्ममाचक्ष्व सुव्रत त्वत्तः श्रोतुं सर्व
वं परं कौतूहलं हि मे नारदः यन्मां पृच्छसि राजेंद्र हरिश्चंद्रं प्रति प्रभो तत्ते हं संप्रवक्ष्यामि माहात्म्यं तस्य धी
मतः स राजा बलवानासीत्सम्राट् सर्वमहीक्षितां तस्य सर्वे महीपालाः शासनावनताः स्थिताः तेनैकं रथमास्था
य जैत्रं हेमविभूषितं शस्त्रप्रतापेन जिता द्वीपाः सप्त जनेश्वरः स निर्जित्य महीं सर्वां सशैलवनकाननां आजहा कृत्स्नां
र महाराज राजसूयं महाक्रतुं तस्य सर्वे महीपाला धनान्याजह्रुराज्ञया द्विजानां परिवेष्टारस्तस्मिन्यज्ञे च तेभवन्
प्रादाच्च द्रविणं प्रीत्या याचकानां नरेश्वरः यथोक्तवंतस्ते तस्मिंस्ततः पंचगुणाधिकं अतर्पयच्च विविधैर्वसुभिर्ब्रा
ह्मणांस्तथा प्रसर्पकाले संप्राप्ते नानादिग्भ्यः समागतान् भक्ष्यभोज्यैश्च विविधैर्यथाकामपुरस्कृतैः रत्नौ
घतर्पितैस्तुष्टैर्द्विजैश्च समुदाहृतं तेजस्वी च यशस्वी च नृपेभ्योप्यधिकोभवत् एतस्मात्कारणात्पार्थ हरि
श्चंद्रो विराजते तेभ्यो राजसहस्रेभ्यस्तद्विद्धि भरतर्षभ समाप्य च हरिश्चंद्रो महायज्ञं प्रतापवान् अभिषिक्तश्च श्री: १५
शुशुभे साम्राज्येन नराधिप ये चान्ये च महीपाला राजसूयं महाक्रतुं यजंते ते सहेंद्रेण मोदंते भरतर्षभ ये चा

पि निधनं प्राप्ताः संग्रामेष्वपलायिनः ते तत्सदनं समासाद्य श्रीमंतो भांति नित्यशः पिता च त्वाह कौंतेय पांडुः कौरवनंदनः हरिश्चं
द्रे श्रियं दृष्ट्वा नृपतौ जातविस्मयः विज्ञाय मानुषं लोकमायांतं मां नराधिप प्रोवाच प्रणतो भूत्वा वदेथास्त्वं युधिष्ठिरं समर्थोसि
महीं जेतुं भ्रातरस्ते स्थिता वशे राजसूयं क्रतुश्रेष्ठमाहरस्वेति भारत त्वयीष्टवति पुत्रे हं हरिश्चंद्रवदाशु वै मोदिष्ये बहुलाः श
श्वत्समाः शक्रस्य संसदि एवं भवतु वक्ष्येहं तव पुत्रं नराधिप भूर्लोकं यदि गच्छेयमिति पांडुमथाब्रुवं तस्य त्वं पुरुषव्या ग४
घ्र संकल्पं कुरु पांडव गंतासि त्वं महेंद्रस्य पूर्वैः सह सलोकतां बहुविघ्नश्च नृपते क्रतुरेष स्मृतो महान् छिद्राण्यत्र हि वां
छंति यज्ञघ्ना ब्रह्मराक्षसाः युद्धं च क्षत्रशमनं पृथिवीक्षयकारणं किंचिदेव निमित्तं च भवत्यत्र क्षयावहं एतत्संचिंत्य
राजेंद्र यत्क्षेमं तत्समाचर अप्रमत्तोत्थितो नित्यं चातुर्वर्ण्यस्य रक्षणे भव एधस्व मोदस्व धनैस्तर्पय च द्विजान् एतत्ते वि ९७
स्तरेणोक्तं यन्मां त्वं परिपृच्छसि आपृच्छे त्वां गमिष्यामि दाशार्हनगरीं प्रति वैशंपा० एवमाख्याय पार्थेभ्यो नारदो जनमेज
य जगामानुवृतो राजन्नृषिभिर्यैः समागतः गते तु नारदे पार्थो भ्रातृभिः सह कौरव राजसूयं क्रतुश्रेष्ठं चिंतयामास पार्थिवः
इति सभापर्वणि सभावर्णने सभाप्र० १२ वैशंपा० ऋषेस्तद्वचनं श्रुत्वा निशश्वास युधिष्ठिरः चिंतयन्राज
मे सूयेष्टिं न लेभे शर्म भारत राजर्षीणां च तं श्रुत्वा महिमानं महात्मनां यज्वनां कर्मभिः पुण्यैर्लोकप्राप्तिं समीक्ष्य च
हरिश्चंद्रं च राजर्षिं रोचमानं विशेषतः यज्वानं यज्ञमाहर्तुं राजसूयमियेष सः युधिष्ठिरस्ततः सर्वानर्चयित्वा सभास
दः प्रत्यर्चितश्च तैः सर्वैर्यज्ञायैव मनो दधे स राजसूयं राजेंद्र कुरूणामृषभस्तदा आहर्तुं प्रवणं चक्रे मनः संचिंत्य सोसकृत्

सभा० भूयश्चाद्भुतवीर्यौजा धर्ममेवानुचिंतयन् किं हितं सर्वलोकानां भवेदिति मनो दधे अनुगृह्णन्प्रजाः सर्वाः सर्वधर्मभृतांवरः
१६ अविशेषेण सर्वेषां हितं चक्रे युधिष्ठिरः सर्वेषां दीयतां देयं मुष्णन्कोपमदावुभौ साधुधर्मेति धर्मेति नान्यच्छ्रूयेत भाषितं ए
वंगते ततस्तस्मिन्पितरीवाश्वसञ्जनाः न तस्य विद्यते द्वेष्टा ततोस्याजातशत्रुता परिग्रहान्नरेंद्रस्य भीमस्य परिपालनात्
शत्रूणां क्षपणाच्चैव बीभत्सोः सव्यसाचिनः धीमतः सहदेवस्य धर्माणामनुशासनात् अविग्रहा वीतभयाः स्वकर्मनि
रताः सदा निकामवर्षाः स्फीताश्च आसञ्जनपदास्तथा वार्द्धुषी यज्ञसत्त्वानि गोरक्षा कर्षणं वणिक् विशेषात्सर्वमेवैतत्सं
जज्ञे राजकर्मणा अनुकर्षं च निष्कर्षं व्याधिपावकमूर्छनं सर्वमेव न तत्रासीद्धर्मनित्ये युधिष्ठिरे दस्युभ्यो वंचकेभ्यश्च
राज्ञः प्रतिपरस्परं राजवल्लभतश्चैव नाश्रूयत मृषाकृतं प्रियं कर्तुमुपस्थातुं बलिकर्म स्वकर्मजं अभिहर्तुं नृपाः षट्सु पृथ
ग्जात्यैश्च नैगमैः ववृधे विषयस्तत्र धर्मनित्ये युधिष्ठिरे कामतोप्युपयुंजानै राजसैर्लोभजैर्जनैः सर्वव्यापी सर्वगुणी सर्व
साहः स सर्वराट् यस्मिन्नधिकृतः सम्राड् भ्राजमानो महायशाः यत्र राजन्दश दिशः पितृतो मातृतस्तदा अनुरक्ताः प्रजा
आसन्नागोपाला द्विजातयः वैशंपा० स मंत्रिणः समानाय्य भ्रातॄंश्च वदतांवरः राजसूयं प्रति तदा पुनःपुनरपृच्छता न
ते पृच्छ्यमानाः सहिता वचोर्थ्यं मंत्रिणस्तदा युधिष्ठिरं महाप्राज्ञं यियक्षुमिदमब्रुवन् येनाभिषिक्तो नृपतिर्वारुणं गुणमृच्छति श्री:
तेन राजापि सन्कृत्स्नं सम्राड्गुणमभीप्सति तस्य सम्राड्गुणार्हस्य भवतः कुरुनंदन राजसूयस्य समयं मन्यंते सुहृदस्तव तस्य १६
यज्ञस्य समयः स्वाधीनः क्षत्रसंपदा साम्ना षडग्नयो यस्मिंश्चीयंते संशितव्रतैः दर्वीहोमानुपादाय सर्वान्यः प्राप्नुते क्रतून्

त०

राज्र

अभिषेकं च यज्ञांते सर्वजित्तेन चोच्यते समर्थोसि महाबाहो सर्वे ते वशगा वयं अचिरात्त्वं महाबाहो राजसूयमवाप्स्य
सि अविचार्य महाराज राजसूये मनः कुरु इत्येवं सुहृदः सर्वे पृथक्च सह चाब्रुवन् स धर्म्यं पांडवस्तेषां वचः श्रुत्वा विशां
पते धृष्टमिष्टं वरिष्ठं च जग्राह मनसारिहा श्रुत्वा सुहृद्वचस्तच्च जानंश्चाप्यात्मनः क्षमं पुनःपुनर्मनो दध्रे राजसूया
य भारत स भ्रातृभिः पुनर्धीमानृत्विग्भिश्च महात्मभिः मंत्रिभिश्चापि सहितो धर्मराजो युधिष्ठिरः धौम्यद्वैपा
यनाद्यैश्च मंत्रयामास मंत्रवित् युधिष्ठिरः इयं या राजसूयस्य सम्राडर्हस्य सुक्रतोः श्रद्दधानस्य वदतः स्पृ स्य
हा मे सा कथं भवेत् वैशं० एवमुक्तास्तु ते तेन राज्ञा राजीवलोचन इदमूचुर्वचः काले धर्मराजं युधिष्ठिरं अर्हस्त्वमसि
धर्मज्ञ राजसूयं महाक्रतुं अथैवमुक्ते नृपतावृत्विग्भिरृषिभिस्तथा मंत्रिणो भ्रातरश्चास्य तद्वचः प्रत्यपूजयन् स तु
राजा महाप्राज्ञः पुनरेवात्मनात्मवान् भूयो विममृशे पार्थो लोकानां हितकाम्यया सामर्थ्ययोगं संप्रेक्ष्य देशकालौ व्यया
गमौ विमृश्य सम्यक्च धिया कुर्वन्प्राज्ञो न सीदति न हि यज्ञसमारंभः केवलात्मविनिश्चयात् स निश्चयार्थं कार्यस्य
कृष्णमेव जनार्दनं सर्वलोकात्परं मत्वा जगाम मनसा हरिं अप्रमेयं महाबाहुं कामाज्जातमजं नृषु पांडवस्तर्कयामा
स कर्मभिर्देवसंमितैः नास्य किंचिदविज्ञातं नास्य किंचिदकर्मजं न स किंचिन्न विषहेदिति कृष्णममन्यत स तु तां नैष्ठि
कीं बुद्धिं कृत्वा पार्थो युधिष्ठिरः गुरुवद्भूतगुरवे प्राहिणोद्दूतमंजसा शीघ्रगेन रथेनाशु स दूतः प्राप्य यादवान् द्वारकावा

त०

सभा० सितं कृष्णं द्वारवत्यां समासदत् दर्शनाकांक्षिणं पार्थं दर्शनाकांक्षयाच्युतः इंद्रसेनेन सहित इंद्रप्रस्थमगात्तदा व्यतीत्य विवि
१७ धान्देशांस्त्वरावान्क्षिप्रवाहनः इंद्रप्रस्थगतं पार्थमभ्यगच्छज्जनार्दनः सगृहे पितृवद्भ्रात्रा धर्मराजेन पूजितः भीमेन च ततोप
श्यत्स्वसारं प्रीतिमान्पितुः प्रीतः प्रीतेन सुहृदा रेमे स सहितस्तदा अर्जुनेन यमाभ्यां च गुरुवत्पर्युपासितः तं विश्रांतं
शुभे देशे क्षणिनं कल्यमच्युतं धर्मराजः समागम्य ज्ञापयत्स्वप्रयोजनं युधिष्ठिर० प्रार्थितो राजसूयो मे न चासौ केव
लेप्सया प्राप्यते येन तत्ते हि विदितं कृष्ण सर्वशः यस्मिन्सर्वं संभवति यश्च सर्वत्र पूज्यते यश्च सर्वेश्वरो राजा राजसू
यं स विंदति तं राजसूयं सुहृदः कार्यमाहुः समेत्य मे तत्र मे निश्चिततमं तव कृष्ण गिरा भवेत् केचिद्धि सौहृदादेव न दोषं परि
चक्षते स्वार्थहेतोस्तथैवान्ये प्रियमेव वदंत्युत प्रियमेव परीप्सन्ते केचिदात्मनि यद्धितं एवंप्रायाश्च दृश्यंते जनवादाः प्रयो
जने त्वं तु हेतूनतीत्यैतान्कामक्रोधौ व्युदस्य च परमं यत्क्षमं लोके यथावद्वक्तुमर्हसि इति सभापर्वणि वासुदेवागमनं
१३ कृष्ण उवाच सर्वैर्गुणैर्महाराज राजसूयं त्वमर्हसि जानतस्त्वेव ते सर्वं किंचिद्वक्ष्यामि भारत जामदग्न्येन रामेण
क्षत्रं यदवशेषितं तस्मादवरजं लोके यदिदं क्षत्रसंज्ञितं कृतोयं कुलसंकल्पः क्षत्रियैर्वसुधाधिप निदेशवाग्भिस्त
त्ते ह विदितं भरतर्षभ ऐलस्येक्ष्वाकुवंशस्य प्रकृतिं परिचक्षते राजानः श्रेणिबद्धाश्च तथान्ये क्षत्रिया भुवि ऐलवंश्याश्च ये रा
जंस्तथैवेक्ष्वाकवो नृपाः तानि चैकशतं विद्धि कुलानि भरतर्षभ ययातेस्त्वेव भोजानां विस्तरो गुणतो महान् भजतेद्य श्रीः १७

श्रीर

श्री

महाराज विस्तरः स चतुर्दिशं तेषां तथैव तां लक्ष्मीं सर्वक्षत्रमुपासते इदानीमेव वै राजञ्जरासंधो महीपतिः अभिभूय श्रियं तेषां
कुलानामभिषेचितः स्थितो मूर्ध्नि नरेंद्राणामोजसाक्रम्य सर्वशः सोवनीं मध्यमां भुक्त्वा मिथो भेदममन्यत प्रभुर्यस्तु परो रा
जा यस्मिन्नेकवशी जगत् स साम्राज्यं महाराज प्राप्तो भवति योगतः तं स राजा जरासंधं संश्रित्य किल सर्वशः राजन्सेनापतिर्जा
तः शिशुपालः प्रतापवान् तमेव च महाराज शिष्यवत्समुपस्थितः वक्रः करूषाधिपतिर्मायायोधी महाबलः अपरौ च महा
वीर्यौ महात्मानौ समाश्रितौ जरासंधं महावीर्यं तौ हंसडिभकावुभौ दंतवक्रः करूषश्च करभो मेघवाहनः मूर्ध्ना दिव्यमणिं बि
भ्रद्यमद्भुतमणिं विदुः मुरं च नरकं चैव शास्ति यो यवनाधिपः अपर्यंतबलो राजा प्रतीच्यां वरुणो यथा भगदत्तो महाराज वृद्ध
स्तव पितुः सखा स वाचा प्रणतस्तस्य कर्मणा च विशेषतः स्नेहबद्धश्च मनसा पितृवद्भक्तिमांस्त्वयि प्रतीच्यां दक्षिणं चांतं
पृथिव्याः पाति यो नृपः मातुलो भवतः शूरः पुरुजित्कुंतिवर्द्धनः स ते संनतिमानेकः स्नेहतः शत्रुसूदनः जरासंधं गतस्त्व
चं पुरा यो न मया हतः पुरुषोत्तमविज्ञातो योसौ चेदिषु दुर्मतिः आत्मानं प्रतिजानाति लोकेस्मिन्पुरुषोत्तमं आदत्ते सत
तं मोहाद्यः स चिह्नं च मामकं वंगपुंड्रकिरातेषु राजा बलसमन्वितः पौंड्रको वासुदेवेति योसौ लोकेषु विश्रुतः चतुर्थभाग्म
हाराज भोज इंद्रसखो बली विद्याबलाद्यो व्यजयत्स पांड्यक्रथकैशिकान् भ्राता यस्याकृतिः शूरो जामदग्न्यसमोभ
वत् स भक्तो मागधं राजा भीष्मकः परवीरहा प्रियाण्याचरितः प्रह्वान्सदा संबंधिनः सतः भजतो न भजत्यस्मा
नप्रियेषु व्यवस्थितः न कुलं न बलं राजन्नाभ्यजानात्तथात्मनः पश्यमानो यशो दीप्तं जरासंधमुपस्थितः उदीच्या

सा

सभा० स्तथाभोजाः कुलान्यष्टादशप्रभो जरासंधभयादेवप्रतीचींदिशमाश्रिताः शूरसेनाभद्रकाराबोधाःशाल्वाःपटच्चराः
१८ सुस्थलाश्चसुकुट्टाश्चकुलिंदाःकुंतिभिःसह शाल्वायनाश्चराजानःसोदर्यानुचराःसह दक्षिणायेचपांचालाःपूर्वाःकुं
तिषुकोशलाः तथोत्तरांदिशंचापिपरित्यज्यभयार्दिताः मत्स्याःसन्यस्तपादाश्चदक्षिणांदिशमाश्रिताः तथैवसर्वपांचाला
जरासंधभयार्दिताः स्वराज्यंसंपरित्यज्यविद्रुताःसर्वतोदिशं कस्यचित्त्वथकालस्यकंसोनिर्मथ्ययादवान् बार्हद्रथसु
तेदेव्यावुपागच्छद्वृथामतिः अस्तिःप्राप्तिश्चनाम्नातेसहदेवानुजेबले बलेनतेनसज्ञातीनभिभूयवृथामतिः श्रै
ष्ठ्यंप्राप्तःसतस्यासीदतीवापनयोमहान् भोजराजन्यवृद्धैस्तुपीड्यमानैर्दुरात्मना ज्ञातित्राणमभीप्सद्भिरस्मत्संभाव
नाकृता दत्वाक्रूरायसुतनुंतामाहुकसुतांतदा संकर्षणद्वितीयेनज्ञातिकार्यंमयाकृतं हतौकंससुनामानौमया
रामेणचाप्युत भयेतुसमतिक्रांतेजरासंधेसमुद्यते मंत्रोयंमंत्रितोराजन्कुलैरष्टादशावरैः अनारमंतोनिघ्नंतोम
हास्त्रैःशतघातिभिः नहन्यामवयंतस्यत्रिभिर्वर्षशतैर्बलं तस्यह्यमरसंकाशौबलेनबलिनांवरौ नामभ्यांहंसडि
भकावशस्त्रनिधनावुभौ तावुभौसहितौवीरौजरासंधश्चवीर्यवान् त्रयस्त्रयाणांलोकानांपर्याप्ताइतिमेमतिः
ल नहिकेवलमस्माकंयावंतोन्येचपार्थिवाः तथैवतत्रासीद्बुद्धिबुद्धिमतांवर अथहंसइतिख्यातःकश्चिदासीन्महान्नृ श्री:
प रामेणसहितस्तत्रसंग्रामेष्टादशावरे हतोहंसइतिप्रोक्तमथकेनापिभारत तच्छ्रुत्वाडिंभकोराजन्यमुनांभस्यम १८
ज्जत विनाहंसेनलोकेस्मिन्नाहंजीवितुमुत्सहे इत्येतांमतिमास्थायडिंभकोनिधनंगतः तथातुडिंभकंश्रुत्वाहंसःप

मा

जा

रपुरंजयः प्रपेदेयमुनामेवसोपितस्यांन्यमज्जत तौसराजाजरासंधःश्रुत्वाचनिधनंगतौ पुरंशून्येनमनसाप्रययौभरतर्ष
भ ततोवयममित्रघ्नतस्मिन्प्रतिगतेनृप पुनरानंदिनःसर्वेमथुरायांवसामहे यदात्वभ्येत्यपितरंसावैराजीवलोचना
कंसभार्याजरासंधंदुहितामागधंनृपं चोदयत्येवराजेंद्रपतिव्यसनदुःखिता पतिघ्नंमेजहीत्येवंपुनःपुनररिंदम ततोवयं
महाराजतंमंत्रंपूर्वमंत्रितं संस्मरंतोविमनसोव्यपयातानराधिप पृथक्त्वेनमहाराजसंक्षिप्यमहतींश्रियं पलाया
मोभयात्तस्यससुतज्ञातिबांधवाः इतिसंचिंत्यसर्वेस्मप्रतीचींदिशमाश्रिताः कुशस्थलींपुरींरम्यांरैवतेनोपशोभि
तां ततोनिवेशंतस्यांचकृतवंतोवयंनृप तथैवदुर्गसंस्कारंदेवैरपिदुरासदं स्त्रियोपियस्यांयुध्येयुःकिंपुनर्वृष्णि
महारथाः तस्यांवयममित्रघ्ननिवसामोकुतोभयाः आलोक्यगिरिमुख्यंतंमागधंतीर्णमेवच माधवाःकुरुशार्दू
लपरांमुदमवाप्नुवन् एवंवयंजरासंधादितःकृतकिल्बिषाः सामर्थ्यवंतःसंबंधाद्भवंतंसमुपाश्रिताः त्रियोजनाय
तंसद्मत्रिस्कंधंयोजनादधि योजनांतेशतद्वारंवीरविक्रमतोरणं अष्टादशावरैर्नद्धंक्षत्रियैर्युद्धदुर्मदैः अष्टादशस
हस्राणिभ्रातॄणांसंतिनःकुले आहुकस्यशतंपुत्राएकैकस्त्रिशतावरः चारुदेष्णःसहभ्रात्राचक्रदेवोथसात्य
किः अहंचरौहिणेयश्चसांबःसौरिःशनोयुधि एवमेतेरथाःसप्तराजन्नन्यान्निबोधमे कृतवर्माअनाधृष्टिः
समीकःसमितिंजयः कंकःशंकुश्चकुंतिश्चसप्तैतेवैमहारथाः पुत्रौचांधकभोजस्यवृद्धोराजाचतेदश वज्रसंहनना
वीरावीर्यवंतोमहारथाः स्मरंतोमध्यमंदेशंवृष्णिमध्यगताःस्थिताः सत्वंसम्राड्गुणैर्युक्तःसदाभरतसत्तम क्षत्रेसं

सभा० १७ माज्ञमात्मानंकर्तुंभारत ननु शक्यंजरासंधेजीवमानेमहाबले राजसूयंत्वयावाप्तुमेषाराजन्मतिर्मम तेनरुद्धाहिराजा
नःसर्वेजित्वागिरिव्रजे कंदरेपर्वतेंद्रस्यसिंहेनेवमहाद्विपाः सहियज्ञाजरासंधोयियक्षुर्वसुधाधिपः महादेवंमहात्मानमु
मापतिमरिंदम आराध्यतपसोग्रेण निर्जितास्तेनपार्थिवाः प्रतिज्ञायाश्चपारंसगतःपार्थिवसत्तम सहिनिर्जित्यनिर्जित्य
पार्थिवान्पृतनागतान् पुरमानीयबध्वाचचकारपुरुषव्रजं वयंचैवमहाराजजरासंधभयात्तदा मथुरांसंपरित्यज्यगता
द्वारवतींपुरीं यदित्वेनंमहाराजयज्ञंप्राप्तुमभीप्ससि यतस्वतेषांमोक्षायजरासंधवधायच समारंभोनशक्योय
मन्यथाकुरुनंदन राजसूयस्यकार्त्स्न्येनकर्तुंमतिमतांवर इत्येषामेमतीराजन्यथावामन्यसेनघ एवंगतेममाचक्ष्वस्वयंनि
श्चित्यहेतुभिः इतिसभापर्वणि १४ युधिष्ठिर० उक्तंत्वयाबुद्धिमतायन्नान्योवक्तुमर्हति संशयानांहिनिर्मो
क्तात्वन्नान्योविद्यतेभुवि गृहेगृहेहिराजानःस्वस्यस्वस्यप्रियंकराः नचसाम्राज्यमाप्तास्तेसम्राट्शब्दोहिकृत्स्नभाक् कथंप
रानुभावज्ञःस्वंप्रशंसितुमर्हति परेणसमवेतस्तुयःप्रशस्यःसपूज्यते विशालांबहुलांभूमिंबहुरत्नसमाचितां
दूरंगत्वाविजानातिश्रेयोवृष्णिकुलोद्वह शममेवपरंमन्येशमात्क्षेमंभवेन्मम आरंभेपारमेष्ठ्यंतुनप्राप्यमितिमेमतिः
एवमेतेहिजानंतिकुलेजातामनस्विनः कश्चित्कदाचिदेतेषांभवेच्छ्रेष्ठोजनार्दन वयंचैवमहाभागजरासंधभयात्तदा श्रीः
शंकिताःस्ममहाभागदौरात्म्याच्चतस्यचानघ अहंहितवदुर्धर्षभुजवीर्याश्रयःप्रभो नात्मानंबलिनंमन्येत्वयि १७
तस्माद्विशंकिते त्वत्सकाशाच्चरामाच्चभीमसेनाच्चमाधव अर्जुनाद्वामहाबाहोहंतुंशक्योनवेतिवै एवंजानन्हिवा

र्ष्णेयविमृशामिपुनःपुनः त्वंमेप्रमाणभूतोसिसर्वकार्येषुकेशव तच्छ्रुत्वाचाब्रवीद्भीमोवाक्यंवाक्यविशारदः भीम०
अनारंभपरोराजावल्मीकइवसीदति दुर्बलश्चानुपायेनबलिनंयोधिगच्छति अतंद्रितश्चप्रायेणदुर्बलोबलिनंरिपुं ज
येत्सम्यक्प्रयोगेण नीत्यार्थानात्मनोहितान् कृष्णेनयोमयिबलंजयःपार्थेधनंजये मागधंसाधयिष्यामइष्टिंत्रयइ
वाग्नयः कृष्ण० अर्थान्नारभतेबालोनानुबंधमवेक्षते तस्मादरिंनमृष्यंतिबालमर्थपरायणं जित्वाजय्यान्यौ
वनाश्वःपालनाच्चभगीरथः कार्तवीर्यस्तपोवीर्याद्बलात्तुभरतोविभुः ऋद्ध्यामरुत्तस्तान्पंचसम्राजइतिशुश्रुमः सा
म्राज्यमिच्छतस्तेतुसर्वाकारंयुधिष्ठिर निग्राह्यलक्षणंप्राप्तिर्धर्मार्थनयलक्षणैः बार्हद्रथोजरासंधस्तद्विद्धिभरतर्षभ
नचैनमनुरुध्यंतेकुलान्येकशतंनृपाः तस्मादेतद्बलादेवसाम्राज्यंकुरुतेह्यसः रत्नभाजोहिराजानोजरासंधमुपासते
नचतुष्यतितेनापिबाल्यादनयमास्थितः मूर्द्धाभिषिक्तंनृपतिंप्रधानपुरुषंबलात् आदत्तेनचनोदृष्टोभागःपुरुषतः
क्वचित् एवंसर्वान्वशेचक्रेजरासंधःप्रतापवान् तंदुर्बलतरोराजाकथंपार्थउपैष्यति प्रोक्षितानांप्रमृष्टानांराज्ञांपशुप
तेर्गृहे पशूनामिवकाप्रीतिर्जीवितेभरतर्षभ क्षत्रियःशस्त्रमरणोयदाभवतिसत्कृतः ततःस्ममागधंसंख्येप्रतिबाधे
मयद्वयं षडशीतिःसमानीताःशेषाराजंश्चतुर्दश जरासंधेनराजानस्ततःक्रूरंप्रवत्स्यते प्राप्नुयात्सयशोदीप्तंतत्रयोविघ्न
माचरेत् जयेद्यश्चजरासंधंसम्राण्नियतंभवेत् इतिसभापर्वणि १५ युधिष्ठिर० सम्राड्गुणमभीप्सन्वैयुष्मा
न्स्वार्थपरायणः कथंप्रहिणुयांकृष्णसोहंकेवलसाहसात् भीमार्जुनावुभौनेत्रेमनोमन्येजनार्दनं मनश्चक्षुर्विहीन

सभा० स्पकीर्त्यांजीवितंभवेत् जरासंधबलंप्राप्यदुःपारंभीमविक्रमं यमोपिमविताजौतत्रवः किंविशेषितं (वै) अस्मिंस्त्व
२० र्थीतरप्युत्तमनर्थःप्रतिपद्यते तस्मान्नप्रतिपत्तिस्तु कार्यायुक्तामतामम यथाहंविमृशाम्येकस्तावत्श्रूयतांमम संन्यासं
रोचयेसाधुकार्यस्यास्यजनार्दन प्रतिहंतिमनोमेद्यराजसूयोदुराहरः वैशंपा० पार्थःप्राप्यधनुःश्रेष्ठमक्षय्यौचम
हेषुधी रथंध्वजंसभांचैवयुधिष्ठिरमभाषत धनुःशस्त्रंशरावीर्यंपक्षोभूमिर्यशोबलं प्राप्तमेतन्मयाराजन्दुः
प्रापंयदभीप्सितं कुलेजन्मप्रशंसंतिवैद्याःसाधुसुनिष्ठिताः बलेनसदृशंनास्तिवीर्यंतुममरोचते कृतवीर्यकुलेजन्मि
जातोनिर्वीर्यःकिंकरिष्यति निर्वीर्येतुकुलेजातोवीर्यवांस्तुविशिष्यते क्षत्रियःसर्वशोराजन्यस्यवृत्तिर्द्विषज्जये
सर्वैर्गुणैर्विहीनोपिवीर्यवान्हितरेद्रिपून् सर्वैरपिगुणैर्युक्तोनिर्वीर्यःकिंकरिष्यति गुणभूतागुणाःसर्वेतिष्ठंति
हिपराक्रमे जयस्यहेतुःसिद्धिर्हिकर्मदैवंचसंश्रितं संयुक्तोहिबलैःकश्चित्प्रमादान्नोपयुज्यते तेनद्वारेणशत्रुभ्यः
क्षीयतेसबलोरिपुः दैन्यंयथाबलवतितथामोहोबलान्विते तावुभौनाशकौहेतुराज्ञात्याज्योजयार्थिना जरासंध
विनाशंचराज्ञांचपरिमोक्षणं यदिकुर्यामयज्ञार्थंकिंततःपरमंभवेत् अनारंभेहिनियतोभवेद्गुणनिश्चयः
२१ गुणानिःसंशयाराजन्नैर्गुण्यंमन्यसेकथं कषायंसुलभंपश्चान्मुनीनांशममिच्छतां साम्राज्यंतुतवेच्छंतोवयंयोत्स्या श्रीः
महेपरान् इतिसभापर्वणिजरासंधवधे १६ वासुदेव० जातस्यभारतेवंशेतथाकुंत्याःसुतस्यच यावयुक्ता २०
मतिःसेयमर्जुनेनप्रदर्शिता नमृत्योःसमयंविद्मोरात्रौवायदिवादिवा नचापिकंचिदमरमयुद्धेनानुशुश्रुम:

एतावदेवपुरुषैःकार्यंहृदयतोषणं नयेनविधिदृष्टेनयदुपक्रमतेपरान् सुनयस्यानपायस्यसंयोगेपरमःक्रमः सं
गत्याजायतेसाम्यंसाम्यंचनस्तवद्वयोः तेवयंनयमास्थायशत्रुदेहसमीपगाः कथमंतंनगच्छेमवृक्षस्येवनदीरयाः पर
रंध्रेपराक्रांताःस्वरंध्रावरणेस्थिताः व्यूढानीकैरतिबलैर्नयुध्येदरिभिःसह बुद्धिमन्तांनीतिरसन्ममापीहराघवेत अ बुद्धि
नवद्याह्यसंबुधाःप्रविष्टाःशत्रुसद्मतत् शत्रुदेहंसमुत्क्रम्यतंकामंप्राप्नुयामहे एकोह्येवश्रियंनित्यंबिभर्तिपुरु
षर्षभ अंतरात्मेवभूतानांतत्क्षयंनवकल्पये अथचैनंनिहत्याजौशेषेणापिसमाहताः प्राप्नुयामततःस्वर्गं
ज्ञातित्राणपरायणाः युधिष्ठिर० कृष्णकोयंजरासंधःकिंवीर्यःकिंपराक्रमः यस्त्वास्पृष्ट्वाग्निसदृशंनदग्धःश
लभोयथा कृष्ण उ० शृणुराजन्जरासंधोयद्वीर्योयत्पराक्रमः यथाचोपेक्षितोस्माभिर्बहुशःकृतविप्रियः अ
क्षौहिणीनांतिसृणामासीत्समरदर्पितः राजाबृहद्रथोनाममगधाधिपतिःपतिः रूपवान्वीर्यसंपन्नःश्रीमान
तुलविक्रमः नित्यंदीक्षांकिततनुःशतक्रतुरिवापरः तेजसासूर्यसंकाशःक्षमयापृथिवीसमः यमांतकसमः
क्रोधेश्रियावैश्रवणोपमः तस्याभिजनसंयुक्तैर्गुणैर्भरतसत्तम व्याप्तेयंपृथिवीसर्वासूर्यस्येवगभस्तिभिः
सकाशिपइत्येवंपत्नीभ्यांसन्निधौतदा सताभ्यांशुशुभेराजापत्नीभ्यांवसुधाधिप श्रियाभ्यामनुरूपाभ्यांकरे
णुभ्यामिवद्विपः तयोर्मध्यगतश्चापिरराजवसुधाधिपः गंगायमुनयोर्मध्येमूर्तिमानिवसागरः विषयेषु

काशिराजस्यसुतेयमजेभरतर्षभ उपयेमेमहावीर्योरूपद्रविणसंयुते तयोश्चकारसमयंमिथःसपुरुषर्षभः नातिव २

स्या जा

सभा० मिमग्नस्य तस्य यौवनमभ्यगात् न च वंशधरः पुत्रस्तस्याजायत कश्चन मंगलैर्विविधैर्होमैः पुत्रकामाभिरिष्टिभिः ना
२१ ससाद मनुष्येंद्रः सुतं कुलविवर्धनं अथ काक्षीवतः पुत्रं गोतमस्य महात्मनः सुश्राव तपसि श्रांतमुदारं चंडकौशिकं
यदृच्छयागतं तं तु वृक्षमूलमुपाश्रितं पत्नीभ्यां सहितो राजा सर्वरत्नैरतोषयत् तमब्रवीत्सत्यधृतिः सत्यवागृ
षिसत्तमः परितुष्टोस्मि राजेंद्र वरं वरय सुव्रत ततः सभार्यः प्रणतस्तमुवाच बृहद्रथः पुत्रदर्शननैराश्याद्बाष्पगद्
गदया गिरा राजोवाच भगवन्राज्यमुत्सृज्य प्रस्थितोहं तपोवनं किं वरेणाल्पभाग्यस्य किं राज्येनाप्रजस्य मे
कृष्ण० एतच्छ्रुत्वा मुनिर्ध्यानमगमत्क्षुभितेंद्रियः तस्यैव चाम्रवृक्षस्य छायायां समुपाविशत् तस्योपविष्टस्य मु
नेरुत्संगे निपपात ह अवातमशुकादष्टमेकमाम्रफलं किल तत्प्रगृह्य मुनिश्रेष्ठो हृदयेनाभिमंत्र्य च राज्ञे द
दावप्रतिमं पुत्रसंप्राप्तिकारणं उवाच च महाप्राज्ञस्तं राजानं महामुनिः गच्छ राजन्कृतार्थोसि निवर्त नराधि स्व
प एतच्छ्रुत्वा मुनेर्वाक्यं शिरसाभिप्रणिपत्य च मुनेः पादौ महाप्राज्ञः स नृपः स्वगृहं गतः तथा समयमाज्ञाय तदा
स नृपसत्तमः द्वाभ्यामेकं फलं प्रादात्पत्नीभ्यां भरतर्षभ ते तदाम्रं द्विधा कृत्वा भक्षयामासतुः शुभे भावित्वा
दपि चार्थस्य सत्यवाक्यतया मुनेः तयोः समभवद्गर्भः फलप्राशनसंभवः ते च दृष्ट्वा स नृपतिः परां मुदमवाप
ग ह अथ काले महाप्राज्ञ यथासमयमागते प्रजायेतामुभे राजन्शरीरशकले तदा एकाक्षिबाहुचरणे अर्धोदर श्रीः
मुखस्फिचे दृष्ट्वा शरीरशकले प्रवेपतुरुभे भृशं उद्विग्ने सह संमंत्र्य ते भगिन्यौ तदाबले सजीवे प्राणशकले २२

त्य तत्रं जातेतिदुःखिते तयोर्धात्र्यौ सुसंवीते तत्कृत्वा गर्भसंप्लवे निर्गम्यांतःपुरद्वारात्समुत्सृज्याभिजग्मतुः ते च कुष्
पथे निक्षिप्ते जरा नामाथ राक्षसी। जग्राह मनुजव्याघ्र मांसशोणितभोजना। कर्तुकामा सुखवहे शकले सा तु राक्षसी
संयोजयामास तदा विधानबलचोदिता। ते समानीतमात्रे तु शकले पुरुषर्षभ एकमूर्तिधरो वीरः कुमारः समपद्
यत ततः सा राक्षसी राजन्विस्मयोत्फुल्ललोचना न शशाक समुद्वोढुं वज्रसारमयं शिशुं बालस्ताम्रतलं मुष्टिं कृ
त्वा चास्ये निधाय सः प्राक्रोशदतिसंरब्धः सतोय इव तोयदः तेन शब्देन संभ्रांतः सहसांतःपुरे जनः निर्जगा
म नरव्याघ्र राज्ञा सह परंतप ते चाबले परिम्लानपयःपूर्णपयोधरे निराशे पुत्रलाभाय सहसैवाभ्यगच्छतां ते च दृष्ट्वा
तथाभूते राज्ञा नरेष्टसंततिं तं च बालं सुबलिनं चिंतयामास राक्षसी नार्हामि विषये राज्ञो वसंती पुत्रगृद्धिनः बालं ग
पुत्रमिमं हंतुं धार्मिकस्य महात्मनः सा तं बालमुपादाय मेघलेखेव भास्करं कृत्वा च मानुषं रूपमुवाच वसुधाधिपं
राक्षस्युवाच बृहद्रथ सुतस्तेयं मया दत्तः प्रगृह्यतां तव पत्नीद्वयजातो द्विजातिवरशासनात् धात्रीज
नपरित्यक्तो मयायं परिरक्षितः कृष्ण० ततस्ते भरतश्रेष्ठ काशिराजसुते शुभे तं बालमभिपत्याशु प्रस्नवैरभि
षिंचतां ततः स राजा संहृष्टः सर्वं तदुपलभ्य च अपृच्छद्धेमगर्भाभां राक्षसीं तां मराक्षसीं राजोवाच का त्वं कमल
गर्भाभे मम पुत्रप्रदायिनी कामया ब्रूहि कल्याणि देवता प्रतिभासि मे इति सभापर्वणि जरासंधोत्पत्तिः ७
राक्षस्युवाच जरा नामास्मि भद्रं ते राक्षसी कामरूपिणी। यं तव वेश्मनि राजेंद्र पूजिता न्यवसं सुखं गृहे गृहे मनु

सभा० प्राणिनां नित्यं तिष्ठति राक्षसी गृहदेवीति नाम्ना वै पुरा सृष्टा स्वयंभुवा दानवानां विनाशाय स्थापिता दिव्यरूपिणी यो मां भ-
२२ क्त्या लिखेत् कुड्ये सपुत्रां यौवनान्वितां गृहे तस्य भवेद् वृद्धिरन्यथा क्षयमाप्नुयात् त्वद्गृहे तिष्ठमानाहं पूजिताहं सदा विभो
लिखिता चैव कुड्येषु पुत्रैर्बहुभिरावृता गंधपुष्पैस्तथा धूपैर्भक्ष्यैर्भोज्यैः सुपूजिता साहं प्रत्युपकारार्थं चिंतयाम्यनिशं तव ते-
मे पुत्रशकले दृष्टवत्यस्मि धार्मिक संश्लेषिते मया दैवात् कुमारः समपद्यत तव भाग्यान्महाराज हेतुमात्रमहं त्विह मेरुं वा
खादितुं शक्ता किं पुनस्तव बालकं गृहसंपूजनात्तुष्ट्या मया प्रत्यर्पितस्तव कृष्ण उ० एवमुक्त्वा तु सा राजंस्तत्रैवांतरधीयत
स संगृह्य कुमारं तं प्रविवेश गृहं नृपः तस्य बालस्य यत्कृत्यं तच्चकार नृपस्तदा आज्ञापयच्च राक्षस्या मागधेषु महोत्सवं
तस्य नामाकरोच्चैव पितामहसमः पिता जरया संधितो यस्माज्जरासंधो भवत्वयं सोऽवर्धत महातेजा मगधाधिपतेः सु-
तः प्रमाणबलसंपन्नो हुताहुतिरिवानलः मातापित्रोर्नंदिकरः शुक्लपक्षे यथा शशी इति सभापर्वणि १८
कृष्ण उ० कस्यचित्त्वथ कालस्य पुनरेव महातपाः मगधेषूपचक्राम भगवांश्चंडकौशिकः तस्यागमनसंहृष्टः सामात्यः स-
पुरःसरः सभार्यः सह पुत्रेण निर्जगाम बृहद्रथः पाद्यार्घ्याचमनीयैस्तमर्चयामास भारत स नृपो राज्यसहितं पु-
त्रं तस्मै न्यवेदयत् प्रतिगृह्य ततः पूजां पार्थिवाद्भगवानृषिः उवाच मागधं राजन्प्रहृष्टेनांतरात्मना सर्वमेतन्मया ज्ञा- श्रीः
तं जन्म दिव्येन चक्षुषा [illegible] पुत्रस्तु शृणु राजेंद्र यादृशोऽयं भविष्यति अस्य वीर्यवतो वीर्यं नानु- २२
यास्यंति पार्थिवाः विनाशमुपयास्यंति ये चास्य परिपंथिनः देवैरपि विसृष्टानि शस्त्राण्यस्य महीपते न रुजं जनयिष्यंति

गिरेरिव नदीरयाः सर्वमूर्द्धाभिषिक्तानामेष मूर्ध्नि ज्वलिष्यति प्रभाहरोऽयं सर्वेषां ज्योतिषामिव भास्करः एनमासाद्य रा-
जानः समृद्धबलवाहनाः विनाशमुपयास्यंति शलभा इव पावकं एष श्रियः समुदिताः सर्वराज्ञां ग्रहीष्यति वर्षास्विवोदीर्ण-
जला नदीर्नदपतिर्यथा एष धारयिता सम्यक् चातुर्वर्ण्यं महाबलः शुभाशुभमिव स्फीता सर्वसस्यधरा धरा अस्याज्ञावशगाः
सर्वे भविष्यंति नराधिपाः सर्वभूतात्मभूतस्य वायोरिव शरीरिणः एष रुद्रं महादेवं त्रिपुरांतकरं हरं सर्वलोकेष्वतिबलः साक्षाद्द्र-
क्ष्यति मागधः एवं ब्रुवन्नेव मुनिः स्वकार्यमनुचिंतयन् विसर्जयामास नृपं बृहद्रथमथारिहन् प्रविश्य नगरीं चापि ज्ञातिसं-
बंधिभिर्वृतः अभिषिच्य जरासंधं मगधाधिपतिं तदा बृहद्रथो नरपतिः परां निर्वृतिमाययौ अभिषिक्ते जरासंधे तदा रा-
जा बृहद्रथः पत्नीद्वयेनानुगतस्तपोवनचरोऽभवत् ततो वनस्थे पितरि मात्रोश्चैव विशांपते जरासंधः स्ववीर्येण पार्थिवानक-
रोद्वशे वैशं० अथ दीर्घस्य कालस्य तपोवनचरो नृपः सभार्यः स्वर्गमगमत्तपस्तप्त्वा बृहद्रथः जरासंधोऽपि नृ-
पतिर्यथोक्तं कौशिकेन तत् वरप्रदानमखिलं प्राप्य राज्यमपालयत् निहते वासुदेवेन तदा कंसे महीपतौ जातो वै वैरनि-
र्बंधः कृष्णेन सह तस्य वै भ्रामयित्वा शतगुणमेकोनं येन भारत गदा क्षिप्ता बलवता मागधेन गिरिव्रजात् तिष्ठतो मथुरा-
यां वै कृष्णस्याद्भुतकर्मणः एकोनयोजनशते सा पपात गदा शुभा दृष्ट्वा पौरैस्तदा सम्यग्गदा चैव निवेदिता गदावसानं त-
त्ख्यातं मथुरायाः समीपतः तस्यास्तां हंसडिंभकावशस्त्रनिधनावुभौ मंत्रे मतिमतां श्रेष्ठौ नीतिशास्त्रविशारदौ यौ तौ
मया ते कथितौ पूर्वमेव महाबलौ त्रयस्त्रयाणां लोकानां पर्याप्ता इति मे मतिः एवमेष तदा वीर बलिभिः कुकुरांधकैः

स्पतन १

सभा० २३ दक्षिणमिच्छन्महाराजनीतिहेतोरुपेक्षिता ॥ इति सभापर्वणि १७ ॥ वासुदेव० पतितौ हंसडिभकौ कंसश्च सगणो
हतः जरासंधस्य कालोयं समुपागतः न शक्योसौ रणे जेतुं सर्वैरपि सुरासुरैः प्राणयुद्धेन जेतव्यः स इत्युपलभामहे
मयि नीतिर्बलं भीमे रक्षिता चावयोर्जयः मागधं साधयिष्याम इष्टिं त्रय इवाग्नयः त्रिभिरासादितोस्माभिर्विजने स नरा
धिपः न संदेहो यथा युद्धमेकेनाप्युपयास्यति अवमानाच्च लोभाच्च बाहुवीर्याच्च दर्पितः भीमसेनेन युद्धाय ध्रुवमप्यु
पयास्यति अलं तस्य महाबाहुर्भीमसेनो महाबलः लोकस्य समुदीर्णस्य निधनायांतको यथा यदि मे हृदयं वेत्सि
यदि ते प्रत्ययो मयि भीमसेनार्जुनौ ~~[illegible]~~ न्यासभूतौ प्रयच्छ मे ॥ वैशं० एवमुक्तो भग
वान्प्रत्युवाच युधिष्ठिरः भीमार्जुनौ समालोक्य संप्रहृष्टमुखौ स्थितौ ॥ युधिष्ठिर० अच्युताच्युत मा मैवं व्याहरामि
त्रकर्शन पांडवानां भवान्नाथो भवंतं चाश्रिता वयं यथा वदसि गोविंद सर्वं तदुपपद्यते न हि त्वमग्रतस्तेषां येषां
लक्ष्मीः पराङ्मुखी निहतश्च जरासंधो मोक्षिताश्च महीक्षितः राजसूयश्च मे लब्धो निदेशे तव तिष्ठतः क्षिप्रमेव यथा
त्वेतत्कार्यं समुपपद्यते अप्रमत्तो जगन्नाथ तथा कुरु नरोत्तम त्रिभिर्भवद्भिर्हि विना नाहं जीवितुमुत्सहे धर्मका
मार्थरहितो रोगार्त इव दुःखितः न शौरिणा विना पार्थो न शौरिः पांडवं विना नाजेयोस्त्यनयोर्लोके कृष्णयोरिति मे मतिः श्री:
अयं च बलिनां श्रेष्ठो भीमो न पिधूकोदरः युवाभ्यां सहितो वीरः किं न कुर्यान्महायशाः सुप्रणीतो बलौघो हि कुरुते २३
कार्यमनुत्तमं अंधं जलं जडं बलं प्राहुः प्रणेतव्यं विचक्षणैः यतो हि निम्नं भवति नयंति हि ततो जलं यतश्छिद्रं ततश्चापि नय

ंति धीवरा जलं तस्मान्नयविधानज्ञं पुरुषं लोकविश्रुतं वयमाश्रित्य गोविंदं यतामः कार्यसिद्धये यथाप्रज्ञानयबल
क्रियोपायसमन्वितं पुरस्कुर्वीत कार्येषु कृष्णं कार्यार्थसिद्धये एवमेव यदुश्रेष्ठं पार्थः कार्यार्थसिद्धये अर्जुनः कृष्णमन्वेतु
भीमोन्वेतु धनंजयं नयो जयो बलं चैव विक्रमे सिद्धिमेष्यति एवं प्रज्ञानयबलक्रियोपायसमन्वितं ॥ वैशंपायन०
एवमुक्तास्ततः सर्वे भ्रातरो विपुलौजसः वार्ष्णेयः पांडवेयौ च प्रतस्थुर्मागधं प्रति वर्चस्विनां ब्राह्मणानां स्नातकानां परिच्छदं
आच्छाद्य सुहृदां वाक्यैर्मनोज्ञैरभिनंदिताः अमर्षादभितप्तानां ज्ञात्यर्थं मुख्यतेजसां रविसोमाग्निवपुषां दीप्तमासीत्तदा वपुः
हतं मेने जरासंधं दृष्ट्वा भीमपुरोगमौ एककार्यसमुद्यंतौ कृष्णौ युद्धेऽपराजितौ ईशौ हि तौ महात्मानौ सर्वकार्यप्रवर्तिनौ
धर्मकामार्थलोकानां कार्याणां च प्रवर्तकौ कुरुभ्यः प्रस्थितास्ते तु मध्येन कुरुजांगलं रम्यं पद्मसरो गत्वा कालकूटमतीत्य च
गंडकीं च महाशोणं शर्करावर्तमेव च एकपर्वतके नद्यः क्रमेणैत्य व्रजंत ते उत्तीर्य शरयूं रम्यां दृष्ट्वा पूर्वांश्च कोशलान्
अतीत्य जग्मुर्मिथिलां मालां चर्मण्वतीं नदीं अतीत्य गंगां शोणं च त्रयस्ते प्राङ्मुखास्तदा कुशांबोपस्थलं जग्मुर्मागधं क्षे
त्रमच्युताः ते शश्वद्गोधनाकीर्णमंबुमंतं शुभद्रुमं गोरथं गिरिमासाद्य ददृशुर्मागधं पुरं ॥ इति सभापर्वणि २०
वासुदेव० एष पार्थ महान्भाति पशुमान्नित्यमंबुमान् निरामयः सुवेश्माढ्यो निवेशो मागधः शुभः वैहारो विपुलः शै
लो वराहो वृषभस्तथा तथा ऋषिगिरिस्तात शुभाश्चैत्यकपंचमाः एते पंच महाशृंगाः पर्वताः शीतलद्रुमाः रक्षंति
वाभिसंहत्य संहतांगा गिरिव्रजं पुष्पवेष्टितशाखाग्रैर्गंधवद्भिर्मनोहरैः निगूढा इव लोध्राणां वनैः कामिजनप्रियैः

सभा०
२५
शूद्रायांगौतमोयत्रमहात्मासंशितव्रतः औशीनर्यामजनयत्काक्षीवाद्यान्सुतान्मुनिः गौतमस्यक्षयात्तस्माद्यथासौतत्रवे
श्मनि भजतेमागधंवंशंसनृपाणामनुग्रहात् अंगवंगादयश्चैवराजानःसुमहाबलाः गौतमक्षयमभ्येत्यरमंतेस्मपुरा
र्जुन वनराजीस्तुपश्येमाःपिप्पलानांमनोरमाः लोध्राणांचशुभाःपार्थगौतमौकःसमीपजाः अर्बुदःशक्रवापीचपन्न
गौशत्रुतापनौ स्वस्तिकस्यालयश्चात्रमणिनागस्यचोत्तमः अपरिहार्यमेघानांमागधामनुनाकृताः कौशिकोमणि
मांश्चैवचक्रातेचाप्यनुग्रहं एवंप्राप्यपुरारम्यंदुराधर्षंसमंततः अर्थसिद्धिंत्वनुपमांजरासंधोभिमन्यते वयमासाद
नेतस्यदर्पमद्यहरेमहि वैशं० एवमुक्त्वाततःसर्वेभ्रातरोविपुलौजसः वार्ष्णेयःपांडवौचैवप्रतस्थुर्मागधंपुरं हृष्ट
पुष्टजनोपेतंचातुर्वर्ण्यसमाकुलं स्फीतोत्सवमनाधृष्यमासेदुश्चगिरिव्रजं ततोद्वारमनासाद्यपुरस्यगिरिमुच्छ्रितं
बार्हद्रथैःपूज्यमानं तथानगरवासिभिः यत्रमाषादमृषभमाससादबृहद्रथः तंहत्वामाषतालाभिस्तिस्रोभेरीरकार
यत स्वपुरेस्थापयामासतेनचानह्यचर्मणा यत्रताःप्राणदन्भेर्योदिव्यपुष्पावचूर्णिताः द्वारेणाभिमुखाःसर्वेययुर्नाना
युधास्तथा मागधानांसुरुचिरंचैत्यकंतंसमाद्रवन् शिरसीवसमाघ्नंतोजरासंधंजिघांसवः स्थिरंसुविपुलंशृंगंसु
महत्तत्पुरातनं अर्चितंगंधमाल्यैश्चसततंसुप्रतिष्ठितं विपुलैर्बाहुभिर्वीरास्तेभिहत्याभ्यपातयन् ततस्तेमागधं श्रीः
हृष्टाःपुरंप्रविविशुस्तदा एतस्मिन्नेवकालेतुजरासंधमदर्शयन् पर्यग्निकुर्वंश्चनृपंद्विरदस्थंपुरोहिताः स्नातकव्रति २५
नस्तेतुबाहुशस्त्रानिरायुधाः पुपुत्सवःप्रविविशुर्जरासंधेनभारत भक्ष्यमाल्यापणानांचददृशुःश्रियमुत्तमां स्फी शि

भंक्त्वाभेरीत्रयंतेपिचैत्यप्राकारमाद्रवन्

तांसर्वगुणोपेतांसर्वकामसमृद्धिनीं तांतुदृष्ट्वासमृद्धिंतेवीथ्यांतस्यांनरोत्तमाः राजमार्गेणगच्छंतःकृष्णभीमधनंजयाः बलाद्गृहीत्वा
माल्यानिमालाकारान्महाबलाः विरागवसनाःसर्वेस्रग्विणोमृष्टकुंडलाः निवेशनमथाजग्मुर्जरासंधस्यधीमतः गोवासमिववीक्षं
तःसिंहाहैमवतायथा शालस्तंभनिभास्तेषांचंदनागरुभूषिताः अशोभंतमहाराजबाहवोयुद्धशालिनां तान्दृष्ट्वाद्विरदप्र
ख्यान्शालस्कंधानिवोद्गतान् व्यूढोरस्कान्मागधानांविस्मयःसमपद्यत तेत्वतीत्यजनाकीर्णाःकक्ष्यास्तिस्रोनरर्षभाः अहंकारेणरा कृसाः
जानमुपतस्थुर्गतव्यथाः तान्पाद्यमधुपर्कार्हान्गवार्हान्सत्कृतिंगतान् प्रत्युत्थायजरासंधउपतस्थेयथाविधि उवाचचैतान्राजा
सौस्वागतंवोस्त्वितिप्रभुः मौनमासीत्तदापार्थभीमयोर्जनमेजय तेषांमध्येमहाबाहुःकृष्णोवचनमब्रवीत् वक्तुंनायातिराजें
द्रएतयोर्नियमस्थयोः अर्वाङ्निशीथात्परतस्त्वयासार्धंवदिष्यतः यज्ञागारेस्थापयित्वाराजाराजगृहंगतः ततोर्धरात्रेसंप्राप्त
यातोयत्रस्थिताद्विजाः तस्यह्येतद्व्रतंराजन्बभूवभुविविश्रुतं स्नातकान्ब्राह्मणान्प्राप्तान्श्रुत्वासमितिंजयः अप्यर्धरात्रेन
पतिःप्रत्युद्गच्छतिभारत तांस्त्वपूर्वेणवेषेणदृष्ट्वासनृपसत्तमः उपतस्थेजरासंधोविस्मितश्चाभवत्तदा तेतुदृष्ट्वैवराजानंजरा
संधंनरर्षभाः इदमूचुरमित्रघ्नाःसर्वेभरतसत्तम स्वस्त्यस्तुकुशलंराजन्नितितत्रव्यवस्थिताः तंनृपंनृपशार्दूलप्रेक्षमाणाःपरस्परं
तानब्रवीज्जरासंधस्तथापांडवयादवान् आस्यतामितिराजेंद्रब्राह्मणच्छद्मसंवृतान् अथोपविविशुःसर्वेत्रयस्तेपुरुषर्षभाः
संप्रदीप्तास्त्रयोलक्ष्म्यामहाध्वजइवाग्नयः तानुवाचजरासंधःसत्यसंधोनराधिपः विगर्हमाणःकौरव्यवेषग्रहणवैकृता
न् नस्नातकव्रताविप्राबहिर्माल्यानुलेपनाः भवंतीतिनृलोकेस्मिन्विदितंममसर्वशः केयूयंपुष्पवंतश्चभुजैर्ज्याकृतलक्षणाः

सभा० विभवंतं स्मान्मो जन्म ब्राह्मणं प्रतिजानथ एवं विरागवसना बहिर्माल्यानुलेपनाः सत्यं वदत के यूयं सत्यं राजसु शोभते चैत्य
२५ कस्य गिरेः शृंगं भित्वा किमिव छद्मना अद्वारेण प्रविष्टास्थ निर्भया राजकिल्बिषात् वदध्वं वाचि वीर्यं च ब्राह्मणस्य विशेष
तः कर्म चैतद्विलिंगस्थं किं वोद्य प्रसमीक्षितं एवं च मामुपस्थाय कस्माच्च विधिनार्हणां प्रणीतां नानुगृह्णीत कार्यं किं वा
स्मदागमे एवमुक्ते ततः कृष्णः प्रत्युवाच महामनाः स्निग्धगंभीरया वाचा वाक्यं वाक्यविशारदः कृष्ण० स्नातकान्वै द्विजा
६ न् राजन्विध्यमान्वै नराधिप स्नातकव्रतिनो राजन्ब्राह्मणाः क्षत्रिया विशः विशेषनियमाश्चैषामविशेषाश्च संत्युत
विशेषवांश्च सततं क्षत्रियः श्रियमिच्छति पुष्पवत्सु ध्रुवा श्रीश्च पुष्पवंतस्ततो वयं क्षत्रियो बाहुवीर्यस्तु न तथा वाक्यवी
र्यवान् अप्रगल्भं वचस्तस्य तस्माद्बार्हद्रथेरितं स्ववीर्यं क्षत्रियाणां तु बाह्वोर्धाता न्यवेशयत् तद्दिदृक्षसि चेद्राजन्
द्रष्टास्यद्य न संशयः अद्वारेण रिपोर्गेहं द्वारेण सुहृदो गृहान् प्रविशंति नरा धीरा द्वाराण्येतानि धर्मतः कार्यवंतो
गृहानेत्य शत्रुतो नार्हणां वयं प्रतिगृह्णीम तद्विद्धि एतन्नः शाश्वतं व्रतं इति सभापर्वणि जरासंधवधे
२१ छ जरासंध उवाच न स्मरामि कदा वैरं कृतं युष्माभिरित्युत चिंतयंश्च न पश्यामि भवतां प्रति वैकृतं वै
कृते वासति कथं मन्यध्वं मामनागसं अरिं वै ब्रूत हे विप्राः सतां समय एव हि अथ धर्मोपघाताद्धि मनः समुपतप्यत श्रीः
योनागसि प्रसृजति क्षत्रियो हि न संशयः अतोन्यथाचरन्लोके धर्मज्ञः सन्महारथः वृजिनां गतिमाप्नोति श्रेयसो २५
प्युपहंति च त्रैलोक्ये क्षत्रधर्मो हि श्रेयान्वै साधुचारिणां नान्यं धर्मं प्रशंसंति ये च धर्मविदो जनाः तस्य मेद्य स्थित

प्रा

स्य स्वधर्मे नियतात्मनः अनागसः प्रजानां च प्रमादादिव जल्पथ कृष्ण० कुलकार्यं महाबाहो कश्चिदेकः कुलोद्वहः
वहंस्तन्नियोगाद्वा वयमभ्युद्यतास्त्वयि त्वया चोपहता राजन्क्षत्रिया लोकवासिनः तदागः क्रूरमुत्पाद्य मन्यसे किं न मागध
राजा नद्रः कथं साधून्हिंस्यान्नृपतिसत्तम तद्राज्ञः संनिगृह्य त्वं रुद्रायोपजिहीर्षसि कौन्त्य एवं यथा हि त्वं जरासंधवृथामतिः
अस्मांस्तदेनोपगच्छेत्कृतं बार्हद्रथ त्वया वयं हि शक्ता धर्मस्य रक्षणे धर्मचारिणः मनुष्याणां समालंभो न च दृष्टः कदाचन स कथं मा ६
नुषैर्देवं यष्टुमिच्छसि शंकरं सवर्णो हि सवर्णानां पशुसंज्ञां करिष्यसि × यस्यां यस्यामवस्थायां यद्यत्कर्म करोति यः तस्यां तस्याम
वस्थायां तत्तत्फलमवाप्नुयात् त्वां ज्ञातिक्षयकरं वयमार्तानुसारिणः ज्ञातिवृद्धिनिमित्तार्थं विनिहंतुमिहागताः नास्ति लो
के पुमानन्यः क्षत्रियेष्विति चैव यत् मन्यसे स च ते राजन्सुमहान्बुद्धिविप्लवः को हि जानन्नभिजनमात्मवान्क्षत्रियो नृप नावि
शेत्स्वर्गमतुलं रणानंतरमव्ययं स्वर्गं ह्येव समास्थाय रणयज्ञेषु दीक्षिताः जयंति क्षत्रिया लोकांस्तद्विद्धि मनुजर्षभ स्वर्गयोनिर्म
हद्ब्रह्म स्वर्गयोनिर्महद्यशः स्वर्गयोनिस्तपो युद्धे मृत्युः सोव्यभिचारवान् एष ह्यैंद्रो वैजयंतो गुणैर्नित्यं समाहितः येनासुरा
न्पराजित्य जगत्पाति शतक्रतुः स्वर्गमार्गाय कस्य स्याद्विग्रहो वै यथा तव मागधैर्विपुलैः सैन्यैर्बाहुल्यबलदर्पितः मावमंस्थाः
परान्राजन्नास्ति वीर्यं नरे नरे समं तेजस्त्वया चैव केवलं मनुजेश्वर यावदेतदसंबुद्धं तावदेव भवेत्तव विषह्यमेतदस्मा
कमतो राजन्ब्रवीमि ते जहि त्वं सदृशेष्वेव मानं दर्पं च मागध मा गमः ससुतामात्यः सबलश्च यमक्षयं दंभोद्भवः कार्तवीर्य उत्त
रश्च बृहद्रथः श्रेयसो ह्यवमन्येह विनेशुः सबला नृपाः मुमुक्षमाणास्त्वत्तो हि न वयं ब्राह्मणा ध्रुवं शौरिरस्मि हृषीकेशो नृवीर

स त्रि३

देवतार्थमुपाहृत्यराज्ञःकस्मक्थंभयात् २

क्षी४ क्षि२

सभा० २६ पांडवाविमौ अनयोर्मातुलेयंचकृष्णंमांविद्धितेरिपुं त्वामाह्वयामहेराजन्स्थिरोयुध्यस्वमागध मुंचवानृपतीन्सर्वान्गच्छ वा०
त्वंयमक्षयं जरासंधउवाच नाजितान्वैनरपतीनाहरामिकदाचन अजितःपर्यवस्थाताकोत्रयोनिर्जितोमया
क्षत्रियस्यैतदेवाहुर्धर्म्यंकृष्णोपजीवनं विक्रम्यवशमानीयकामतोयत्समाचरेत् अहमद्यविमुच्येयंक्षात्रंव्रतमनुस्म
यू४ रन् सेनांसेनयाव्यूढ्यैनएकएकेनवापुनः द्वाभ्यांत्रिभिर्वायोत्स्येहंयुगपत्पृथगेववा वैशं० एवमुक्त्वाजरासंधःसह
देवाभिषेचनं आज्ञापयत्तदाराजायुयुत्सुर्भीमकर्मभिः सतुसेनापतीराजासस्मारभरतर्षभ कौशिकंचित्रसेनंचतस्मि
न्युद्धउपस्थिते ययोस्तेनामनीराजन्हंसेतिडिभकेतिच पूर्वंसंकथितेपुंभिर्नृलोकेलोकसत्कृते निवाभ्यासज्जरासंधादि
ष्टमेवानुचिंतयन् तंतुराजविभुःशौरीराजानंबलिनांवरं स्मृत्वापुरुषशार्दूलःशार्दूलसमविक्रमं सत्यसंधोजरासंधंभुविभी
मपराक्रमं भागमन्यस्यनिर्दिष्टमवध्यंमधुभिर्मृधे नात्मनात्मवतांमुख्यइयेषमधुसूदनः ब्राह्मीमाज्ञांपुरस्कृत्यहंतुंहल
वैशं०५ धरानुजः इतिसभापर्वणिजरासंधवधे २२ ततस्तंनिश्चितात्मानंयुद्धाययदुनंदनः उवाचवाग्मीराजानंज
रासंधमधोक्षजः कृष्ण० त्रयाणांकेनतेराजन्योद्धुमुत्सहतेमनः अस्मदन्यतमेनेहसज्जीभवतुकोयुधि एवमुक्तः यू४
सनृपतिर्युद्धंवव्रेमहाद्युतिः जरासंधस्ततोराजाभीमसेनेनमागधः आदायरोचनांमाल्यंमांगल्यान्यपराणिच धार श्रीः
न. यन्नगदानुख्यानिर्द्दिष्टनिर्वृतिनानिच उपतस्थेजरासंधंयुयुत्सुंवैपुरोहितः कृतस्वस्त्ययनोराजाब्राह्मणेनयशस्विना सम २६
नह्यज्जरासंधःक्षात्रंधर्ममनुस्मरन् अवमुच्यकिरीटंसकेशान्समनुगृह्यच उदतिष्ठज्जरासंधोवेलातिगइवार्णवः

यरो३

उवाचमतिमान्राजाभीमंभीमपराक्रमः भीमयोत्स्येत्वयासार्द्धंश्रेयसानिर्जितंवरं एवमुक्त्वाजरासंधोभीमसेनमरिंदमः प्रत्य
द्ययौमहातेजाःशक्रंबलइवासुरः ततःसंमंत्र्यकृष्णेनकृतस्वस्त्ययनोबली भीमसेनोजरासंधमाससादयुयुत्सया ततस्तौनर
शार्दूलौबाहुशस्त्रौसमीयतुः वीरौपरमसंहृष्टावन्योन्यजयकांक्षिणौ करग्रहणपूर्वंतुकृत्वापादाभिवंदनं कक्षैःकक्षां
विधुन्वानावास्फोटंतत्रचक्रतुः स्कंधेदोर्भ्यांसमाहत्यबलिनौसमुदूर्मुदुः अंगमंगैःसमाश्लिष्यपुनरास्फोटनंविभो चित्रहस्ता
८५ दिकंकृत्वाकक्षाबंधंचचक्रतुः गलगंडाभिघातेनसस्फुलिंगेनचाशनिं बाहुपाशादिकंकृत्वापादाहतशिरावुभौ उरोहस्तंततश्च
क्रेपूर्णकुंभौप्रयुंजतौ करसंपीडनंकृत्वागर्जंतौवारणाविव नर्दंतौमेघसंकाशौबाहुप्रहरणावुभौ तलेनाहन्यमानौतु
अन्योन्यंस्तब्धवीक्षणौ सिंहाविवसुसंक्रुद्धावाकृष्याकृष्ययुध्यतां अंगेनांगंसमापीड्यबाहुभ्यामुभयोरपि आवृत्यबा
हुभिश्चापिउदरंचप्रचक्रतुः संप्रणम्यसर्वौबाहुभ्यांपूर्णकुंभंचचक्रतुः तणपीडंयथाकामंसर्वयोगसमुच्छ्रितं एवमादीनियुद्धानि
प्रकुर्वंतौपरस्परं तयोर्युद्धंततोद्रष्टुंसमेताःपुरवासिनः ब्राह्मणावणिजश्चैवक्षत्रियाश्चसहस्रशः शूद्राश्चनरशार्दूलस्त्रियोवृद्धाश्च
सर्वशः निरंतरमभूत्तत्रजनौघैरभिसंवृतं तयोरथभुजाघातान्निग्रहप्रग्रहात्तथा आसीत्सुभीमःसंपातोवज्रपर्वतयोरिव उभौ पा
परमसंहृष्टौबलेनबलिनांवरौ अन्योन्यस्यांतरप्रेप्सूपरस्परजयैषिणौ तद्भीममुत्सार्यजनंयुद्धमासीदुपह्वरे बलिनोःसंयुगेरा
जन्वृत्रवासवयोरिव प्रकर्षणाकर्षणाभ्यामनुकर्षविकर्षणैः आचकर्षतुरन्योन्यंजानुभिश्चावजघ्नतुः ततःशब्देनमहताभर्त्सयं
तौपरस्परं पाषाणसंपातनिभैःप्रहारैरभिजघ्नतुः व्यूढोरस्कौदीर्घभुजौनियुद्धकुशलावुभौ बाहुभिःसमसज्जेतामाय

सभा०
२७

सः परिश्रेषिव कार्तिकस्य तदा सस्य प्रवृत्तं प्रथमेहनि अनाहारं दिवा रात्रमविश्रांतमवर्तत तद्वृत्तं तु त्रयोदश्यां समवेतं
महात्मनोः चतुर्दश्यां निशायां तु निवृत्तो मागधः क्लमात् तं राजानं तथा क्लांतं दृष्ट्वा राजन् जनार्दनः उवाच भीमकर्माणं भी
मं संबोधयन्निव क्लांतः शत्रुर्न कौंतेय लभ्यः पीडयितुं रणे पीड्यमानो हि कार्त्स्न्येन जह्याज्जीवितमात्मनः तस्मात्तेनै
षकौंतेय पीडनीयो जनाधिप समेन युध्यस्व बाहुभ्यां भरतर्षभ एवमुक्तः सकृष्णेन पांडवः परवीरहा जरासं
धस्य तद्रूपं ज्ञात्वा चक्रे मतिं वधे ततस्तमजितं जेतुं जरासंधं वृकोदरः संरंभं बलिनां श्रेष्ठो जग्राह बलिनां वरः नांप
इति सभापर्वणि जरासंधवधे २३ वैशंपा० भीमसेनस्ततः कृष्णमुवाच यदुनंदनं बुद्धिमास्थाय विपुलां
जरासंधवधेप्सया नायं पापो मया कृष्ण युक्तः स्यादनुरोधितुं प्राणेन यदुशार्दूल बद्धकक्षेण वाससा एवमुक्तस्ततः
कृष्णः प्रत्युवाच वृकोदरं त्वरयन्पुरुषव्याघ्रो जरासंधवधेप्सया यत्ते दैवं परं सत्वं यच्च ते मातरिश्वनः बलं भीम जरासंध
दर्शयाशु तदद्य वै एवमुक्तस्तदा भीमो जरासंधमरिंदमः उत्क्षिप्य भ्रामयामास बलवंतं महाबलः भ्रामयित्वा शत
गुणं जानुभ्यां भरतर्षभ बभंज पृष्ठं संक्षिप्य निष्पिष्य विननाद च करेगृह्य चरणं द्विधा चक्रे महाबलः तस्य नि भी:
ष्पिष्यमाणस्य पांडवस्य च गर्जतः अभवत्तुमुलो नादः सर्वप्राणिभयंकरः वित्रेसुर्मागधाः सर्वे स्त्रीणां गर्भाश्च सुस्रु २७
वुः भीमसेनस्य नादेन जरासंधस्य चैव ह किं नु स्याद्धिमवान्भिन्नः किं नु स्विद्दीर्यते मही इति वै मागधा जज्ञुर्भीमसे
नस्य निस्वनात् ततो राज्ञः कुलद्वारि प्रसुप्तमिव तं नृपं रात्रौ गतासुमुत्सृज्य निश्चक्रमुररिंदमाः जरासंधरथं कृष्णो या

राजा

जयित्वा पताकिनं आरोप्य भ्रातरौ चैव मोक्षयामास बांधवान् ते वै रत्नभुजं कृष्णं रत्नार्हं पृथिवीश्वराः राजानश्चक्रुरासा
द्य मोक्षिता महतो भयात् अक्षतः शस्त्रसंपन्नो जितारिः सह राजभिः रथमास्थाय तं दिव्यं निर्जगाम गिरिव्रजात् यः स सोदर्य
वान्नाम द्वियोधः कृष्णसारथिः अभ्यासघाती संदृश्यो दुर्जयः सह राजभिः भीमार्जुनाभ्यां योधाभ्यामास्थितः कृष्णसारथिः शु
शुभे रथवरोऽसौ दुर्जयः सर्वधन्विभिः शक्रविष्णू हि संग्रामे चेरतुस्तारकामये रथेन तेन वै कृष्ण उपारुह्य ययौ तदा तप्तचामी
कराभेण किंकिणीजालमालिना मेघनिर्घोषनादेन जैत्रेणामित्रघातिना येन शक्रो दानवानां जघान नवतीर्नव तं प्राप्य
समहृष्यंत रथं ते पुरुषर्षभाः ततः कृष्णमुपाधावंस्तत्रस्थाः सहितं तदा रथस्थं मागधा दृष्ट्वा समपद्यंत विस्मिताः हयैर्दिव्यैः
समायुक्तो रथो वायुसमो जवे अधिष्ठितः शुशुभेऽति कृष्णेनातीव भारत असंगो देवविहितस्तस्मिन्रथवरे ध्वजः योजनाद्ददृशे श्री
मानिंद्रायुधसमप्रभः चिंतयामास कृष्णोऽथ गरुत्मंतं स चाभ्ययात् क्षणे तस्मिन्स तेनासीच्चैत्यवृक्ष इवोच्छ्रितः व्यादितास्यै
र्महानादैः सह भूतैर्ध्वजालयैः तस्मिन्रथवरे तस्थौ गरुत्मान्पन्नगाशनः दुर्निरीक्ष्यो हि भूतानां तेजसाभ्यधिकं बभौ आ
दित्य इव मध्याह्ने सहस्रकिरणावृतः न स सज्जति वृक्षेषु शस्त्रैश्चापि न रिष्यते दिव्यो ध्वजवरो राजन्दृश्यते चेह मानुषैः
तमास्थाय रथं दिव्यं पर्जन्यसमनिस्वनं निर्ययौ पुरुषव्याघ्रः पांडवाभ्यां सहाच्युतः यं लेभे वासवाद्राजा वसुस्तस्माद्बृ
हद्रथः बृहद्रथात्क्रमेणैव नं प्राप्तो बार्हद्रथं नृपं स निर्याय महाबाहुः पुंडरीकेक्षणस्ततः गिरिव्रजाद्बहिस्तस्थौ सम
देशे महायशाः तत्रैनं नागराः सर्वे सत्कारेणाभ्ययुस्तदा ब्राह्मणप्रमुखा राजन्विधिदृष्टेन कर्मणा बंधनाद्विप्रमु

सभा० २५ कारुश्वराजानो मधुसूदनं पूजयामासुरुत्सुकाः तिष्ठ वमिदं वचः नैतच्चित्रं महाबाहो त्वयि देवकिनंदने भीमार्जुनबलो
पेता धर्मस्य प्रतिपालनं जरासंधहृदे घोरे दुःखपंके निमज्जतां राज्ञां समभ्युद्धरणं यदिदं कृतमद्य वै विष्णो समवसन्ना
नां गिरिदुर्गे सुदारुणे दिष्ट्या मोक्षाद्यशो दीप्तमाप्तं ते यदुनंदन किं कुर्मः पुरुषव्याघ्र शाधि नः प्रणतस्थितान् कृत
मित्येव तद्विद्धि नृप यद्यपि दुष्करं तानुवाच हृषीकेशः समाश्वास्य महामनाः युधिष्ठिरो राजसूयं क्रतुमाहर्तुमिच्छ
ति तस्य धर्मप्रवृत्तस्य पार्थिवत्वं चिकीर्षतः सर्वैर्भवद्भिर्विज्ञाय साहाय्यं क्रियतामिति ततः सुप्रीतमनसस्ते नृपा नृ ५५
पसत्तम तथेत्येवाब्रुवन्सर्वे प्रतिगृह्यास्य तां गिरं रत्नभाजं च दाशार्हं चक्रुस्ते पृथिवीश्वराः कृच्छ्राज्जग्राह गोविंदस्तेषां त
दनुकंपया जरासंधात्मजश्चैव सहदेवो महामनाः निर्ययौ सजनामात्यः पुरस्कृत्य पुरोहितं स नीचैः प्रणतो भूत्वा
बहुरत्नपुरोगमः सहदेवो नृणां देवं वासुदेवमुपस्थितः भयार्त्ताय ततस्तस्मै कृष्णो दत्त्वाभयं तदा आददेऽस्य महार्हा
णि रत्नानि पुरुषोत्तमः अभ्यषिंचत तत्रैव जरासंधात्मजं तदा गत्वैकत्वं च कृष्णेन पार्थाभ्यां चैव सत्कृतः विवेश राजा द्यु
तिमान्बार्हद्रथपुरं पुनः कृष्णस्तु सह पार्थाभ्यां श्रिया परमया युतः रत्नान्यादाय भूरीणि प्रययौ पुरुषर्षभः इंद्रप्रस्थ श्री:
मुपागम्य पांडवाभ्यां सहाच्युतः समेत्य धर्मराजानं प्रीयमाणमभाषत दिष्ट्या भीमेन बलवान्जरासंधो निपातितः २८
राजानो मोक्षिताश्चैव बंधनान्नृपसत्तम दिष्ट्या कुशलिनौ चेमौ भीमसेनधनंजयौ पुनः स्वनगरं प्राप्तावक्षतावि
वि भारत ततो युधिष्ठिरः कृष्णं पूजयित्वा यथार्हतः भीमसेनार्जुनौ चैव प्रहृष्टः परिषस्वजे ततः क्षीणे जरासंधे भ्रात

भिः सह पांडवः सत्कृत्य पूजयित्वा च विससर्ज नराधिपान् युधिष्ठिराभ्यनुज्ञातास्ते नृपा हृष्टमानसाः जग्मुः स्वदेशांस्त्वरि
ता यानैरुच्चावचैस्ततः एवं पुरुषशार्दूलो महाबुद्धिर्जनार्दनः पांडवैर्घातयामास जरासंधमरिं तदा घातयित्वा जरासंधं
बुद्धिपूर्वमरिंदमः धर्मराजमनुज्ञाप्य पृथां कृष्णां च भारत सुभद्रां भीमसेनं च फाल्गुनं यमजौ तथा धौम्यमामंत्रयित्वा तु
प्रययौ स्वां पुरीं प्रति तेनैव रथमुख्येन मनसस्तुल्यगामिना धर्मराजविसृष्टेन दिव्येनानादयन्दिशः ततो युधिष्ठिरमुखाः
पांडवा भरतर्षभ प्रदक्षिणमकुर्वंत कृष्णमक्लिष्टकारिणं ततो गते भगवति कृष्णे देवकिनंदने जयं लब्ध्वा सुविपुलं राज्ञां द
त्त्वाभयं तदा संवर्धितं यशो भूयः कर्मणा तेन भारत द्रौपद्याः पांडवा राजन्यशःप्रीतिमवर्धयन् तस्मिन्काले तु यद्युक्तं ध
र्मकामार्थसंहितं तद्राजा धर्मतश्चक्रे प्रजापालनकीर्तनं इति सभापर्वणि जरासंधवधः समाप्तः २४ छ
वैशं० पार्थः प्राप्य धनुःश्रेष्ठमक्षय्यौ च महेषुधी रथं ध्वजं सभां चैव युधिष्ठिरमभाषत अर्जुन० धनुःशस्त्रं शरा वीर्यं
पक्षो भूमिर्यशो बलं प्राप्तमेतन्मया राजन्दुष्प्रापं यदभीप्सितं तत्र कृत्यमहं मन्ये कोशस्य परिवर्धनं करमाहारयिष्यामि राज्ञः स
र्वान्नृपोत्तम विजयाय प्रयास्यामि दिशं धनदपालितां तिथावथ मुहूर्ते च नक्षत्रे चाभिपूजिते वैशं० धनंजयवचः श्रुत्वा धर्म
राजो युधिष्ठिरः स्निग्धगंभीरनादिन्या तं गिरा प्रत्यभाषत स्वस्ति वाच्यार्हतो विप्रान्प्रयाहि भरतर्षभ दुर्हृदामप्रहर्षाय सु
हृदां नंदनाय च विजयस्ते ध्रुवं पार्थ प्रियं काममवाप्स्यसि इत्युक्तः प्रययौ पार्थः सैन्येन महता वृतः अग्निदत्तेन दिव्येन रथेना
द्भुतकर्मणा तथैव भीमसेनोऽपि यमौ च पुरुषर्षभौ ससैन्याः प्रययुः सर्वे धर्मराजेन पूजिताः दिशं धनपतेरिष्टामजयत्पाकशा

णां यं

सभा० २१ सनिः भीमसेनस्तथाप्राचीं सहदेवस्तु दक्षिणां प्रतीचीं नकुलो राजा दिशं विजयतां वरः खांडवप्रस्थमध्यस्थो धर्मराजो यु
धिष्ठिरः आसीत्परमया लक्ष्म्या सुहृद्गणवृतः प्रभुः जनमेजय उवाच दिशामभिजयं ब्रह्मन्विस्तरेणानुकीर्तय नहितृप्या
मि पूर्वेषां श्रृण्वानश्चरितं महत् वैशं० धनंजयस्य वक्ष्यामि विजयं पूर्वमेव ते यौगपद्येन पार्थैर्हि निर्जितेयं वसुंधरा पूर्वं कु
लिंदविषये वशे चक्रे महीपतीन् धनंजयो महाबाहुर्नातितीव्रेण कर्मणा आनर्त्तान्कालकूटांश्च कुलिंदांश्च विजित्य सः सुमं
डलं च विजितं कृतवान्सहसैनिकं सतेन सहितो राजन्सव्यसाची परंतपः विजिग्ये सकलं द्वीपं प्रतिविंध्यं च पार्थिवं सकलद्वीप
वासांश्च सप्तद्वीपे च ये नृपाः अर्जुनस्य च सैन्यैस्तु विग्रहस्तुमुलोऽभवत् सतानपि महेष्वासान्विजिग्ये भरतर्षभ तैरेव सहितः स
र्वैः प्राग्ज्योतिषमुपाद्रवत् तत्र राजा महानासीद्भगदत्तो विशांपते तेनासीत्सुमहद्युद्धं पांडवस्य महात्मनः सकिरातैश्च
चीनैश्च वृतः प्राग्ज्योतिषोऽभवत् अन्यैश्च बहुभिर्योधैः सागरानूपवासिभिः ततः सदिवसानष्टौ योधयित्वा धनंजयं प्रह
सन्नब्रवीद्राजा संग्रामे विगतक्लमं उपपन्नं महाबाहो त्वयि कौरवनंदन पाकशासनदायादे वीर्यमाहवशोभिनि अहं सखा श्री: २१
महेंद्रस्य शक्रादनवरो रणे नशक्यामि ते तात स्थातुं प्रमुखतो युधि अभीप्सितं पांडवेय ब्रूहि किं करवाणि ते यद्वक्ष्यसि म
हाबाहो तत्करिष्यामि पुत्रक अर्जुन० कुरूणामृषभो राजा धर्मराजो युधिष्ठिरः धर्मज्ञः सत्यसंधश्च यज्वा विपुलदक्षिणः
तस्य पार्थिवता भीप्सा करस्तस्मै प्रदीयतां भवान्पितृसखा चैव प्रीयमाणो मनापि च ततो नाज्ञापयामि त्वां प्रीतिपूर्वं प्रदीयतां
भगदत्त उवाच कुंतीमातर्यथा मत्वं तथा राजा युधिष्ठिरः सर्वमेतत्करिष्यामि किंचान्यत्करवाणि ते

इति सभापर्वणि अर्जुनदिग्विजये २५ वैशं० एवमुक्तः प्रत्युवाच भगदत्तं धनंजयः अनेनैव कृतं सर्वं भविष्यत्यनुजाना
यता तं विजित्य महाबाहुः कुंतीपुत्रो धनंजयः प्रययावुत्तरां तस्माद्दिशं धनदपालितां अंतर्गिरिं च कौंतेय स्तथैव च बहिर्गिरिं
तथैवोपगिरिं चैव विजिग्ये पुरुषर्षभः विजित्य पर्वतान्सर्वान्ये च तत्र नराधिपाः तान्वशे स्थापयित्वा स धनान्यादाय सर्वशः
तैरेव सहितः सर्वैरनुरज्य च तान्नृपाः उलूकवासिनं राजन्बृहंतमुपजग्मिवान् मृदंगवरनादेन रथनेमिस्वनेन च हस्तिनां च नि
नादेन कंपयन्वसुधामिमां ततो बृहंतस्त्वरितो बलेन चतुरंगिणा निष्क्रम्य नगरात्तस्माद्योधयामास फाल्गुनं सुमहान्संनि फा
शिष
पातोऽभूद्धनंजयबृहंतयोः नशशाक बृहंतस्तु सोढुं पांडवविक्रमं सोऽविषह्यतमं मत्वा कौंतेयं पर्वतेश्वरः उपावर्त्तत दुर्मेधा रत्नान्या
दाय सर्वशः सतद्राज्यमवस्थाप्य उलूकसहितो ययौ सेनाबिंदुमथो राजन्राज्यादाशु समाक्षिपत् तत्रस्थः पुरुषश्रेष्ठो धर्मराज
स्य शासनात् किरीटीति भवान्राजन्देशान्पंचगणांस्ततः सदेवप्रस्थमासाद्य सेनाबिंदोः पुरं प्रति बलेन चतुरंगेण निवेशमक
रोत्प्रभुः सतैः परिवृतः सर्वैर्विष्वगश्वं नराधिपं अभ्यगच्छन्महातेजाः पौरवं पुरुषर्षभं विजित्याहवे शूरान्पार्वतीयान्महारथान्
जिगाय सेनया राजन्पुरं पौरवरक्षितं पौरवं युधि निर्जित्य दस्यून्पर्वतवासिनः गणानुत्सवसंकेतानजयत्सप्त पांडवः ततः का
श्मीरकान्वीरान्क्षत्रियान्क्षत्रियर्षभः व्यजयल्लोहितं चैव मंडलैर्दशभिः सह ततस्त्रिगर्त्तान्कौंतेयं दार्वान्कोकनदांस्तथा क्ष
त्रिया बहवो राजन्नुपावर्त्तन्त सर्वशः अभिसारीं ततो रम्यां विजिग्ये कुरुनंदनः उरगावासिनं चैव रोचमानं रणेऽजयत् ततः सिं
हपुरं रम्यं चित्रायुधसुरक्षितं प्रामथद्बलमास्थाय पाकशासनिराहवे ततः सुह्मांश्च चोलांश्च किरीटी पांडवर्षभः सहितः

सभा० सर्वसैन्येन प्रामथत्कुरुनंदनः ततः परमविक्रांतो बाह्लीकान्पाकशासनिः प्रागुत्तरां दिशं ये च वसंत्याश्रित्य दस्यवः निवसंति वन
३० ने तान्सर्वानजयत्प्रभुः लंपाकान्परमकांबोजानृषिकानुत्तरानपि सहितांस्तान्महाराज व्यजयत्पाकशासनिः ऋषिकेष्वपि
संग्रामो बभूवातिभयंकरः तारकामयसंकाशः परस्त्वृषिकपार्थयोः स विजित्य ततो राजन्नृषिकान्रणमूर्धनि शुकोद
रसमानष्टौ हयान्दूतोसमानयत् मयूरसदृशानन्यानुत्तरानपरानपि जवनानाशुगांश्चैव करार्थं समुपानयत् स विनि
र्जित्य संग्रामे हिमवंतं सनिष्कुटं श्वेतपर्वतमासाद्य न्यविशत्पुरुषर्षभः इति सभापर्वणि अर्जुनदिग्विजये २८
वैशं० स श्वेतपर्वतं वीरः समतिक्रम्य वीर्यवान् देशं किंपुरुषावासं द्रुमपुत्रेण रक्षितं महता संनिपातेन क्षत्रियांतकरेण ह
अजयत्पांडवश्रेष्ठः करं चैनं न्यवेशयत् तं जित्वा हाटकं नाम देशं गुह्यकरक्षितं पाकशासनिरव्यग्रः सहसैन्यः समासदत् तांस्तु
सांत्वेन निर्जित्य मानसं सर उत्तमं ऋषिकुल्यास्तथा सर्वा ददर्श कुरुनंदनः सरो मानसमासाद्य हाटकानभितः प्रभुः गंधर्वर
क्षितं देशमजयत्पांडवस्ततः तत्र तित्तिरकल्माषान्मंडूकाख्यान्हयोत्तमान् लेभे स करमत्यंतं गंधर्वनगरात्तदा उत्तरं हरिवर्षं
तु समासाद्याथ पांडवः इयेष जेतुं तं देशं पाकशासननंदनः तत एनं महावीर्या महाकाया महाबलाः द्वारपालाः समासाद्य श्रीः
हृष्टा वचनमब्रुवन् पार्थ नेदं त्वया शक्यं पुरं जेतुं कथंचन उपावर्तस्व कल्याण पर्याप्तमिदमच्युत इदं पुरं यः प्रविशेद्ध्रुवं स न
भवेन्नरः प्रीयामहे त्वया वीर पर्याप्तो विजयस्तव न चापि किंचिज्जेतव्यमर्जुनात्र प्रदृश्यते उत्तराः कुरवो ह्येते नात्र युद्धं प्रवर्तते ३०
प्रविष्टोपि हि कौंतेय नेह द्रक्ष्यसि किंचन न हि मानुषदेहेन शक्यमत्राभिवीक्षितुं अथेह पुरुषव्याघ्र किंचिदन्यच्चिकीर्षसि

तत्प्रब्रूहि करिष्यामो वचनात्तव भारत ततस्तानब्रवीद्राजन्नर्जुनः प्रहसन्निव पार्थिवत्वं चिकीर्षामि धर्मराजस्य धीमतः न प्रवे
क्ष्यामि वो देशं विरुद्धं यदि मानुषैः युधिष्ठिराय यत्किंचित्करपण्यं प्रदीयतां ततो वस्त्राणि दिव्यानि दिव्यान्याभरणानि च क्षौमा
जिनानि दिव्यानि तस्य ते प्रददुः करं एवं स पुरुषव्याघ्रो विजिग्ये दिशमुत्तरां संग्रामान्सुबहून्कृत्वा क्षत्रियैर्दस्युभिस्तथा स
विनिर्जित्य राज्ञस्तान्करे च विनिवेश्य तु धनान्यादाय सर्वेभ्यो रत्नानि विविधानि च हयांस्तित्तिरकल्माषाञ्छुकपत्रनिभा
नपि मयूरसदृशानन्यान्सर्वाननिलरंहसः वृतः सुमहता राजन्बलेन चतुरंगिणा आजगाम पुनर्वीरः शक्रप्रस्थं पुरोत्त
मं धर्मराजाय तत्पार्थो धनं सर्वं सवाहनं न्यवेदयदनुज्ञातस्तेन राज्ञा गृहान्ययौ इति सभापर्वण्यर्जुनोत्तर
दिग्विजयः २९ वैशं० एतस्मिन्नेव काले तु भीमसेनोपि वीर्यवान् धर्मराजमनुज्ञाप्य प्रययौ पुरुषर्षभः मह
ता बलचक्रेण परराष्ट्रविमर्दिना हस्त्यश्वरथपूर्णेन दंशितेन प्रतापवान् वृतो भरतशार्दूलो द्विषच्छोकविवर्धनः स गत्वा
नृपशार्दूलः पंचालानां पुरं महत् पंचालान्विविधोपायैः सांत्वयामास पांडवः ततः सुकुंडिनं गत्वा सिंधुराजं नरर्षभः
विजित्याल्पेन कालेन दशार्णानगमत्प्रभुः तत्र दाशार्णको राजा सुधर्मा लोमहर्षणं कृतवान्भीमसेनेन महद्युद्धं निरायु
धं भीमसेनस्तु तद्दृष्ट्वा तस्य कर्म महात्मनः अधिसेनापतिं चक्रे सुधर्माणं महाबलं ततः प्राचीं दिशं भीमो ययौ भीमपरा
क्रमः सैन्येन महता राजन्कंपयन्निव मेदिनीं सोश्वमेधेश्वरं राजन्रोचमानं सहानुगं जिगाय समरे वीरो बलेन बलि
नां वरः स तं निर्जित्य कौंतेयो नातितीव्रेण कर्मणा पूर्वदेशं महावीर्यो विजिग्ये कुरुनंदनः ततो दक्षिणमागम्य पुलिंदन

गरंमहत् सुकुमारंवशेचक्रेसुमित्रंचनराधिपं ततस्तुधर्मराजस्यशासनाद्भरतर्षभ शिशुपालंमहावीर्यमभ्यगाज्जनमेज
सभा० य चेदिराजापितछ्रुत्वापांडवस्यचिकीर्षितं उपनिष्क्रम्यनगरात्प्रत्यगृह्णात्परंतप: तौसमेत्यमहाराजकुरुचेदिवृषौतदा
३२ उभयोरात्मकुलयो: कौशल्यंपर्यपृछतां ततोनिवेद्यतद्राष्ट्रंचेदिराजोविशांपते उवाचभीमंप्रहसन्किमिदंकुरुषेनघ
तस्यभीमस्तदाचख्यौधर्मराजचिकीर्षितं सचतंप्रतिगृह्यैवतथाचक्रेनराधिप: ततोभीमस्तत्रराजन्नुषित्वात्रिदशा
क्षपा: सत्कृत:शिशुपालेनययौसबलवाहन: इतिसभापर्वणिभीमदिग्विजये २८ वैशं० तत:कुमार
विषयेश्रेणिमंतंमथाजयत् कोशलाधिपतिंचैवबृहद्बलमरिंदम: अयोध्यायांतुधर्मज्ञंदीर्घप्रज्ञंमहाबलं अजयत्पां
डवश्रेष्ठोनातितीव्रेणकर्मणा ततोगोपालकक्षंचसोत्तरानपिकोशलान् मल्लानामधिपंचैवपार्थिवंचाजयत्प्रभु: त
तोहिमवत:पार्श्वंसमभ्येत्यजलोद्भवं सर्वमल्पेनकालेनदेशंचक्रेवशेबली एवंबहुविधान्देशान्विजित्यभरतर्षभ:
भल्लाटमभितोजिग्येकुंतिमंतंचपर्वतं पांडव:सुमहावीर्योबलेनबलिनांवर: सकाशिराजंसमरेसुबाहुमनिवर्तिनं
वशेचक्रेमहाबाहुर्भीमोभीमपराक्रम: तत:सुपार्श्वमभितस्तथाराजपतिंक्रथं युध्यमानंबलात्संख्येविजिग्येपांडव
र्षभ: ततोमत्स्यान्महातेजामलयांश्चमहाबलान् अनघानभयांश्चैवपशुभूमिंचसर्वश: निवृत्यचमहाबाहुर्मदधा
रमहीधरं सोमधेयांश्चनिर्जित्यप्रययावुत्तरामुख: वत्सभूमिंचकौंतेयोविजिग्येबलवान्बलात् भर्गाणामधिपंचैव श्री:
निषादाधिपतिंतथा विजिग्येभूमिपालांश्चमणिमत्प्रमुखान्बहून् ततोदक्षिणमल्लांश्चभोगवंतंचपर्वतं तर ३२

य
सैवाजयद्भीमोनातितीव्रेणकर्मणा शर्मकान्वर्मकांश्चैवव्यजयत्सांत्वपूर्वकं वैदेहकंचराजानंजनकंजगतीपतिं विजिग्ये
पुरुषश्रेष्ठोनातितीव्रेणकर्मणा वैदेहस्थस्तुकौंतेयइंद्रपर्वतमंतिकात् किरातानामधिपतीनजयत्सप्तपांडव: तत:सुह्मा
न्प्रसुह्मांश्चसपक्षानतिवीर्यवान् विजित्ययुधिकौंतेयोमागधानभ्यधाद्बली दंडंचदंडधारंचविजित्यपृथिवीपतीन् तैरेवस
हित:सर्वैर्गिरिव्रजमुपाद्रवत् जारासंधिंसांत्वयित्वाकरेचविनिवेश्यह तैरेवसहित:सर्वै: कर्णमभ्यद्रवद्बली सकंपयन्नि
वमहींबलेनचतुरंगिणा युयुधेपांडवश्रेष्ठ:कर्णेनामित्रघातिना सकर्णंयुधिनिर्जित्यवशेकृत्वाचभारत ततोविजि
ग्येबलवान्राज्ञ:पर्वतवासिन: अथमोदागिरौचैवराजानंबलवत्तरं पांडवोबाहुवीर्येणनिजघानमहामृधे तत:पुंड्रा
धिपंवीरंवासुदेवंमहाबलं कौशिकीकच्छनिलयंराजानंचमहौजसं उभौबलवृतौवीरावुभौतीव्रपराक्रमौ निर्जि
त्याजौमहाराजवंगराजमुपाद्रवत् समुद्रसेनंनिर्जित्यचंद्रसेनंचपार्थिवं ताम्रलिप्तंचराजानंकर्वटाधिपतिंतथा सुह्मा
नामधिपंचैवयेचसागरवासिन: सर्वान्म्लेछगणांश्चैवविजिग्येभरतर्षभ: एवंबहुविधान्देशान्विजित्यपवनात्मज:
वसुतेभ्यउपादायलौहित्यमगमद्बली ससर्वान्म्लेछनृपतीन्सागरानूपवासिन: करमाहारयामासरत्नानिविविधानि
च चंदनागरुवस्त्राणिमणिमौक्तिककंबलं कांचनंरजतंचैवविद्रुमंचमहाधनं तेकोटीशतसंख्येनकौंतेयंमहतातदा
अभ्यवर्षन्महात्मानंधनवर्षेणपांडवं इंद्रप्रस्थमुपागम्यभीमोभीमपराक्रम: निवेदयामासतदाधर्मराजायतद्ध
नं इतिसभापर्वणिभीमदिग्विजये २९ वैशं० तथैवसहदेवोपिधर्मराजेनपूजित: महत्यासे

सभा० ३२

न्पाराजन्प्रययौदक्षिणांदिशं ससूरसेनान्कार्त्स्न्येनपूर्वमेवाजयत्प्रभुः मत्स्यराजंचकौरव्योवशेचक्रेबलाद्बली अधिरा
जाधिपंचैवदंतवक्त्रंमहाबलं जिगायकरदंचैवकृत्वाराज्येन्यवेशयत् सुकुमारंवशेचक्रेसुमित्रंचनराधिपं तथैवाप
रमत्स्यांश्चव्यजयत्सपटच्चरान् निषादभूमिंगोशृंगंपर्वतप्रवरंतथा तरसैवाजयद्धीमाञ्छ्रेणिमंतंचपार्थिवं नवराष्ट्रंच
निर्जित्यकुंतिभोजमुपाद्रवत् प्रीतिपूर्वंचतस्यासौजग्राहशासनं ततश्चर्मण्वतीकूलेजंभकस्यात्मजंनृपं ददर्शवासु कुंति
देवेनशेषितंपूर्ववैरिणा चक्रेतेनससंग्रामंसहदेवेनभारत सतमाजौविनिर्जित्यदक्षिणाभिमुखोययौ सेकान्
परसेकांश्चव्यजयत्सुमहाबलः करंतेभ्यउपादायरत्नानिविविधानिच ततस्तैरेवसहितोनर्मदामभितोययौ
तत्रयुद्धमभूद्राजन्दिवसद्वयमच्युत सविजित्यदुराधर्षंभीष्मकंमाद्रिनंदनः कोशलाधिपतिंचैवतथावेण्णात
टाधिपं कांतारकांश्चसमरेतथाप्राक्कोटकान्नृपान् नाटकेयांश्चसमरेतथाहेरंबकान्युधि मारुधंचविनिर्जि
त्यरम्यग्राममथोबलात् नाचीनानर्बुकांश्चैवराज्ञश्चैवमहाबलः तांस्तानाटविकान्सर्वानजयत्पांडुनंदनः वाता
धिपंचनृपतिंवशेचक्रेमहाबलः पुलिंदांश्चरणेजित्वाययौदक्षिणतःपुनः युयुधेपांड्यराजेनदिवसंनकुलानु
जः तंजित्वासमहाबाहुःप्रययौदक्षिणापथं गुहामासादयामासकिष्किंधांलोकविश्रुतां तत्रवानरराजाभ्यां श्रीः
मैंदेनद्विविदेनच युयुधेदिवसान्सप्तनचतौविकृतिंगतौ ततस्तुष्टौमहात्मानौसहदेवायवानरौ ऊचतुश्च ३२
वसंहृष्टौप्रीतिपूर्वमिदंवचः गच्छपांडवशार्दूलरत्नान्यादायसर्वशः अविघ्नमस्तुकार्यायधर्मराजायधीमते

ततोरत्नान्युपादायपुरींमाहिष्मतींययौ तत्रनीलेनराज्ञासचक्रेयुद्धंनरर्षभः पांडवःपरवीरघ्नःसहदेवःप्रतापवान्
ततोऽस्यसुमहद्युद्धमासीद्भीरुभयंकरं सैन्यक्षयकरंचैवप्राणानांसंशयावहं चक्रेतस्यहिसाहाय्यंभगवान्हव्यवाहनः
ततोरथाहयानागाःपुरुषाःकवचानिच प्रदीप्तान्यव्यदृश्यंतसहदेवबलेतदा ततःसुसंभ्रांतमनाबभूवकुरुनंदनः नो
त्तरंप्रतिवक्तुंचशक्तोऽभूज्जनमेजय जनमेजयउवाच किमर्थंभगवानग्निःप्रत्यमित्रोऽभवद्युधि सहदेवस्यय
ज्ञार्थंघटमानस्यवैद्विज वैशं० नीलस्यराज्ञोदुहितारूपेणाप्रतिमाभुवि अग्निहोत्रमुपातिष्ठत्पितुःशुश्रूष
णेतदा तत्रमाहिष्मतीवासीभगवान्हव्यवाहनः श्रूयतेहिगृहीतोवैपुरस्तात्पारदारिकः नीलस्यराज्ञोदुहिताबभूव
तीवशोभना सोऽग्निहोत्रमुपातिष्ठद्बोधनायपितुःसदा व्यजनैर्धूयमानोऽपितावत्प्रज्वलतेनसः यावच्चारुपुटोष्ठेनवा
तेननविधूयते ततःसभगवानग्निश्चकमेतांसुदर्शनां नीलस्यराज्ञःसर्वेषामुपनीतश्चसोऽभवत् ततोब्राह्मणरूपेण
रममाणोयदृच्छया तंकुराज्ञायथाशास्त्रमशासद्धार्मिकस्तदा प्रजज्वालततःकोपाद्भगवान्हव्यवाहनः तंदृष्ट्वाविस्मि
तोराजाजगामशिरसावनिं ततःकालेनतांकन्यांतथैवहितदान्नृपः प्रददौविप्ररूपायवह्नयेशिरसानतः प्रतिगृ
ह्यचतांसुभ्रूंनीलराजसुतांतदा चक्रेप्रसादंतस्यराज्ञोविभावसुः वरेणछंदयामासतंनृपंस्विष्टकृत्तमः अभयंच
वव्रेस्वसैन्येसमहीपतिः ततःप्रभृतियेकेचिदज्ञानात्तांपुरींनृपाः जिगीषंतिबलाद्राजन्दह्यंतेतेऽग्निना तस्यां
पुर्यांतदाचैवमाहिष्मत्यांकुरूद्वह बभूवुरनभिग्राह्यायोषितश्छंदतःकिल एवमग्निर्वरंप्रादात्स्त्रीणामप्रतिवारणे। स्वैरिण्य

सभा० स्तत्रनार्यो हि यथेच्छं प्रवरं सुत वर्जयंति च राजानस्तद्राष्ट्रं पुरुषर्षभ भयादग्नेर्महाराज तदा प्रभृति सर्वदा सहदे
३३ वस्तु धर्मात्मा सैन्यं दृष्ट्वा भयार्दितं परीतमग्निना राजन्नाकंपत यथा गिरिः उपस्पृश्य शुचिर्भूत्वा सोब्रवीत्पावकं ततः
सहदेव० त्वदर्थोयं समारंभः कृष्णवर्त्मन्नमोस्तु ते मुखं त्वमसि देवानां यज्ञस्त्वमसि पावकः पावनात्पावकश्चा
सि हवनाद्धव्यवाहनः वेदास्त्वदर्थं जाता वै जातवेदास्ततो ह्यसि चित्रभानुः सुभानुस्त्वमनलस्त्वं विभावसो
स्वर्गद्वारस्पृशश्चासि हुताशो ज्वलनः शिखी वैश्वानरस्त्वं पिंगेशः प्लवंगो भूरितेजसः कुमारसूस्त्वं भगवान्रुद्रगर्भो
हिरण्यकृत् अग्निर्ददातु मे तेजो वायुः प्राणं ददातु मे पृथिवी बलमादध्याच्छिवं चापो दिशंतु मे अपांगर्भ महासत्व
जातवेदः सुरेश्वर देवानां मुखमग्ने त्वं सत्येन विपुनीहि मां ऋषिभिर्ब्राह्मणैश्चैव दैवतैरसुरैरपि नित्यं सुहुत यज्ञेषु
सत्येन विपुनीहि मां धूमकेतुः शिखी च त्वं पापहानिलसंभवः सर्वप्राणिषु नित्यस्थः सत्येन विपुनीहि मां एवं स्तुतोसि
भगवन्प्रीतेन शुचिना मया तुष्टिं पुष्टिं श्रुतिं चैव प्रीतिं चाग्ने प्रयच्छ मे वैशं० इत्येवं मंत्रमाग्नेयं पठन्यो जुहुयाद्वि
भुं ऋद्धिमान्सततं दांतः सर्वपापैः प्रमुच्यते सहदेव० यज्ञविघ्नमिमं कर्तुं नार्हस्त्वं हव्यवाहन एवमुक्त्वा तु माद्रे श्री।
यः कुशैरास्तीर्य मेदिनीं विधिवत्पुरुषव्याघ्रः पावकं प्रत्युपाविशत् प्रमुखे सर्वसैन्यस्य भीतोद्विग्नस्य भारत न चैनमत्यगा
द्वह्निर्वेलामिव महोदधिः तमभ्येत्य शनैर्वह्निर्वेलामिव महोदधिः तमभ्येत्य शनैर्वह्निरुवाच कुरुनंदनं सहदेवं नृ ३३
णां देवं सांत्वपूर्वमिदं वचः उत्तिष्ठोत्तिष्ठ कौरव्य जिज्ञासेयं कृता मया वेद्मि सर्वमभिप्रायं तव धर्मसुतस्य च मयाप्र

क्षितव्योयं सदा भरतसत्तम यावद्राज्ञोस्य नीलस्य कुलसंततिधारिणः ईप्सितं च करिष्यामि मनसस्तव पांडव ततउ
त्थाय हृष्टात्मा प्रांजलिः शिरसा नतः पूजयामास माद्रेयः पावकं पुरुषर्षभः पावके विनिवृत्ते तु नीलो राजाभ्ययात्तदा
पावकस्याज्ञया चैनमर्चयामास पार्थिवं सत्कारेण नरव्याघ्रं सहदेवं युधांपतिं प्रतिगृह्य च तां पूजां करे च विनिवेश्य
तं माद्रीसुतस्ततः प्रायाद्विजयी दक्षिणां दिशं त्रैपुरं स वशे कृत्वा राजानममितौजसं निजग्राह महाबाहुस्तरसा
पौरवेश्वरं आकृतिं कौशिकाचार्यं यत्नेन महता ततः वशे चक्रे महाबाहुः सुराष्ट्राधिपतिं तथा सुराष्ट्रविषयस्थ
श्च प्रेषयामास रुक्मिणे राज्ञे भोजकटस्थाय महामात्राय धीमते भीष्मकाय स धर्मात्मा साक्षादिंद्रसखाय वै स चास्य स
सुतो राजन्प्रतिजग्राह शासनं प्रीतिपूर्वं महाबाहुर्वासुदेवमवेक्ष्य च ततः स रत्नान्यादाय पुनः प्रायाद्युधांपतिः ८ घ
ततः शूर्पारकं चैव तालाकटमथापि च वशे चक्रे महाबाहुर्दंडकांश्च महाबलः सागरद्वीपवासांश्च नृपतीन्म्लेच्छयोनि
जान् निषादान्पुरुषादांश्च कर्णप्रावरणानपि ये च कालमुखा नाम नरराक्षसयोनयः कृत्स्नं कोल्लगिरिं चैव मुरची
पत्तनं तथा द्वीपं ताम्राह्वयं चैव पर्वतं रामकं तथा तिमिंगिलं च स नृपं वशे चक्रे महामतिः एकपादांश्च पुरुषान्केव
लं वनवासिनः नगरीं संजयंतीं च पिच्छंडं करहाटकं दूतैरेव वशे चक्रे करं चैनानदापयत् पांड्यांश्च द्रविडांश्चैव क
लिंगांश्चांध्रमल्लिकान् अंध्रान्पुलिंदान्दरदान्साहितालाध्रकेरलान् अटवीं चैव दासीं च यवनानां पुरं तथा दूतैरेव व ६
शे चक्रे करं चैनानदापयत् मरुकच्छं गतो धीमान्दूतान्माद्रवतीसुतः प्रेषयामास राजेंद्र पौलस्त्याय महात्मने

सभा० विभीषणाय धर्मात्मा प्रीतिपूर्वमरिंदमः स चास्य प्रतिजग्राह शासनं प्रीतिपूर्वकं तच्च कालकृतं धीमानन्वमन्यत स
३४ प्रभुः ततः संप्रेषयामास रत्नानि विविधानि च चंदनागरुमुख्यानि दिव्यान्याभरणानि च वासांसि च महार्हाणि म
णींश्चैव महाधनान् आववर्तत ततो धीमान्सहदेवो महामनाः एवं निर्जित्य तरसा सांत्वेन च बलेन च करदान्पार्थि
वान्कृत्वा प्रत्यागच्छदरिंदमः धर्मराजाय तत्सर्वं निवेद्य भरतर्षभ कृतकर्मा सुखं राजन्नुवास जनमेजय
इति सभापर्वणि सहदेवदिग्विजयः ३० वैशं० नकुलस्य तु वक्ष्यामि कर्माणि विजयं तथा वासुदेवजितामा
शां यथासावजयत्प्रभुः निर्याय खांडवप्रस्थात्प्रतीचीमभितो दिशं उद्दिश्य मतिमान्प्रायान्महत्या सेनया वृतः सिं
हनादेन महता योधानां गर्जितेन च रथनेमिनिनादैश्च कंपयन्वसुधामिमां ततो बहुविधं रम्यं गवाश्वधनधान्यवत्
कार्त्तिकेयस्य दयितं रोहीतकमुपाद्रवत् तत्र युद्धं महच्चासीच्छूरैर्मत्तमयूरकैः शैलीषकं महेच्छं च वशे चक्रे महाद्युतिः
मरुभूमिं च कार्त्स्न्येन तथैव बहुधान्यकं आक्रोशं चैव राजर्षिं तेन युद्धमभून्महत् तान्दशार्णान्स जित्वा च प्रतस्थे
पांडुनंदनः शिबींस्त्रिगर्तानंबष्ठान्मालवान्पंचकर्पटान् तथा माध्यमिकांश्चैव वाटधानान्द्विजानथ पुनश्च परि श्रीः
वृत्याथ पुष्करारण्यवासिनः गणानुत्सवसंकेतान्व्यजयत्पुरुषर्षभः सिंधुकूलाश्रिता ये च ग्रामणीया महाबलाः ३४
शूद्राभीरगणाश्चैव ये चाश्रित्य सरस्वतीं वर्त्तयंति च ये मत्स्यैर्ये च पर्वतवासिनः कृत्स्नं पंचनदं चैव तथा वानरकं
टकं उत्तरज्योतिकं चैव सदिव्यकटकं पुरं द्वारपालं च तरसा वशे चक्रे महाद्युतिः रमठान्हारहूणांश्च प्रतीच्याश्चैव ये

नृपाः तान्सर्वान्स वशे चक्रे शासनादेव पांडवः तत्रस्थः प्रेषयामास वासुदेवाय भारत स चापि यादवैः सार्द्धं प्रीत्या जग्रा
ह शासनं ततः शाकलमभ्येत्य मद्राणां पुटभेदनं मातुलं प्रीतिपूर्वेण शल्यं चक्रे वशे बली स तस्मिन्सत्कृतो राज्ञा सत्कारार्हो
विशांपते रत्नानि भूरीण्यादाय संप्रतस्थे युधांपतिः ततः सागरमध्यस्थान्म्लेच्छान्परमदारुणान् प्रह्लवान्बर्बरांश्चै
व तान्सर्वाननयद्वशं ततो रत्नान्युपादाय वशे कृत्वा च पार्थिवान् न्यवर्त्तत नरश्रेष्ठो नकुलश्चित्रमार्गवित् करभा
णां सहस्राणि कोशं तस्य महात्मनः ऊहुर्दश महाराज कृच्छ्रादिव महाधनं इंद्रप्रस्थगतं वीरमभ्येत्य युधिष्ठिरं ततो मा
द्रीसुतः श्रीमान्धनं तस्मै न्यवेदयत् एवं प्रतीचीं नकुलो दिशं वरुणपालितां विजिग्ये वासुदेवेन निर्जितां पुरुषर्षभः
इति सभापर्वणि दिग्विजयः समाप्तः ३१ ॥ वैशं० रक्षणाद्धर्मराजस्य सत्यस्य परिपालनात् शत्रूणां
क्षपणाच्चैव स्वकर्मनिरताः प्रजाः बलीनां सम्यगादानाद्धर्मतश्चानुशासनात् निकामवर्षी पर्जन्यः स्फीतो जन
पदोऽभवत् सर्वारंभाः सुप्रवृत्ता गोरक्षं कर्षणं वणिक् विशेषात्सर्वमेवैतत्संजज्ञे राजकर्मणा दस्युभ्यो वंचकेभ्यो वा
राजन्प्रति परस्परं राजवल्लभतश्चैव नाश्रूयंत मृषा गिरः अवर्षं चातिवर्षं च व्याधिपावकमूर्छनं सर्वमेतत्तदा नासीद्धर्म
नित्ये युधिष्ठिरे प्रियं कर्तुमुपस्थातुं बलिकर्म स्वभावजं अभिहर्तुं नृपा जग्मुर्नान्यैः कार्यैः पृथक्पृथक् धर्म्यैर्धनागम
स्तस्य ववृधे निचयो महान् कर्तुं यस्य न शक्येत क्षयो वर्षशतैरपि सर्वेषां भूमिपालानां श्रेष्ठः स च महीपतिः स कोश
स्य परीमाणं कोशस्य च महीपतिः विज्ञाय राजा कौंतेयो यज्ञायैव मनो दधे सुहृदश्चैव ते सर्वे पृथक्च सह चाब्रुवन्

सभा० यज्ञकालस्तव विभो क्रियतामत्र सांप्रतं तथैवमुक्तानामेवं तेषामभ्याययौ हरिः ऋषिः पुराणो धर्मात्मा दृश्यश्चापि
३५ विजानतां जगतस्तस्थुषां श्रेष्ठः प्रभवश्चाव्ययश्च ह भूतभव्यभवन्नाथः केशवः क्लेशनाशनः प्राकारः सर्ववृष्णीना
मापत्स्वभयदोरिहा बलाधिकारे निक्षिप्य सम्यगानकदुंदुभिं उच्चावचमुपादाय धर्मराजाय माधवः धनौघं पुरुषव्याघ्रो
बलेन महतावृतः तद्धनौघमपर्यंतं रत्नसागरमुत्तमं नादयन्रथघोषेण प्रविवेश पुरोत्तमं पूर्णमापूरयंस्तेषां द्विषच्छो
कावहोऽभवत् असूर्यमिव सूर्येण निवातमिव वायुना कृष्णेन समुपेतेन जहृषे भारतं पुरं तं मुदाऽभिसमागम्य सत्कृत्य
च यथाविधि संपृष्ट्वा कुशलं चैव सुखासीनं युधिष्ठिरः धौम्यद्वैपायनमुखैर्ऋत्विग्भिः पुरुषर्षभः भीमार्जुनयमैश्चैव
सहितः कृष्णमब्रवीत् युधिष्ठिर० त्वत्कृते पृथिवी सर्वा मद्वशे कृष्ण वर्तते धनं च बहु वार्ष्णेय त्वत्प्रसादादुपार्जितं
सोहमिच्छामि तत्सर्वं विधिवद्देवकीसुत उपयोक्तुं द्विजाग्र्येषु हव्यवाहे च माधव तदहं यष्टुमिच्छामि दाशार्ह सहितस्त्वया
अर्जुनश्च महाबाहो तन्मानुज्ञातुमर्हसि स दीक्षापय गोविंद त्वमात्मानं महाभुज त्वयीष्टवति दाशार्ह विपाप्मा भविता
ह्यहं मां वाप्यभ्यनुजानीहि सहैभिरनुजैर्विभो अनुज्ञातस्त्वया कृष्ण प्राप्नुयां क्रतुमुत्तमं वैशं० तं कृष्णः प्रत्युवा
चेदं बहूक्त्वा गुणविस्तरं त्वमेव राजशार्दूल सम्राडर्हो महाक्रतुं संप्राप्नुहि त्वया प्राप्ते कृतकृत्यास्ततो वयं यजस्वा श्री:
भीप्सितं यज्ञं मयि श्रेयस्यवस्थिते नियुंक्ष्व चापि मां कृत्ये सर्वं कर्तास्मि तेऽनघ युधिष्ठिर० सफलः कृष्ण संकल्पः ३५
सिद्धिश्च नियता मम यस्य मे त्वं हृषीकेश यथेप्सितमुपस्थितः वैशं० अनुज्ञातस्तु कृष्णेन पांडवो भ्रातृभिः सह

करणानि:
ईजितुं राजसूयेन साधनान्युपचक्रमे ततआज्ञापयामास सराजा राजसत्तमः सहदेवं युधां श्रेष्ठं मंत्रिणश्चैव सर्वशः
अस्मिन्क्रतौ यथोक्तानि द्विजातिभिः तथोपकरणं सर्वं मंगलानि च सर्वशः अधियज्ञांश्च संभारान्धौम्योक्तान्क्षिप्रमेव हि
समानयंतु पुरुषा यथायोग्यं यथाक्रमं इंद्रसेनो विशोकश्च पूरुश्चार्जुनसारथिः अन्नाद्याहरणे युक्ताः संतु मत्प्रियकाम्य
या सर्वकामाश्च कार्यंतां रसगंधसमन्विताः मनोहराः प्रीतिकरा द्विजानां कुरुसत्तम तद्वाक्यसमकालं तु कृतं सर्वं न्यवेदय
त् सहदेवो युधां श्रेष्ठो धर्मराजे महात्मनि ततो द्वैपायनो राजन्नृत्विग्भिः समुपानयत् वेदानिव महाभागान्साक्षान्मू
र्तिमतो द्विजान् स्वयं ब्रह्मत्वमकरोत्तस्य सत्यवतीसुतः धनंजयानामृषभः सुसामा सामगोऽभवत् याज्ञवल्क्यो बभूवाथ
धर्मिष्ठोऽध्वर्युसत्तमः पैलो होता वसोः पुत्रो धौम्येन सहितोऽभवत् एतेषां शिष्यवर्गाश्च पुत्राश्च भरतर्षभ बभूवुर्होत्रगाः
सर्वे वेदवेदांगपारगाः ते वाचयित्वा पुण्याहमूहयित्वा च तं विधिं शास्त्रोक्तं योजयामासुस्तद्देवयजनं महत् ततश्चक्रुरनु ॐ
ज्ञाताः शरणान्युत शिल्पिनः रत्नवंति विशालानि वेश्मानीव दिवौकसां ततस्त्वाज्ञापयामास सराजा राजसत्तमः आमं
त्रणार्थं दूतांस्त्वं प्रेषयस्वाशुगान्द्रुतं उपश्रुत्य वचो राज्ञः सदूतान्प्राहिणोत्तदा आमंत्रयध्वं राष्ट्रेषु ब्राह्मणान्भूमिपानपि
विशश्च मान्याञ्छूद्रांश्च सर्वानानयतेति ह वैशं० ते सर्वान्पृथिवीपालान्पांडवस्य शासनात् आमंत्रयांबभूवु
श्चानयांचापरान्द्रुतं ततस्ते तु यथाकालं कुंतीपुत्रं युधिष्ठिरं दीक्षयांचक्रिरे विप्रा राजसूयाय भारत दीक्षितः स
तु धर्मात्मा धर्मराजो युधिष्ठिरः जगाम यज्ञायतनं वृतो विप्रैः सहस्रशः भ्रातृभिर्ज्ञातिभिश्चैव सुहृद्भिः सचिवैस्तथा क्षत्रि

सभा० ३६ येचान्ये मनुष्येंद्र नानादेशसमागताः। अमात्यांश्च नृपश्रेष्ठ धर्मो विग्रहवानिव आजग्मुर्ब्राह्मणास्तत्र विषयेभ्यस्ततस्ततः
सर्वविद्यासु निष्णाता वेदवेदांगपारगाः तेषामावसथांश्चक्रुर्धर्मराजस्य शासनात् बह्वन्नाच्छादनैर्युक्तान्सगणानां पृथक्पृ
थक् सर्वर्तुगुणसंपन्नाञ्छिल्पिनोथ सहस्रशः तेषु ते न्यवसन्राजन्ब्राह्मणा नृपसत्कृताः कथयंतः कथा बह्वीः पश्यंतो
नटनर्तकान् भुंजतां चैव विप्राणां वदतां च महास्वनः अनिशं श्रूयते तस्मिन्मुदितानां महात्मनां दीयतां दीयतामेषां
भुज्यतां भुज्यतामिति एवंप्रकाराः संजल्पाः श्रूयंते स्मात्र सर्वशः गवां शतसहस्राणि शयनानां च भारत रुक्मस्य यो
षितां चैव धर्मराजः पृथग्ददौ प्रावर्तत्तैवं यज्ञः स पांडवस्य महात्मनः पृथिव्यामेकवीरस्य शक्रस्येव त्रिविष्टपे ततो युधि
ष्ठिरो राजा प्रेषयामास पांडवं नकुलं हस्तिनपुरं भीष्माय भरतर्षभ द्रोणाय धृतराष्ट्राय विदुराय कृपाय च भ्रातॄणां चै
व सर्वेषां ये नुरक्ता युधिष्ठिरे इति सभापर्वणि राजसूये ३२ वैशं० सगत्वा हास्तिनपुरं नकुलः समितिंजयः
भीष्ममामंत्रयामास धृतराष्ट्रं च पांडवः सत्कृत्यामंत्रितास्तेन आचार्यप्रमुखास्ततः प्रययुः प्रीतमनसो यज्ञं ब्रह्मपुरस्
राः संश्रुत्य धर्मराजस्य यज्ञं यज्ञविदस्तदा अन्ये च शतशस्तुष्टा मनोभिर्मनुजर्षभाः द्रष्टुकामास्सभां चैव धर्मराजं श्रीः
च पांडवं नानादिग्भ्यः समापेतुः पार्थिवास्तत्र भारत समुपादाय रत्नानि विविधानि च धृतराष्ट्रश्च भीष्मश्च ३६
विदुरश्च महामतिः दुर्योधनपुरोगाश्च भ्रातरः सर्व एव ते गांधारराजः सुबलः शकुनिश्च महाबलः अचलो वृषकश्चै
व कर्णश्च रथिनांवरः शल्यः शलश्च बलवान्बाह्लीकश्च महारथः सोमदत्तोथ कौरव्यो भूरिर्भूरिश्रवास्तथा अश्व

ल्व

त्थामा कृपो द्रोणः सैंधवश्च महाबलः यज्ञसेनः सपुत्रश्च शाल्वश्च वसुधाधिपः प्राग्ज्योतिषश्च नृपतिर्भगदत्तो महायशाः
सह सर्वैस्तथा म्लेंछैः सागरानूपवासिभिः पार्वतीयाश्च राजानो राजा चैव बृहद्बलः पौंड्रको वासुदेवश्च वंगकालिंगकास्त
था आकर्षाः कुंतलाश्चैव वानवास्यांध्रकास्तथा द्राविडाः सिंहलाश्चैव राजा काश्मीरकस्तथा कुंतिभोजो महातेजाः
सुह्मकश्च महाबलः बाल्हीकाश्चापरे शूरा राजानः सर्व एव ते विराटः सह पुत्राभ्यां माचेल्लश्च महारथः राजानो राजपु
रु त्राश्च नानाजनपदेश्वराः शिशुपालो महावीर्यः सहपुत्रेण भारत आगच्छत्पांडवेयस्य यज्ञं समरदुर्मदः रामश्चैवानिरु
द्धश्च नानाजनपदेश्वराः बभ्रुश्च सहसारणः गदप्रद्युम्नसांबाश्च चारुदेष्णश्च वीर्यवान् उल्मुको निशठश्चैव वीरश्चांगाव
हिरेव च वृष्णयो निखिलेनान्ये समाजग्मुर्महारथाः एते चान्ये च बहवो राजानो मध्यदेशजाः आजग्मुः पांडुपु
त्रस्य राजसूयं महाक्रतुं ददुस्तेषामावसथान्धर्मराजस्य शासनात् बहुभक्ष्यान्वितान्राजन्दीर्घिकावृक्षशोभितान्
तथा धर्मात्मजश्चैषां चक्रे पूजामनुत्तमां सत्कृताश्च यथोद्दिष्टाञ्जग्मुरावसथान्नृपाः कैलासशिखरप्रख्यान्मनो
ज्ञान्द्रव्यशोभितान् सर्वतः संवृतानुच्चैः प्राकारैः सुकृतैः सितैः सुवर्णजालविततान्मणिकुट्टिमशोभितान्
सुखारोहणसोपानान्महार्हसुपरिछदान् स्रग्दामसमवच्छन्नानुत्तमागरुगंधिनः हंसांशुवर्णसदृशानायो
जनसुदर्शनान् समद्वारानसंबाधान्युतानुच्चावचैर्गुणैः बहुधातुविचित्रांगान्हिमवच्छिखरानिव विश्रांतास्ते
तोपश्यन्भूमिपा भूरिदक्षिणं वृतं सदस्यैर्बहुभिर्धर्मराजं युधिष्ठिरं तत्सदः पार्थिवैः कीर्णं ब्राह्मणैश्च महात्मभिः भ्राज

ष्ठि

सभा० २७ तस्मिन् तदा राजसूये कृतं कृष्णमिवामरैः ॥ इति सभापर्वणि राजसूये ३३ वैशं० पितामहं गुरुं चैव प्रत्युद्गम्य युधिष्ठिरः अभिवाद्य ततो राजन्निदं वचनमब्रवीत् भीष्मं द्रोणं कृपं द्रौणिं दुर्योधनविविंशती अस्मिन्यज्ञे
भवंतो मामनुगृह्णंतु सर्वशः यदिहास्ति धनं मम प्रणयंतु धनं ताम्बा यथेष्टमभिमंत्रिताः एवमु
क्त्वा स तान्सर्वान्दीक्षितः पांडवाग्रजः युयोज स तथा योगमधिकारेष्वनंतरं भक्ष्यभोज्याधिकारेषु दुःशासनमयो
जयत् परिग्रहे ब्राह्मणानामश्वत्थामानमुक्तवान् राज्ञां तु प्रतिपूजार्थं संजयं समयोजयत् परिग्रहे ब्राह्मणानां
कृताकृतपरिज्ञाने द्रोणभीष्मौ महाधियौ हिरण्यस्य सुवर्णस्य रत्नानां चान्ववेक्षणे दक्षिणानां प्रदाने च कृपं रा
जान्ययोजयत् तथान्यान्पुरुषव्याघ्रांस्तस्मिंस्तस्मिन्न्ययोजयत् बाल्हीको धृतराष्ट्रश्च सोमदत्तो जयद्रथः नकु
लेन समानीतास्तत्र स्वामिवत्तत्र रेमिरे क्षत्ता व्ययकरस्त्वासीद्विदुरः सर्वधर्मवित् दुर्योधनस्त्वर्हणानि प्रतिजग्राह के
सर्वज्ञाः वैः चरणक्षालने कृष्णो ब्राह्मणानां स्वयं ह्यभूत् सर्वलोकसमावृत्तः पिप्रीषुर्धर्मजिस्पृहि द्रष्टुकामः सभां चैव
मराजं च पांडवं न कश्चिन्नाहरत्तत्र सहस्रावरमर्हणं रत्नैश्च बहुभिस्तत्र धर्मराजमवर्धयन् कथं तु मम कौरव्यो रत्न श्रीः
दानैः समाप्नुयात् यज्ञमित्येव राजानः स्पर्धमाना ददुर्धनं भवनैः सविमानाग्रैः सोदर्कैर्बलसंवृतैः लोकराज २७
विमानैश्च ब्राह्मणावसथैः सह कृतावसथैर्दिव्यैर्विमानप्रतिमैस्तथा विचित्रै रत्नवद्भिश्च ऋद्ध्या परमया युतैः
राजभिश्च समावृत्तैरतीव श्रीसमृद्धिभिः अशोभत तदा राजन्कौंतेयस्य महात्मनः ऋद्ध्या तु वरुणं देवं स्पर्धमा

नो युधिष्ठिरः षडग्निनाथ यज्ञेन सोयजद्दक्षिणावता सर्वाञ्जनान्सर्वकामैः समृद्धैः समतर्पयत् अन्नवान्बहुभक्ष्यश्च भुक्तवज्जनसंवृ
तः रत्नोपहारसंपन्नो बभूव स समागमः इडाज्यहोमाहुतिभिर्मंत्रशिक्षाविशारदैः तस्मिन्हि ततृपुर्देवास्तते यज्ञे महर्षिभिः य
था देवास्तथा विप्रा दक्षिणाभिर्महाधनैः ततृपुः सर्ववर्णाश्च तस्मिन्यज्ञे मुदान्विताः ॥ इति सभापर्वणि राजसूये
३४ वैशं० ततो ऽभिषेचनीयेऽह्नि ब्राह्मणा राजभिः सह अंतर्वेदीं प्रविविशुः सत्कारार्थं महर्षयः नारदप्रमुखास्तस्यामं
तर्वेद्यां महात्मनः समासीनाः शुशुभिरे सह राजर्षिभिस्तदा समेता ब्रह्मसदने देवा देवर्षयो यथा कर्मांतरमुपासंतो जजल्पु
रमितौजसः एवमेतन्न चाप्येवमेवं चैतन्न चान्यथा इत्यूचुर्बहवस्तत्र वितंडावै परस्परं कृशानर्थांस्तथा केचिदकृशांस्तत्र कुर्व
त अकृशांश्च कृशांश्चक्रुर्हेतुभिः शास्त्रनिश्चितैः तत्र मेधाविनः केचिदर्थमन्यैरुदीरितं विचिक्षिपुर्यथा श्येना नभोग
तमिवामिषं केचिद्धर्मार्थसंयुक्ताः कथास्तत्र महाव्रताः रेमिरे कथयंतश्च सर्ववेदविदां वराः सा वेदी वेदसंपन्नैर्देवद्विजमहर्षि
भिः आबभासे समाकीर्णा नक्षत्रैर्द्यौरिवामला न तस्यां संनिधौ शूद्रः कश्चिदासीन्न चाव्रतः अंतर्वेद्यां तदा राजन्युधि
ष्ठिरनिवेशने तां तु लक्ष्मीवतो लक्ष्मीं तदा यज्ञविधानजां तुतोष नारदः पश्यन्धर्मराजस्य धीमतः अथ चिंतां समापेदे स
मुनिर्मनुजाधिप नारदस्तं तथा पश्यन्सर्वक्षत्रसमागमं संस्मार च पुरा वृत्तां कथां तां पुरुषर्षभ अंशावतरणे यासौ ब्र
ह्मणो भवनेऽभवत् देवानां संगमं तं तु विज्ञाय कुरुनंदन नारदः पुंडरीकाक्षं सस्मार मनसा हरिं स साक्षाद्विबुधारिघ्नः क्षत्रे नारा
यणः प्रभुः प्रतिज्ञां पालयन्धीमाञ्जातः परपुरंजयः संदिदेश पुरा यो सौ विबुधान्भूतकृत्स्वयं अन्योन्यमभिनिघ्नंतः
पुनर्लोकानवाप्स्यथ इति नारायणः शंभुर्भगवान्भूतभावनः आदिश्य विबुधान्सर्वानजायत यदुक्षये क्षितौ

न्दे

बंधकृद्द्धीनोवेदवेदांगवित्तांवरः ॥ परयाप्युत्थ्युमेलक्ष्म्यानक्षत्राणामिवोडुराट् यस्यबाहुबलेसेंद्राःसुराःसर्वउपासते
 सोयंमानुषवन्नामहरिरास्तेरिमर्दनः अहोवतमहद्भूतंस्वयंभूर्यदिदंस्वयं आदास्यतिपुनःक्षत्रमेवंबलसमन्वितं इ
त्येतान्नारदस्त्वितांचिंतयामासधर्मवित् हरिंनारायणंज्ञात्वायज्ञैरीड्यंतमीश्वरं तस्मिन्धर्मविदांश्रेष्ठोधर्मराजस्यधीम
तः महाध्वरेमहाबुद्धिस्तस्थौसबहुमानतः ततोभीष्मोब्रवीद्राजन्धर्मराजंयुधिष्ठिरं क्रियतामर्हणंराज्ञांयथार्हमितिभार
त आचार्यमृत्विजंचैवसंयुजंचयुधिष्ठिर स्नातकंचप्रियंचैवषडर्घ्यार्हान्नृपंतथा एतानर्घ्यानभिगतानाहुःसंवत्सरो
षितान् तइमेकालपूगस्यमहतोस्मानुपागताः एषामेकैकशोराजन्नर्घःसमुपनीयतां अथैषांचवरिष्ठायस
मर्थायोपनीयतां युधिष्ठिरउवाच कस्मैभवान्मन्यतेर्घमेकस्मैकुरुनंदन उपनीयमानंतत्कर्तंतन्मेब्रूहिपित
मह वैशंपायन० ततोभीष्मःशांतनवोबुध्यानिश्चित्यभारत अमन्यतततःकृष्णमर्हणीयतमंभुवि एषह्येषांसम राम
स्तानांतेजोबलपराक्रमैः मध्येतपन्निवाभातिज्योतिषामिवभानुमान् असूर्यमिवसूर्येणनिवातमिववायुना ३८
भासितंह्लादितंचैवकृष्णेनेदंसदोहिनः तस्मैभीष्माभ्यनुज्ञातःसहदेवःप्रतापवान् उपाजह्रेथविधिवद्वार्ष्णेया
यार्घ्यमुत्तमं प्रतिजग्राहतंकृष्णःशास्त्रदृष्टेनकर्मणा शिशुपालस्तुतांपूजांवासुदेवेनचक्षमे उपालभ्यच
भीष्मंचधर्मराजंचसंसदि अपाक्षिपद्वासुदेवंचेदिराजोमहाबलः इतिसभापर्वणिअर्घ्याभिहरणे ३८
शिशुपालउवाच नायमर्हतिवार्ष्णेयस्तिष्ठत्स्विहमहात्मसु महीपतिषुकौरव्यराजवत्पार्थिवोर्हणां नायंयु
क्तःसमाचारःपांडवानांमहात्मनां यत्कामात्पुंडरीकाक्षंपांडवार्चितवानसि बालायूयंनजानीध्वंधर्मःसूक्ष्मोहि

पांडवाः अयंचस्मृत्यतिक्रांतआपगेयोल्पदर्शनः त्वादृशोधर्मयुक्तोहिकुर्वाणःप्रियकाम्यया भवत्यभ्यधिकंभीष्मोलोके
वमतःपरं कथंह्यराजादाशार्हौमध्येसर्वमहीक्षितां अर्हणामर्हतितथायथायुष्माभिरर्चितः अथवामन्यसेकृष्णंस्थविरं
रतर्षभ वसुदेवेस्थितेवृद्धेकथमर्हतितत्सुतः अथवावासुदेवोपिप्रियकामोनुवृत्तवान् द्रुपदेतिष्ठतिकथंमाधवोर्हतिपूजनं
आचार्यंमन्यसेकृष्णमथवाकुरुनंदन द्रोणेतिष्ठतिवार्ष्णेयंकस्मादर्चितवानसि ऋत्विजंमन्यसेकृष्णमथवाकुरुनंदन द्वैपा
यनेस्थितेकृष्णेकथंकृष्णोर्चितस्त्वया भीष्मेशांतनवेवृद्धेस्थितेपुरुषसत्तम स्वच्छंदमृत्युकेराजन्कथंकृष्णोर्चितस्त्वया अ
श्वत्थाम्निस्थितेवीरसर्वशास्त्रविशारदे कथंकृष्णस्त्वयाराजन्नर्चितःकुरुनंदन दुर्योधनेचराजेंद्रेस्थितेपुरुषसत्तमे कृत
वज्जरतीवार्ये कथंकृष्णोर्चितस्त्वया द्रुमंकिंपुरुषाचार्यमतिक्रम्यतथार्चितः भीष्मकेचदुराधर्षेपांडुवत्कृतलक्षणे
नृपेरुक्मिणिश्रेष्ठेएकलव्येतथैवच शल्येमद्राधिपेचैवकथंकृष्णोर्चितस्त्वया अयंचसर्वराज्ञांयोबलश्लाघीमहारथः
जामदग्न्यस्यदयितःशिष्योविप्रस्यभारत येनात्मबलमाश्रित्यराजानोयुधिनिर्जिताः तंचकर्णमतिक्रम्यकथंकृ
ष्णोर्चितस्त्वया नैवऋत्विङ्नचाचार्योनराजायंबलानुजः अर्चितःकुरुशार्दूलकिमन्यत्प्रियकाम्यया अथवाप्यर्चनी
यायंयुष्माकंमधुसूदनः किंराजभिरिहानीतैरवमानायभारत वयंतुनभयादस्यकौंतेयस्यमहात्मनः प्रयच्छामकरा
न्सर्वेनलोभान्नसांत्वनात् अस्यधर्मप्रवृत्तस्यपार्थिवत्वंचिकीर्षतः करानस्मैप्रयच्छामःसोयमस्मान्नमन्यते
किमन्यदवमानाद्धियदेवंराजसंसदि अप्राप्तलक्षणंकृष्णमर्घेणार्चितवान्नृपः अकस्माद्धर्मपुत्रस्यधर्मात्मेतियशो

सभा० ३० गतं स हि धर्मच्युतो राजा कृष्णोमेवं समाचरन् योयं वृष्णिकुले जातो राजानं हतवान्पुरा जरासंधं महात्मानमन्या
येन दुरात्मवान् अद्य धर्मात्मतां चैव व्यपकृष्टा युधिष्ठिरात् दर्शितं कृपणत्वं च कृष्णेर्घ्यस्य निवेदनात् यदि भीताश्च
कौंतेयाः कृपणाश्च तपस्विनः ननु त्वयापि बोद्धव्यं यां पूजां माधवोर्हति अथवा कृपणैरेतामुपनीतां जनार्दन पूजा
मनार्हः कस्मात्त्वमभ्यनुज्ञातवानसि अयुक्तामात्मनः पूजां त्वं पुनर्बहुमन्यसे हविषः प्राप्य निस्यंदं प्राशितुं श्वे
वनिर्जने नत्वयं पार्थिवेंद्राणामपमानः प्रयुज्यते त्वामेव कुरवो व्यक्तं प्रलंभंते जनार्दन क्लीबे यो दारक्रिया यादृशं
अन्धे वा रूपदर्शनं अराज्ञो राजवत्पूजा तथा ते मधुसूदन दृष्टो युधिष्ठिरो राजा दृष्टो भीष्मश्च यादृशः वासुदेवोप्ययं
दृष्टः सर्वमेव यथातथं इत्युक्त्वा शिशुपालस्तानुत्थाय परमासनात् निर्ययौ सदसस्तस्मात्सहितो राजभिस्त
दा इति सभापर्वणि अर्घाभिहरणे ३६ वैशं० ततो युधिष्ठिरो राजा शिशुपालमुपाद्रवत्
उवाच चैनं मधुरं सांत्वपूर्वमिदं वचः नेदं युक्तं महीपाल त्वादृशं वक्तुमीदृशं अधर्मश्च परो राजन्पारुष्यं च निरर्थकं
नहि धर्मं परं जातु नावबुध्येत पार्थिवः भीष्मः शांतनवस्त्वेवं मावमंस्थास्त्वमन्यथा पश्य चेमान्महीपालांस्त्वत्तो वृद्ध श्रीः
तमान्बहून् मृष्यंति चार्हणां कृष्णे तद्वत्त्वं क्षंतुमर्हसि वेद तत्त्वेन कृष्णं हि भीष्मश्चेदिपते भृशं न ह्येनं त्वं तथा वेत्थ
यथायं वेत्ति कौरवः भीष्मः नास्मा अनुनयो देयो नायमर्हति सांत्वनं लोकवृद्धतमे कृष्णे योर्हणां नानुम ३०
न्यते क्षत्रियः क्षत्रियं जित्वा रणे रणकृतां वरः यो मुंचति वशे कृत्वा गुरुर्भवति तस्य सः अस्यां हि समितौ राज्ञाम

कमप्यजितं रणे नपश्यामि महीपालं सात्वतीपुत्रतेजसा नहि केवलमस्माकमयमर्च्यतमोच्युतः त्रयाणामपि
लोकानामर्चनीयो जनार्दनः कृष्णेन हि जिता युद्धे बहवः क्षत्रियर्षभाः जगत्सर्वं च वार्ष्णेये निखिलेन प्रतिष्ठितं तस्मात्सत्स्व
पि वृद्धेषु कृष्णमर्चाम नेतरान् एवं वक्तुं न चार्हस्त्वं मा भूत्ते बुद्धिरीदृशी ज्ञानवृद्धा मया राजन्बहवः पर्युपासिताः तेषां कथय
तां शौरेरहं गुणवतो गुणान् समागतानामश्रौषं बहून्बहुमतान्सतां कर्माण्यपि च यान्यस्य जन्मप्रभृति धीमतः बहुशः क
थ्यमानानि नरैर्भूयः श्रुतानि मे न केवलं वयं कामाच्चेदिराज जनार्दनं न संबंधं पुरस्कृत्य कृतार्थं वा कथंचन अर्चया
मोर्चितं सद्भिर्भुवि भीमपराक्रमं यशः शौर्यं बलं चास्य विज्ञायार्चां प्रयुंज्महे नहि कश्चिदिहास्माभिर्बालोप्यपरीक्षितः
गुणैर्वृद्धानतिक्रम्य हरिरर्च्यतमो मतः ज्ञानवृद्धो द्विजातीनां क्षत्रियाणां बलाधिकः वैश्यानां धान्यधनवान् शूद्राणाम
व जन्मतः पूज्यतायां च गोविंदे हेतू द्वावपि संस्थितौ वेदवेदांगविज्ञानं बलं चाप्यमितं तथा नृणां हि लोके कोन्योस्ति विशि
ष्टः केशवादृते दानं दाक्ष्यं श्रुतं शौर्यं ह्रीः कीर्तिर्बुद्धिरुत्तमा संततिः श्रीर्धृतिस्तुष्टिः पुष्टिश्च नियताच्युते तमिमं लोकसंपन्न
माचार्यं पितरं गुरुं अर्च्यमर्चितमर्चार्हं सर्वे संमंतुमर्हथ ऋत्विग्गुरुर्विवाह्यश्च स्नातको नृपतिः प्रियः सर्वमेतद्धृषीकेशस्त
स्मादभ्यर्चितोच्युतः कृष्ण एव हि लोकानामुत्पत्तिरपि चाव्ययः कृष्णस्य हि कृते भूतमिदं विश्वं चराचरं एष प्रकृतिरव्यक्ता क
र्ता चैव सनातनः परश्च सर्वभूतेभ्यस्तस्मात्पूज्यतमोच्युतः बुद्धिर्मनो महान्वायुस्तेजोंभः खं मही च या चतुर्विधं च यद्भूतं सर्वं कृ ७
ष्णे प्रतिष्ठितं अग्निहोत्रमुखा वेदा गायत्री छंदसां मुखं नक्षत्राणां मुखं चंद्र आदित्यस्तेजसां मुखं पर्वतानां मुखं मेरुर्गरुडः

सभा० पततां पथा ऊर्ध्वं तीर्यग्गधश्चैव यावती इंगते गतिः सदेवकेषु लोकेषु भगवान्केशवो मुखं अयं तु पुरुषो बालः शिशुपालो
५० न बुध्यते सर्वत्र सर्वदा कृष्णं कोवाच्यनेनं एवं इयत् योहि धर्मं विचिनुयादुत्कृष्टं मतिमान्नरः सवै पश्येद्यथा धर्मं न
तथा चेदिराडयं सद्वृद्धबालेषु तथा पार्थिवेषु महात्मसु कोनार्हं मन्यते कृष्णं कोवाच्यनेनं न एवं इयत् अथ मां दुष्कृतां एवं
शिशुपालो व्यवस्यति दुष्कृतायां पथान्यायं तथा कर्तुमिहार्हसि इति सभापर्वणि अर्घाभिहरणे ३७
वैशं० एवमुक्त्वा ततो भीष्मो विरराम महायशाः व्याजहारोत्तरं तत्र सहदेवो महामनाः केशवं केशिहंतारमप्रमेय
पराक्रमं पूज्यमानं मया यो वः कृष्णं न सहते नृपाः सर्वेषां बलिनां मूर्ध्नि मयेदं निहितं पदं एवमुक्ते मया सम्यगुत्तरं प्रब्र
वीतु सः स एव हि मया वध्यो भविष्यति न संशयः मतिमंतस्तु ये केचिदाचार्यं नृपतिं गुरुं अर्घ्यमर्थितमर्घार्हमनुजानंतु
ते नृपाः ततो न व्याजहारैषां कश्चिद्बुद्धिमतां सतां मानिनां बलिनां राज्ञां मध्ये संदर्शिते पदे ततोपतत्पुष्पवृष्टिः सहदे
वस्य मूर्द्धनि अदृश्यरूपा वाचश्च निश्चेरुः साधु साध्विति आविध्यदजिनं कृष्णं भविष्यद्भूतजल्पकः सर्वसंशयनि
र्मोक्ता नारदः सर्वधर्मवित् उवाचाखिलभूतानां मध्ये स्पष्टतरं द्विजः कृष्णं कमलपत्राक्षं नार्चयिष्यंति ये नराः जी
वन्मृतास्तु ते ज्ञेया न संभाष्याः कदाचन वैशं० तत्राहुतागताः सर्वसुनीथप्रमुखा गणाः संप्रादृश्यंत संक्रुद्धा श्री:
विवर्णवदनास्तथा युधिष्ठिराभिषेकं च वासुदेवस्य चार्हणं अब्रुवंस्तत्र राजानो निर्वेदादात्मनिश्चयात् सुहृद्भिर्वार्य ४०
माणानां तेषां हि वपुराबभौ आमिषादपकृष्टानां सिंहानामिव गर्जतां तं बलौघमपर्यंतं राजसागरमक्षयं

कुर्वाणं समयं कृष्णो युद्धाय बुबुधे तदा पूजयित्वा पूजार्हं ब्रह्मक्षत्रविशेषवित् सहदेवो नृणां देवः समापयत कर्म तत् तस्मि
न्नभ्यर्चिते कृष्णे सुनीथः शत्रुकर्शनः अतिताम्रेक्षणः कोपादुवाच मनुजाधिपान् स्थितः सेनापतिर्वोहं मन्यध्वं किं नु सांप्रतं
अधितिष्ठाम संनद्धान्समेतान्वृष्णिपांडवान् इति सर्वान्समुत्साह्य राज्ञस्तांश्चेदिपुंगवः यज्ञोपघाताय ततः संमंत्रयत राज
भिः इति सभापर्वण्यर्घाभिहरणे ३८ वैशं० ततः सागरसंकाशं दृष्ट्वा नृपतिमंडलं संवर्तवाताभिहतं भी
मं क्षुब्धमिवार्णवं रोषात्प्रचलितं सर्वमिदमाह युधिष्ठिरः भीष्मं मतिमतां श्रेष्ठं वृद्धं कुरुपितामहं बृहस्पतिं बृहत्तेजाः पु
रुहूत इवारिहा असौ रोषात्प्रचलितो महान्नृपतिसागरः अत्र यत्प्रतिपत्तव्यं तन्मे ब्रूहि पितामह यज्ञस्य च न विघ्नः
स्यात्प्रजानां च हितं भवेत् यथा सर्वत्र नस्तत्तु तन्मे ब्रूहि पितामह इत्युक्तवति धर्मज्ञे धर्मराजे युधिष्ठिरे उवाचेदं व
चो भीष्मस्ततः कुरुपितामहः मा भैस्त्वं कुरुशार्दूल श्वा सिंहं हंतुमर्हति शिवः पंथाः सुनीतोत्र मया पूर्वतरं वृतः प्रसुप्ते हि तथा ति
सिंहे श्वानस्तत्र समागताः भषेयुः सहिताः सर्वे तथामी वसुधाधिपाः वृष्णिसिंहस्य सुप्तस्य तथेमे प्रमुखे स्थिताः भ
षंते तात संक्रोधाः श्वानः सिंहस्य सन्निधौ नहि संबुध्यते यावत्सुप्तः सिंहस्य सन्निधौ नहि संबुध्यते यावत्सुप्तः सिंह
स्तुप्र इवाच्युतः तेन सिंहीकरोत्येतान्नृसिंहश्चेदिपुंगवः पार्थिवान्पार्थिवश्रेष्ठ शिशुपालोल्पचेतनः सर्वान्सर्वात्मना तात
नेतुकामो यमक्षयं नूनमेतत्समादातुं पुनरिच्छत्यधोक्षजः यदस्य शिशुपालस्य तेजस्तिष्ठति भारत विप्लुता चास्य बुद्धि
र्बुद्धिर्बुद्धिमतां वर चेदिराजस्य कौंतेय सर्वेषां च महीक्षितां आदातुं हि नरव्याघ्रो यं यमिच्छत्ययं यदा तस्य

सभा० विप्लवेत बुद्धिरेवं चेदिपतेर्यथा चतुर्विधानां भूतानां त्रिषु लोकेषु माधवः प्रभवश्चैव सर्वेषां निधनं च युधिष्ठिर
४१ वेशं० इति तस्य वचः श्रुत्वा ततश्चेदिपतिर्नृपः भीष्मं रूक्षाक्षरा वाचः श्रावयामास भारत इति सभापर्व
णि शिशुपालवधे ३० शिशुपाल उवाच विभीषिकाभिर्बह्वीभिर्भीषयन्सर्वपार्थिवान् नव्यपत्रपसे क
स्माद्वृद्धः सन्कुलपांसन युक्तमेतत्तृतीयायां प्रकृतौ वर्तता त्वया वक्तुं धर्मादपेतार्थं त्वं हि सर्वकुरूत्तमः नावि नौरिव संब
द्धा यथांधो वांधमन्वियात् तथाभूता हि कौरव्या येषां भीष्म त्वमग्रणीः पूतनाघातपूर्वाणि कर्माण्यस्य विशेषतः त्वया कीर्त
यतास्माकं भूयः प्रव्यथितं मनः अवलिप्तस्य मूर्खस्य केशवं स्तोतुमिच्छतः कथं भीष्मस्य ते जिह्वा शतधेयं विदीर्यते यत्र कु
त्सा प्रयोक्तव्या भीष्म बालतरैर्नरैः तमिमं ज्ञानवृद्धः सन्गोपं संस्तोतुमिच्छसि यद्यनेन हता बाल्ये शकुनिश्चित्रमत्र किं तौ वा
श्ववृषभौ भीष्म यौ न युद्धविशारदौ चेतनारहितं काष्ठं यद्यनेन निपातितं पादेन शकटं भीष्म तत्र किं कृतमद्भुतं वल्मी
कमात्रः सप्ताहं यद्यनेन धृतोऽचलः तदा गोवर्धनो भीष्म न तच्चित्रं मतं मम भुक्तमेतेन बह्वन्नं क्रीडता नगमूर्धनि इति ते
भीष्म शृण्वानाः परं विस्मयमागताः यस्य चानेन धर्मज्ञ भुक्तमन्नं बलीयसः स चानेन हतः कंस इत्येतन्न महाद्भुतं न ते श्रुतमि
दं भीष्म नूनं कथयतां सतां यद्वक्ष्ये त्वामधर्मज्ञ वाक्यं कुरुकुलाधम स्त्रीषु गोषु न शस्त्राणि पातयेद्ब्राह्मणेषु च यस्य चान्नानि भुं
जीत यस्य च स्यात्प्रतिश्रयः इति संतोऽनुशासंति सज्जना धर्मिणः सदा भीष्म लोके हि तत्सर्वं वितथं त्वयि दृश्यते ज्ञानवृद्धं च वृद्धं
च भूयांसं केशवं मम अजानत इवाख्यासि संस्तुवन्कुरुसत्तम गोघ्नः स्त्रीघ्नश्च सन्भीष्म कथं संस्तवमर्हति असौ मतिमतां श्रे

श्रु
श्रीः
४१

स एव जगतां पतिः संभावयति यच्चैवं त्वद्वाक्याच्च जनार्दनः एवमेतत्सर्वमिति सर्वं तद्वितथं ध्रुवं न गाथा गाथिनं शास्ति बहु चेदपि गाय
ति प्रकृतिं यांति भूतानि भूलिंगशकुनिर्यथा नूनं प्रकृतिरेषा ते जघन्या नात्र संशयः अतः पापीयसी चैषां पांडवानामपीष्यते
येषामर्च्यतमः कृष्णस्त्वं च येषां प्रदर्शकः सर्वथा त्वमधर्मज्ञः सतां मार्गादवप्लुतः को हि धर्मिणमात्मानं जानन्ज्ञानवतां वरः
कुर्याद्यथा त्वया भीष्म कृतं धर्मान्ववेक्षया अन्यकामा हि धर्मज्ञ कन्यका प्राज्ञमानिना अंबा नामेति सहंते कथं सापहृता त्व
या यां त्वयापहृतां भीष्म कन्यां नैषितवान्नृपः भ्राता विचित्रवीर्यस्ते सतां वृत्ते व्यवस्थितः दारयोर्यस्य चान्येन मिषतः प्राज्ञमानि
नः उत्पादितान्यपत्यानि सज्जनाचरिते पथि को हि धर्मोऽस्ति ते भीष्म ब्रह्मचर्यमिदं वृथा यद्धारयसि मोहाद्वा क्लीबत्वाद्वा
न संशयः न त्वहं तव धर्मज्ञ पश्याम्युपचयं क्वचित् न हि ते सेविता वृद्धा य एवं धर्ममब्रवीः इष्टं दत्तमधीतं च यज्ञाश्च
बहुदक्षिणाः सर्वमेतदपत्यस्य कलां नार्हति षोडशीं व्रतोपवासैर्बहुभिः कृतं भवति भीष्म यत् सर्वं तदनपत्यस्य मोघं
भवति निश्चयात् सोऽनपत्यश्च वृद्धश्च मिथ्याधर्मानुसारकः हंसवत्त्वमिदानीं हि ज्ञातिभ्यः प्राप्नुयाद्वधं एवं हि कथयं
त्यन्ये नरा ज्ञानविशारदाः भीष्म यत्तदहं सम्यग्वक्ष्यामि तव शृण्वतः वृद्धः किल समुद्रांते कश्चिद्धंसोऽभवत्पुरा धर्म
वागन्यथावृत्तः पक्षिणः सोऽनुशास्ति ह धर्मं चरत माधर्ममिति तस्य वचः किल पक्षिणः शुश्रुवुर्भीष्म सततं धर्मवादिनः
अथास्य भक्ष्यमाजह्रुः समुद्रजलचारिणः अंडजा भीष्म तस्यान्ये धर्मार्थमिति शुश्रुमः ते च तस्य समभ्याशे निक्षिप्यां
डानि सर्वशः समुद्रांभस्यमज्जंत चरंतो भीष्म पक्षिणः तेषामंडानि सर्वेषां भक्षयामास पापकृत् स हंसः संप्रमत्ता
नामप्रमत्तः स्वकर्मणि ततः प्रक्षीयमाणेषु तेष्वंडेष्वंडजोऽपरः अशंकत महाप्राज्ञः स कदाचिद्ददर्श ह ततः स कथयामास

सभा० दृष्ट्वा हंसस्य किल्बिषं तेषां परमदुःखार्त्तैः स पक्षी सर्वपक्षिणां ततः प्रत्यक्षतो दृष्ट्वा पक्षिणस्ते समागताः निजघ्नु
५२ स्तं तदा हंसं मिथ्यावृत्तं कुरूत्तम तेषां हंससधर्मा त्वमपीमे वसुधाधिपाः निहन्युर्भीष्म संक्रुद्धाः पक्षिणस्तमिवांड
जं गाथामप्यत्र गायंति ये पुराणविदो जनाः भीष्म यां तां च ते सम्यक् कथयिष्यामि भारत अंतरात्मनि विहिते रौषि पत्ररथा
शुचि अंडभक्षणं कर्म तत्तव वाचमतीयते इति सभापर्वणि शिशुपालवधे ५० शिशुपाल० स मे बहुम
तो राजा जरासंधो महाबलः योनेन युद्धं नेयेष दासोयमिति संयुगे केशवेन कृतं यत्तु जरासंधवधे तदा भीमसेनार्जु
नाभ्यां कस्तत्साध्विति मन्यते अद्वारेण प्रविष्टेन छद्मना ब्रह्मवादिना दृष्टः प्रभावः कृष्णेन जरासंधस्य धीमतः
येन धर्मात्मनात्मानं ब्रह्मण्यमभिजानता नैषितं पाद्यमस्मै तु दातुमग्रे दुरात्मने भुज्यतामिति तेनोक्ताः कृ
ष्णभीमार्जुनास्तदा जरासंधेन कौरव्य कृष्णेन विकृतं कृतं यद्ययं जगतः कर्ता यथैनं मूर्ख मन्यसे कस्मान्न ब्राह्मणं
सम्यगात्मानमवगच्छति इदं त्वाश्चर्यभूतं मे यदिमे पांडवास्त्वया अपकृष्टाः सतां मार्गान्मन्यंते तत्च साध्विति अथ
वा नैतदाश्चर्यं येषां त्वमसि भारत स्त्रीसधर्मा च वृद्धश्च सर्वार्थानां प्रदर्शकः वैशं० तस्य तद्वचनं श्रुत्वा रूक्षं रू
क्षाक्षरं बहु चुकोप बलिनां श्रेष्ठो भीमसेनः प्रतापवान् तस्य पद्मप्रतीकाशे स्वभावायतविस्तृते भूयः क्रोधाभिता
म्रांतरे नेत्रे बभूवतुः त्रिशिखां भ्रुकुटीं चास्य ददृशुः सर्वपार्थिवाः ललाटस्थां त्रिकूटस्थां गंगां त्रिपथगामिव श्री:
दंतान्संदशतस्तस्य कोपाद् ददृशुराननं युगांते सर्वभूतानि कालस्येव दिधक्षतः उत्पतंतं तु वेगेन जग्राहैनं म ५२
नस्विनं भीष्म एव महाबाहुर्महासेनमिवेश्वरः तस्य भीमस्य भीष्मेण वार्यमाणस्य भारत गुरुणा विविधैर्वा

क्यैः क्रोधः प्रशममागतः नातिचक्राम भीष्मस्य स हि वाक्यमरिंदमः समुद्धूतो घनापाये वेलामिव महोदधिः
शिशुपालस्तु संक्रुद्धे भीमसेने जनाधिपः नाकंपत तदा वीरः पौरुषे स्वे व्यवस्थितः उत्पतंतं तु वेगेन पुनः पुनररिंदम
न स तं चिंतयामास सिंहः क्षुद्रमृगं यथा प्रहसंश्चाब्रवीद्वाक्यं चेदिराजः प्रतापवान् भीमसेनमभिक्रुद्धं दृष्ट्वा भीमप
राक्रमं मुंचैनं भीष्म पश्यंतु सर्व एव नराधिपाः मत्प्रभावविनिर्दग्धं पतंगमिव वह्निना ततश्चेदिपतेर्वाक्यं तच्छ्रुत्वा
कुरुसत्तमः भीमसेनमुवाचेदं भीष्मो मतिमतां वरः इति सभापर्वणि शिशुपालवधे ५१
भीष्म० चेदिराजकुले जातस्त्र्यक्ष एष चतुर्भुजः रासभारावसदृशं रुराव च ननाद च तेनास्य मातापितरौ त्रेस
तुस्तौ सबांधवौ वैकृतं तस्य तद्दृष्ट्वा त्यागाय कुरुतां मतिं ततः सभार्यं नृपतिं सामात्यं सपुरोहितं चिंतासंमूढहृदयं
गु वागुवाचाशरीरिणी एष ते नृपते पुत्रः श्रीमान्जातो महाबलः तस्मादस्मान्न भेतव्यमव्यग्रः पाहि वै शिशुं न चैवैतस्य
मृत्युर्वै न कालः प्रत्युपस्थितः यश्च शस्त्रेण हंतास्य स चोत्पन्नो नराधिप संश्रुत्योदाहृतं वाक्यं भूतमंतर्हितं त
तः पुत्रस्नेहाभिसंतप्ता जननी वाक्यमब्रवीत् येनेदमीरितं वाक्यं ममैतं तनयं प्रति प्रांजलिस्तं नमस्यामि ब्रवी
तु स पुनर्वचः यथातथ्येन भगवान्देवो वा यदि वेतरः श्रोतुमिच्छामि पुत्रस्य कोस्य मृत्युर्भविष्यति अंतर्हितं
ततो भूतमुवाचेदं पुनर्वचः येनोत्संगे गृहीतस्य भुजावभ्यधिकावुभौ पतिष्यतः क्षितितले पंचशीर्षाविवोरगौ
तृतीयमेतद्बालस्य ललाटस्थं च लोचनं निमज्जिष्यति यं दृष्ट्वा सोस्य मृत्युर्भविष्यति त्र्यक्षं चतुर्भुजं श्रुत्वा तथा
च समुदाहृतं धरण्यां पार्थिवाः सर्वे अभ्यगच्छन्दिदृक्षवः तान्पूजयित्वा संप्राप्तान्यथार्हं

पु

सभा० समहीपालः एकैकस्य नृपस्यांके पुत्रमारोपयत्तदा एवं राजसहस्राणां पृथक्त्वेन यथाक्रमं शिशुरंके समारूढो
४३ न तत्प्राप निदर्शनं एतदेव तु संश्रुत्य द्वारवत्यां महाबलौ ततश्चेदिं प्राप्तौ संकर्षणजनार्दनौ यादवौ यादवीं द्रष्टुं स्वसा
रं तां पितुस्तदा अभिवाद्य यथान्यायं यथाज्येष्ठं नृपांश्च तौ कुशलानामयं पृष्ट्वा निषण्णौ रामकेशवौ अभ्यर्चितौ त
दा वीरौ प्रीत्या चाप्यधिकं ततः पुत्रं दामोदरस्यांके देवी सान्यदधत्स्वयं न्यस्तमात्रस्य तस्यांके भुजावभ्यधिकावु
भौ पेततुस्तच्च नयनं न्यमज्जत ललाटजं तं दृष्ट्वा व्यथिता त्रस्ता वरं कृष्णमयाचत प्रयच्छ मे वरं कृष्ण भयार्ताया महा
भुज त्वमार्तानामार्तानां महाश्वासो भीतानामभयंकरः एवमुक्तस्ततः कृष्णः सोऽब्रवीद्यदुनंदनः मा भैषीर्देवि धर्मज्ञे
न मत्तोऽसि भयं तव ददामि किं वरं किं वा करवाणि पितृष्वसः शक्यं वा यदि वाशक्यं करिष्यामि वचस्तव एवमु
क्ताब्रवीत्कृष्णं ततः सा यदुनंदनं शिशुपालापराधांस्त्वं क्षमेथा यदुनंदन मत्कृते यदुशार्दूल विज्ञेयं मे वरं प्रभो

कृष्ण० अपराधशतं क्षाम्यं मया ह्यस्य पितृष्वसः पुत्रस्य ते वधार्हाणां मा त्वं शोके मनः कृथाः

भीष्म० एवमेष नृपः पापः शिशुपालोऽतिमंदधीः त्वां समाह्वयते भीम गोविंदवरदर्पितः

इति सभापर्वणि शिशुपालवधे ४२ भीष्म० नैषा चेदिपतेर्बुद्धिर्यया त्वाह्वयतेऽच्युतं श्रीः
नूनमेष जगद्भर्तुः कृष्णस्यैष विनिश्चयः को हि मां भीमसेनाद्य क्षितावर्हति पार्थिवः क्षेप्तुं कालपरीता ४३
त्मा यथैव कुलपांसनः एष ह्यस्य महाबाहो तेजोंऽशश्च हरेर्ध्रुवं तमेव पुनरादातुमिच्छत्ययशो विभुः

म०

येन षकुरुशार्दूल शार्दूल इव चेदिराट् गर्जत्यतीव दुर्बुद्धिः सर्वानस्मानचिंतयन् वैशं० ततो न ममृषे चैद्यस्तद्भीष्मवच
नं तदा उवाच चैनं संक्रुद्धः पुनर्भीष्ममथोत्तरं शिशुपालः द्विषतां नोऽस्तु भीष्मैव प्रभावः केशवस्य यः यस्य संस्तववक्ता
शि त्वं बंदिवत्सततोत्थितः संस्तवे च मनो भीष्म परेषां रमते यदि तव यदि संस्तौषि राज्ञस्त्वमिमं हित्वा जनार्दनं दरदं स्तुहि बाल्हि
कमिमं पार्थिवसत्तमं जायमानेन येनेयमभवद्दारिता मही वंगांगविषयाध्यक्षं सहस्राक्षसमं बले स्तुहि कर्णमि
मं भीष्म वरं सर्वधनुष्मतां यस्येमे कुंडले दिव्ये सहजे देवनिर्मिते कवचं च महाबाहो बालार्कसदृशप्रभं वासवप्रति
मो येन जरासंधोऽतिदुर्जयः निर्जितो बाहुयुद्धेन देहभेदं च लंभितः द्रोणं द्रौणिं च साधु त्वं पितापुत्रौ महारथौ स्तु
हि स्तुत्याविमौ भीष्म सततं द्विजसत्तमौ ययोरन्यतरो भीष्म संक्रुद्धः सचराचरं इमां वसुमतीं हन्यादेतदेव हि
मे मतिः द्रोणस्य हि समं युद्धे न पश्यामि नराधिपं अश्वत्थाम्नस्तथा भीष्म न चैमौ स्तोतुमिच्छसि पृथिव्यां सा
गरांतायां योऽवै प्रतिसमो भवेत् दुर्योधनं त्वं राजेंद्रमतिक्रम्य महाभुजं जयद्रथं च राजानं कृतास्त्रं दृढविक्रमं
द्रुमं किंपुरुषाचार्यं लोके प्रथितविक्रमं अतिक्रम्य महावीर्यं किं प्रशंससि केशवं वृद्धं च भरताचार्यं तथा शा
रद्वतं कृपं अतिक्रम्य महावीर्यं किं प्रशंससि केशवं धनुर्धराणां प्रवरं रुक्मिणं पुरुषोत्तमं अतिक्रम्य महा
वीर्यं किं प्रशंससि केशवं भीष्मकं च महावीर्यं दंतवक्त्रं च भूमिपं अतिक्रम्य महावीर्यं किं प्रशंससि केश
वं भगदत्तं यूपकेतुं जयत्सेनं च मागधं अतिक्रम्य महावीर्यं किं प्रशंससि केशवं विराटद्रुपदौ चोभौ शकुनिं

सभा० ४४

वृद्ध हृद्धं विंदानुविंदावावंत्यौ पाडं श्वेतमथोत्तरं शंखं च सुमहाभागं वृषसेनं च मानिनं एकलव्यं च विक्रां
तं कालिंगं च महारथं अतिक्रम्य महावीर्यान् किं प्रशंससि केशवं शल्यादीनपि कस्मात्त्वं न स्तौषि वसुधाधिपान्
स्तवाय यदि ते बुद्धिर्वर्तते भीष्म सर्वदा किं हि शक्यं मया कर्तुं यद्वृद्धानां त्वया नृप पुरा कथयतां नूनं न श्रुतं धर्मवादि
नां आत्मनिंदात्मपूजा च परनिंदा परस्तवः अनाचरितमार्याणामिति ते भीष्म न श्रुतं यदस्तव्यमिमं शश्वन्मोहा
त्संस्तौषि केवलं केशवं तच्च ते भीष्म न कश्चिदनुमन्यते कथं भोजस्य पुरुषे वर्गपाले दुरात्मनि समावेशयसे सर्वं
जगत्केवलकाम्यया अथ वैषा न ते बुद्धिः प्रकृतिं याति भारत मयैव कथितं पूर्वं भूलिंगशकुनिर्यथा भूलिं
गशकुनिर्नाम पार्श्वे हिमवतः परे भीष्म तस्याः सदा वाचः श्रूयंतेऽर्थविगर्हिताः मा साहसमितीदं सा सततं वाश
ते किल साहसं चात्मनोऽतीव चरंती नावबुध्यते सा हि मांसार्गलं भीष्म मुखात्सिंहस्य खादतः दंतांतरवि
लग्नं यत्तदादत्तेऽल्पचेतना इच्छतः सा हि सिंहस्य भीष्म जीवत्यसंशयं तद्वत्त्वमप्यधर्मिष्ठ सदा वाचः प्रभाषसे
इच्छतां पार्थिवेंद्राणां भीष्म जीवस्यसंशयं लोकविद्विष्टकर्मा हि नान्योऽस्ति भवता समः वैशं० ततश्चेदिप
तेः श्रुत्वा भीष्मः स कटुकं वचः उवाचेदं वचो राजंश्चेदिराजस्य शृण्वतः इच्छतां किल नामाहं जीवाम्येषां महीक्षितां श्री:
योऽहं न गणयाम्येतांस्तृणेनापि समान्नृपान् एवमुक्ते तु भीष्मेण ततः संचुक्रुधुर्नृपाः केचिज्जहृषिरे तत्र केचिद्भीष्मं ज ४४
गर्हिरे केचिदूचुर्महेष्वासाः श्रुत्वा भीष्मस्य तद्वचः पापोऽवलिप्तो वृद्धश्च नायं भीष्मोऽर्हति क्षमां हन्यतां साध्वयं भीष्मः

पशुवत्खलु पार्थिवाः सर्वैः समेत्य संरब्धैर्दह्यतां वा कटाग्निना इति तेषां वचः श्रुत्वा भीष्मः कुरुपितामहः उवाच मतिमांस्त
त्र तानेव वसुधाधिपान् एवमुक्ते तु भीष्मेण उक्तस्योक्तस्य मे हांतमहं समुपलक्षये यत्तु वक्ष्यामि तं [illegible]ति गोविंदः पूजि
तास्माभिरच्युतः ये त्सर्वे शृणुध्वं वसुधाधिपाः पशुवद्घातनं वा मे दहनं वा कटाग्निना क्रियतां मूर्ध्नि वो न्यस्तं मयेदं
सकलं पदं एष ×यस्य वा त्वरते बुद्धिर्मरणाय स माधवं कृष्णमाह्वयतामद्य युद्धे शार्ङ्गगदाधरं यावदस्यैव देव
स्य देहं विशत्वपातितः इति सभापर्वणि शिशुपालवधे ४३ वैशं० श्रुत्वैव वाक्यं भीष्मस्य चेदिराजुरुविक्र
मः युयुत्सुर्वासुदेवेन वासुदेवमुवाच ह आह्वये त्वां मया सार्धं रणं गच्छ जनार्दन यावदद्य निहन्मि त्वां सहितं सर्वपांडवैः
सह त्वया हि मे वध्याः पांडवाः कृष्ण सर्वथा नृपतीन्समतिक्रम्य यैरराजा त्वमर्चितः ये त्वां दासमराजानं बाल्यादर्च
ति दुर्मतिं अनर्हमर्हवत्कृष्ण वध्यास्त इति मे मतिः इत्युक्त्वा राजशार्दूलस्तस्थौ गर्जन्नमर्षणः एवमुक्ते ततः कृष्णो मृ
दुपूर्वमिदं वचः उवाच पार्थिवान्सर्वांस्तत्समक्षं च पांडवान् एष नः शत्रुरत्यंतं पार्थिवाः सात्वतीसुतः सात्वतानां नृशंसा
त्मा न हितोनपकारिणां प्राग्ज्योतिषपुरं यातानस्मान्ज्ञात्वा नृशंसकृत् अदहद्द्वारकामेष स्वस्रीयः सन्नराधिपाः
क्रीडतो भोजराजन्यानेष रैवतके गिरौ हत्वा बध्वा च तान्पापः समायात्स्वपुरं पुरा अश्वमेधहयं मेध्यमुत्सृष्टं
रक्षिभिर्वृतं पितुर्मे यज्ञविघ्नार्थमहरत्पापनिश्चयः सुवीरान्प्रतियातां च बभ्रोरेष यशस्विनः भार्या
मभ्यहरन्मोहादकामां तामितो गतां एष मायाप्रतिच्छन्नः करूषार्थे तपस्विनीं जहार भद्रां वैशालीं मातुलस्य
नृशंसवत् पितृष्वसुः कृते दुःखं सुमहन्मर्षयाम्यहं दिष्ट्या त्विदं महीपानां सन्निधावद्य वर्तते पश्यंति हि भवंतोऽद्य

सभा० सप्यतीव व्यतिक्रमं कृतानि तु परोक्षं मे रूपनीतानि बोधत इमं त्वस्य न शक्यामि क्षंतुमद्य व्यतिक्रमं अवलेपाद्वधार्हस्य सम
५५ ग्रे राजमंडले रुक्मिण्यामस्य मूढस्य प्रार्थनासीन्मुमूर्षतः न च तां प्राप्तवान्मूढः शूद्रो वेदश्रुतीमिव वैशंपा एवमादि
ततः सर्वे सहितास्ते नराधिपाः वासुदेववचः श्रुत्वा चेदिराजं व्यगर्हयन् ततस्तद्वचनं श्रुत्वा शिशुपालः प्रतापवान् जहा
स स्वनवद्धासं प्रहस्येदमुवाच ह मत्पूर्वां रुक्मिणीं कृष्ण संसत्सु संपरिकीर्तयन् विशेषतः पार्थिवेषु व्रीडां न कुरुषे कथं म
न्यमानो हि कः सत्सु पुरुषः परिकीर्तयेत् अन्यपूर्वां स्त्रियं जातु त्वदन्यो मधुसूदन क्षम वा यदि ते श्रद्धा मा वा कृष्ण मम क्षम
क्रुद्धाद्वापि प्रसन्नाद्वा किं मे त्वत्तो भविष्यति तथा ब्रुवत एवास्य भगवान्मधुसूदनः मनसाचिंतयच्चक्रं दैत्यवर्गनिषूदनं
एतस्मिन्नेव काले तु चक्रे हस्तगते सति उवाच भगवानुच्चैर्वाक्यं वाक्यविशारदः शृण्वंतु मे महीपाला येनैतत्क्षमितं मया
अपराधशतं क्षाम्यं मातुरस्यैव याचतः दत्तं मया याचितं च तानि पूर्णानि पार्थिवाः अधुना वधयिष्यामि पश्यतां वो मही
क्षितां एवमुक्त्वा यदुश्रेष्ठश्चेदिराजस्य तत्क्षणात् व्यपाहरच्छिरः क्रुद्धश्चक्रेणामित्रकर्शनः स पपात महाबाहुर्वज्राह
त इवाचलः ततश्चेदिपतेर्देहात्तेजोग्र्यं ददृशुर्नृपाः उत्पतंतं महाराज गगनादिव भास्करं ततः कमलपत्राक्षं कृष्णं लो
कनमस्कृतं ववंदे तत्तदा तेजो विवेश च नराधिप तदद्भुतममन्यंत दृष्ट्वा सर्वे महीक्षितः यद्विवेश महाबाहुं तत्तेजः पुरु श्रीः
षोत्तमं अनभ्रे प्रववर्ष द्यौः पपात ज्वलिताशनिः कृष्णेन निहते चैद्ये चचाल च वसुंधरा ततः केचिन्महीपाला नाब्रु ५५
वंस्तत्र किंचन अतीतवाक्पथे काले प्रेक्षमाणा जनार्दनं हस्तैर्हस्ताग्रमपरे प्रत्यपिंषन्नराधिपाः अपरे दशनैरोष्ठानद
शन्क्रोधमूर्छिताः रहस्तु केचिद्वार्ष्णेयं प्रशशंसुर्नराधिपाः केचिदेव सुसंरब्धा मध्यस्थास्त्वपरेऽभवन् प्रहृष्टाः के

शवं जग्मुः संस्तुवंतो महर्षयः ब्राह्मणाश्च महात्मानः पार्थिवाश्च महाबलाः शशंसुर्विहिताः सर्वे दृष्ट्वा कृष्णस्य विक्रमं पांडव
स्त्वब्रवीद्भ्रातृन्सत्कारेण महीपतिं अभ्यषिंचत्तदा पार्थः सहितैर्वसुधाधिपैः ततः स कुरुराजस्य क्रतुः सर्वसमृद्धिमान् यूनां प्री
तिकरो राजन्सबभौ विपुलौजसः शांतविघ्नः सुखारंभः प्रभूतधनधान्यवान् अन्नवान्बहुभक्ष्यश्च केशवेन सुरक्षितः
समापयामास च तं राजसूयं महाक्रतुं तं तु यज्ञं महाबाहुरासमाप्तेर्जनार्दनः ररक्ष भगवान्शौरिः शार्ङ्गचक्रगदाधरः तत
स्त्ववभृथस्नातं धर्मराजं युधिष्ठिरं समस्तं पार्थिवं क्षत्रमुपगम्येदमब्रवीत् दिष्ट्या वर्धसे राजन्साम्राज्यं प्राप्तवान्विभो आज
मीढाजमीढानां यशः संवर्धितं त्वया कर्मणैतेन राजेंद्र धर्मश्च सुमहान्कृतः आपृच्छामो नरव्याघ्र सर्वकामैः सुपूजि
ताः स्वराष्ट्राणि गमिष्यामस्तदनुज्ञातुमर्हसि श्रुत्वा च वचनं राजा धर्मराजो युधिष्ठिरः यथार्हं प्रतिपूज्यैतान्भ्रा
तॄन्निदमुवाच ह राजानः सर्व एवैते प्रीत्यास्मान्समुपागताः प्रस्थिताः स्वानि राष्ट्राणि मामापृच्छ्य परंतपाः ते नु
व्रजत भद्रं वो विषयांतं नृपोत्तमाः भ्रातुर्वचनमाज्ञाय पांडवा धर्मचारिणः यथार्हं नृपमुख्यांस्तानेकैकं समनुव्रज
न् विराटमन्वयात्तूर्णं धृष्टद्युम्नः प्रतापवान् धनंजयो यज्ञसेनं महात्मानं महारथः भीष्मं च धृतराष्ट्रं च भीमसे
नो महाबलः द्रोणं सहसुतं वीरः सहदेवो महाबलः नकुलः सुबलं राजन्सहपुत्रं समन्वयात् द्रौपदेयाः ससौ
भद्राः पार्वतीयान्महीपतीन् अन्वगच्छंस्तथैवान्याः क्षत्रियान्क्षत्रियर्षभाः एवं संपूजितास्ते तु जग्मुर्विप्राश्च
सर्वशः गतेषु पार्थिवेंद्रेषु सर्वेषु भरतर्षभ युधिष्ठिरमुवाचेदं वासुदेवः प्रतापवान् आपृच्छे त्वां गमिष्यामि
द्वारकां कुरुनंदन राजसूयं क्रतुश्रेष्ठं दिष्ट्या त्वं प्राप्तवानसि तमुवाचैवमुक्तस्तु धर्मराण्मधुसूदनं तव प्रसा

सभा० दाद्वोविंदोप्राप्तवानस्मि वै कर्तुं समर्थं पार्थिवं क्षत्रं त्वत्प्रसादाद्धर्मज्ञानुगं उपादाय बलिं मुख्यं मामेव समुपस्थितं
४६ न वयं त्वामृते वीर रंस्यामेह कदाचन आवश्यं चापि गंतव्यं त्वया द्वारवतीपुरी एवमुक्तः स धर्मात्मा युधिष्ठिर
सहायवान् अभिगम्याब्रवीच्छौरिः पार्थं पृथुयशा हरिः साम्राज्यं समनुप्राप्ताः पुत्रास्त्येष्टा पितृष्वसः सिद्धार्थस्मु
मंतव्यः सा त्वं प्रीतिमवाप्नुहि अनुज्ञातस्त्वया चाहं द्वारकां गंतुमुत्सहे सुभद्रां द्रौपदीं चैव सभाजयत केशवः निष्क्रम्या
तःपुराच्चापि युधिष्ठिरसहायवान् स्नातश्च कृतजाप्यश्च ब्राह्मणान्स्वस्तिवाच्य च ततो मेघवपुःप्रख्यं स्यंदनं सु
प्रकल्पितं योजयित्वा महाराज दारुकः प्रत्युपस्थितः उपस्थितं रथं दृष्ट्वा तार्क्ष्यप्रवरकेतनं प्रदक्षिणमुपावृत्य समा रथं
रुह्य महामनाः प्रययौ पुंडरीकाक्षस्ततो द्वारवतीं पुरीं तं पद्भ्यामनुवव्राज धर्मराजो युधिष्ठिरः भ्रातृभिः सहि
तः श्रीमान्वासुदेवं महाबलं ततो मुहूर्तं संगृह्य स्यंदनप्रवरं हरिः धर्मराजं परिष्वज्य प्रोवाच वदतां वरः अ
प्रमत्तः स्थितो नित्यं प्रजाः पाहि विशांपते पर्जन्यमिव भूतानि महाद्रुममिवांडजाः बांधवास्त्वानुजीवंतु स
हस्राक्षमिवामराः कृत्वा परस्परेणैवं संविदं कृष्णपांडवौ अन्योन्यं समनुज्ञाप्य जग्मतुः स्वगृहान्प्रति ग
ते द्वारवतीं कृष्णे सात्वतप्रवरे नृप एको दुर्योधनो राजा शकुनिश्चापि सौबलः तस्यां सभायां दिव्यायामूष
तुस्तौ नरर्षभौ इति सभापर्वणि शिशुपालवधः समाप्तः ४४ वैशंपायन० समाप्ते राजसूये तु क्र
तुश्रेष्ठे सुदुर्लभे शिष्यैः परिवृतो व्यासः पुरस्तात्समपद्यत सोभ्ययादासनात्तूर्णं भ्रातृभिः परिवारितः

पाद्येनासनदानेन पितामहमपूजयत् अथोपविश्य भगवान्कांचने परमासने आस्यतामिति चो
वाच धर्मराजं युधिष्ठिरं अथोपविष्टं राजानं भ्रातृभिः परिवारितं उवाच भगवान्व्यासस्तत्तद्वाक्य विशारदः
दिष्ट्या वर्द्धसि कौंतेय साम्राज्यं प्राप्य दुर्लभं वर्द्धिताः कुरवः सर्वे त्वया कुरुकुलोद्वह आपृच्छे त्वां गमिष्या
मि पूजितोऽस्मि विशांपते एवमुक्तः स कृष्णेन धर्मराजो युधिष्ठिरः अभिवाद्योपसंगृह्य पितामहमथाब्रवीत्
युधिष्ठिरः संशयो द्विपदां श्रेष्ठ ममोत्पन्नः सुदुर्लभः तस्य नान्योऽस्ति वक्ता वै त्वामृते द्विजपुंगव उत्पातांस्त्रिविधा
न्नाह नारदो भगवानृषिः दिव्यांश्चैवांतरिक्षांश्च पार्थिवांश्च पितामह आवश्यं तत्फलं तेषां भवितीति न संशयः अ
पि चैद्यस्य पतनाच्छांतमौत्पातिकं महत् वैशं० राज्ञस्तद्वचनं श्रुत्वा पराशरसुतः प्रभुः कृष्णद्वैपायनो व्यास इ
दं वचनमब्रवीत् त्रयोदश समा राजन्नुत्पातानां फलं महत् सर्वक्षत्रविनाशाय भविष्यति विशांपते त्वामेकं कारणं कृ
त्वा कालेन भरतर्षभ समेतं पार्थिवं क्षत्रं क्षयं यास्यति पार्थिव दुर्योधनापराधेन भीमार्जुनबलेन च स्वप्नांते द्रक्ष्यसि
राजेंद्र तस्मिन्काले उपस्थिते ते तद्धं संप्रवक्ष्यामि तन्निबोध युधिष्ठिर यदा द्रक्ष्यसि राजेंद्र स्वप्नांते वृषभध्वजं नी
लकंठं यथा स्थाणुं कपालिं त्रिपुरांतकं रुद्रमुग्रं पशुपतिं महादेवमुमापतिं हरं सर्वं वृषं शूलिं पिनाकं कृत्तिवास
सं कैलासकूटप्रतिमे वृषभेऽवस्थितं शिवं निरीक्षमाणं सततं पितृराजाश्रितां दिशं एवमीदृशकं स्वप्नं द्र
क्ष्यसि त्वं विशांपते मा तत्कृते ह्यनुध्याहि कालो हि दुरतिक्रमः स्वस्ति तेऽस्तु गमिष्यामि कैलासं पर्वतं प्रति अप्रमत्तः स्थि

सभा० ४७ ताद्दांतः पृथिवीं परिपालय   वैशं०   एवमुक्त्वा स भगवान्कैलासं पर्वतं ययौ   कृष्णद्वैपायनो व्यासः सह शिष्यैः श्रुता
नुगैः   गते पितामहे राजा चिंताशोकसमन्वितः   निश्वसन्नुष्णमसकृत्तमेवार्थं विचिंतयन्   कथं नु दैवं शक्येत पौरुषेण
प्रबाधितुं   अवश्यमेव भविता यदुक्तं परमर्षिणा   ततोऽब्रवीन्महातेजाः सर्वान्भ्रातॄन्युधिष्ठिरः   श्रुतं वः पुरुषव्याघ्रा यन्मां द्वै
पायनोऽब्रवीत्   तदा तद्वचनं श्रुत्वा मरणे निश्चिता मतिः   सर्वक्षत्रस्य निधने यद्यहं हेतुरीप्सितः   कालेन निर्मितस्तात को मे
ऽर्थो जीवितेन वै   एवं ब्रुवंतं राजानं फाल्गुनः प्रत्यभाषत   मा राजन्कश्मलं घोरं प्रविशो बुद्धिनाशनं   संप्रधार्य महारा नृ
ज यत्क्षमं तत्समाचर   ततोऽब्रवीत्सत्यधृतिर्भ्रातॄन्सर्वान्युधिष्ठिरः   द्वैपायनस्य वचनं तथैव समचिंतयन्   अद्यप्र
भृति भद्रं वः प्रतिज्ञां मे निबोधत   त्रयोदश समास्तात को मेऽर्थो जीवितेन वा   न प्रवक्ष्यामि परुषं भ्रातॄन्नन्यांश्च पा
र्थिवान्   स्थितो निदेशे ज्ञातीनां योक्ष्ये तत्समुदाहरन्   एवं मे वर्तमानस्य स्वसुतेष्वितरेषु च   भेदो न भविता लोके भे
दमूलो हि विग्रहः   विग्रहं दूरतो रक्षन्प्रियाण्येव समाचरन्   वाच्यतां न गमिष्यामि लोकेषु मनुजर्षभाः   भ्रातुर्ज्ये
ष्ठस्य वचनं पांडवाः संनिशम्य तत्   तमेव समवर्तंत धर्मराजहिते रताः   संसत्सु समयं कृत्वा धर्मराड्भ्रातृभिः सह   पितॄंस्त
र्पयथान्याय्यं देवतांश्च विशांपते   कृतमंगलकल्याणो भ्रातृभिः परिवारितः   गतेषु क्षत्रियेंद्रेषु सर्वेषु भरतर्षभ   युधि श्री:
ष्ठिरः सहामात्यः प्रविवेश पुरोत्तमं   दुर्योधनो महाराज शकुनिश्चापि सौबलः   सभायां रमणीयायां तस्यां नौ नरा ४७
धिप   इति सभापर्वणि ४५   वैशं०   वसन्दुर्योधनस्तस्यां सभायां भरतर्षभ   शनैर्ददर्श तां सर्वां सभां श
कुनिना सह   तस्यां दिव्यानभिप्रायान्ददर्श कुरुनंदनः   न दृष्टपूर्वा ये तेन नगरे नागसाह्वये   स कदाचित्सभाम

ध्ये धार्तराष्ट्रो महीपतिः   स्फाटिकं स्थलमासाद्य जलमित्यभिशंकया   स्ववस्त्रोत्कर्षणं राजा कृतवान्बुद्धिमोहितः   ततः स्थ
ले निपतितो दुर्मना व्रीडितो नृपः   निश्वसन्विमुखश्चापि परिचक्राम तां सभां   ततः स्फाटिकतोयां वै स्फाटिकांबुजशोभितां वा
पीं मत्वा स्थलमिति सवासाः प्रापतज्जले   जले निपतितं दृष्ट्वा किंकरा जहसुर्भृशं   वासांसि च शुभान्यस्मै प्रददू राजशासना
त्   तथागतं तु तं दृष्ट्वा भीमसेनो महाबलः   अर्जुनश्च यमौ चोभौ सर्वे ते प्राहसंस्तदा   नामर्षयत्ततस्तेषामवहासम
मर्षणः   आकारं रक्षमाणस्तु न स तान्समुदैक्षत   पुनर्वसनमुत्क्षिप्य प्रतरिष्यन्निव स्थलं   आरुरोह ततः सर्वे ज
हसुस्ते पुनर्जनाः   द्वारं चापि हिताकारं स्फाटिकं प्रेक्ष्य भूमिपः   प्रविशन्नाहतो मूर्ध्नि व्याघूर्णित इव स्थितः   तद्भूतम
परं द्वारं स्फाटिकोरुकपाटकं   विघट्टयन्कराभ्यां तु निःक्रम्याग्रे पपात ह   द्वारं तु वितताकारं समापेदे पुनश्च सः
संवृतं चेति मन्वानो द्वारस्थानादुपारमत्   एवं प्रलंभान्विविधान्प्राप्य तत्र विशांपते   पांडवेयाभ्यनुज्ञातस्ततो दुर्यो
धनो नृपः   अप्रहृष्टेन मनसा राजसूये महाक्रतौ   प्रेक्ष्य तामद्भुतामृद्धिं जगाम गजसाह्वयं   पांडवश्रीप्रतप्तस्य ध्या
नस्य गच्छतः   दुर्योधनस्य नृपतेः पापा मतिरजायत   पार्थान्सुमनसो दृष्ट्वा पार्थिवांश्च वशानुगान्   कृत्स्नं चापि व
दालोकमाकुमारं कुरूद्वह   महिमानं परं चापि पांडवानां महात्मनां   दुर्योधनो धार्तराष्ट्रो विवर्णः समपद्यत   स तु गच्छ
न्ननेकाग्रः सभामेवानुचिंतयन्   श्रियं च तामनुपमां धर्मराजस्य धीमतः   प्रमत्तो धृतराष्ट्रस्य पुत्रो दुर्योधनस्तदा   ना
भ्यभाषत्सुबलजं भाषमाणं पुनः पुनः   अनेकाग्रं तु तं दृष्ट्वा शकुनिः प्रत्यभाषत   दुर्योधन कुतोमूलं निश्वसन्निव

सभा० गच्छसि   दुर्योधन० दृष्ट्वेमां पृथिवीं कृत्स्नां युधिष्ठिरवशे स्थितां। जितामस्त्रप्रतापेन श्वेताश्वस्य महात्मनः तं च यज्ञं तथा
५८ भूतं दृष्ट्वा पार्थस्य मातुल यथा शक्रस्य देवेषु तथाभूतं महाद्युते। अमर्षेण तु संपूर्णो दह्यमानो दिवानिशं शुचिशुक्रा
गमे काले शुष्ये तोयमिवाल्पकं पश्य सात्वतमुख्येन शिशुपालं निपातितं न च तत्र पुमानासीत्तत्र तस्य पदानुगः द
ह्यमाना हि राजानः पांडवोत्थेन वह्निना क्षांतवंतोपराधं तं को हि तं क्षंतुमर्हति वासुदेवेन यत्कर्म तथायुक्तं महत्कृतं
सिद्धं च पांडवेयानां प्रतापेन महात्मनां तथा हि रत्नान्यादाय विविधानि नृपा नृपं उपतिष्ठंति कौंतेयं वैश्या इव करप्र
दाः श्रियं तथाविधां दृष्ट्वा ज्वलंतीमिव पांडवे अमर्षवशमापन्नो दह्येहमतथोचितः एवं स निश्चयं कृत्वा ततो वच
नमब्रवीत् पुनर्गांधारनृपतिं दह्यमान इवाग्निना वह्निमेव प्रवेक्ष्यामि भक्षयिष्यामि वा विषं अपो वापि प्रवे
क्ष्यामि न हि शक्ष्यामि जीवितुं को हि नाम पुमाँल्लोके मर्षयिष्यति सत्त्ववान् सपत्नानृध्यतो दृष्ट्वा हानिमात्म
नस्तथा सोहं न स्त्री न चाप्यस्त्री न पुमान्नापुमानपि योहं तां मर्षयाम्यद्य तादृशीं श्रियमागतां ईश्वरत्वं पृथिव्या
श्च वसुमत्तां च तादृशीं यज्ञं च तादृशं दृष्ट्वा मादृशः को न संज्वरेत अशक्तश्चैक एवाहं तामाहर्तुं नृपश्रियं सहायां
श्च न पश्यामि तेन मृत्युं विचिंतये दैवमेव परं मन्ये पौरुषं तु निरर्थकं दृष्ट्वा कुंतीसुते शुभ्रां श्रियं तामाहृतां तथा श्रीः ५८
सर्व कृतो यत्नो मया पूर्वं विनाशे तस्य सौबल तच्च सर्वमतिक्रम्य संवृद्धोप्स्विव पंकजं तेन दैवं परं मन्ये पौरुषं तु नि
रर्थकं धार्तराष्ट्रा हि हीयंते वर्धंते चापि पांडवाः सोहं श्रियं च तां दृष्ट्वा सभां तां च तथाविधां रक्षिभिश्चावहासं

तं परितप्ये यथाग्निना समामस्यनुजानीहि मातुलाद्य सुदुःखितं अमर्षं च समाविष्टं धृतराष्ट्रे निवेदय॥ ॥
इति सभापर्वणि दुर्योधनवाक्यं ५६ शकुनिरुवाच दुर्योधन न तेमर्षः कार्यः प्रति युधिष्ठिरं भागधेयानि हि स्वा
नि पांडवा भुंजते नृप तथा ह्युपायैर्बहुभिस्त्वयारब्धाः पुरासकृत् विमुक्ताश्च नरव्याघ्रा भागधेयपुरस्कृताः
तैर्लब्धा द्रौपदी भार्या द्रुपदश्च सुतैः सह सहायः पृथिवीलाभे वासुदेवश्च वीर्यवान् लब्धश्चाभ्यनर्थोपि पित्र्योंशः
पृथिवीपते विवृद्धस्तेजसा तेषां तत्र का परिदेवना धनंजयेन गांडीवमक्षय्यौ च तथेषुधी लब्धान्यस्त्राणि दिव्यानि तर्प
यित्वा हुताशनं तेन कार्मुकमुख्येन बाहुवीर्येण चात्मनः कृता वशे महीपालास्तत्र का परिदेवना यच्चासहायो राजन्नु केव
नासि भारत तन्मिथ्या भ्रातरो हीमे सहायास्ते महारथाः द्रोणस्तव महेष्वासः सह पुत्रेण धीमता सूतपुत्रश्च राधेयो
गौतमश्च महारथः अहं च सह सोदर्यैः सौमदत्तिश्च वीर्यवान् एभिस्त्वं सहितः सर्वैर्जय कृत्स्नां वसुंधरां दुर्योधन०
त्वयाहं सहितो राजन्नेतैश्चान्यैर्महारथैः एतानेव विजेष्यामि यदि त्वमनुमन्यसे एतेषु विजितेष्वद्य भविष्यति मही
मम सर्वे च पृथिवीपालाः सा सभा च महाधना शकुनि० धनंजयो वासुदेवो भीमसेनो युधिष्ठिरः नकुलः सहदे
वश्च द्रुपदश्च सहानुजैः नैते युधि पराजेतुं शक्याः सुरगणैरपि महारथा महेष्वासाः कृतास्त्रा युद्धदुर्मदाः अहं तु
तद्विजानामि विजेतुं येन शक्यते युधिष्ठिरं स्वयं राजंस्तन्निबोध जुषस्व च दुर्योधन० अप्रमादेन सुहृदामन्ये
षां च महात्मनां यथा शक्ष्यामि जेतुं तांस्तन्ममाचक्ष्व मातुल शकुनि० द्यूतप्रियश्च कौंतेयो न स जानाति देवितुं

सभा० सभा ह्रतश्च राजेंद्र नाक्षसैतेन निवर्तितुं देवने कुशलश्चाहं न मे स्ति कुशलो भुवि त्रिषु लोकेषु कौंतेयं नवै द्यूते समा
५७ ह्वये तस्माक्षकुशलो राजन्नादास्ये हमसंशयं राज्यं श्रियं च तां दीप्तां त्वदर्थं पुरुषर्षभ इदं तु सर्वं त्वं राज्ञे दुर्योधननिवेदय
अनुज्ञातश्च पित्रा ते विजेष्ये तमसंशयं. दुर्यो० त्वमेव धृतराष्ट्राय प्रकुरु मुख्याय सौबल निवेदय यथा न्यायं
नाहं शक्ष्यामि शंसितुं इति सभापर्वणि द्यूते ४७ वैशं० अनुभूय तु राज्ञस्तं राजसूयं महाक्रतुं
युधिष्ठिरस्य शकुनिर्गांधारीपुत्रसंयुतः प्रियकृन्मतमाज्ञाय पूर्वं दुर्योधनस्य तत् प्रज्ञाचक्षुषमासीनं शकुनिः सौ
बलस्तदा दुर्योधनवचः श्रुत्वा धृतराष्ट्रं नराधिपं उपगम्य महाप्राज्ञं शकुनिर्वाक्यमब्रवीत् शकुनिरुवाच
दुर्योधनो महाराज विवर्णो हरिणः कृशः दीनश्चिंतापरश्चैव तद्विद्धि भरतर्षभ न त्वं परीक्षसे सम्यगसह्यं शत्रु
संभवं ज्येष्ठपुत्रस्य शोकं त्वं किमर्थं नावबुध्यसे धृतराष्ट्र उवाच दुर्योधन कुतो मूलं भृशमार्तोसि पुत्रक
श्रोतव्यश्चेन्मया सोर्थो ब्रूहि मे कुरुनंदन अयं त्वा शकुनिः प्राह विवर्णं हरिणं कृशं चिंतयंश्च न पश्यामि शोकस्य त
व कारणं ऐश्वर्यं हि महत्पुत्र त्वयि सर्वं प्रतिष्ठितं भ्रातरः सुहृदश्चैव नाचरंति तवाहितं आच्छादयसि प्रावारानश्नासि
पिशितोदनं आजानेया वहंति त्वां केनासि हरिणः कृशः शयनानि महार्हाणि योषितश्च मनोरमाः गुणवंति च वेश्म श्रीः
नि विहारांश्च यथासुखं देवानामिव ते सर्वं वाचि बद्धं न संशयः स दीन इव दुर्धर्षः कस्माच्छोचसि पुत्रक दुर्योधन० ५८
अश्नाम्याच्छादये चाहं यथा कुपुरुषस्तथा अमर्षं धारये चोग्रं प्रतीक्षन्कालपर्ययं अमर्षणः स्वाः प्रकृतीरभिभूय परे स्थि

ताः क्लेशान्मुमुक्षुः परजान्स वै पुरुष उच्यते संतोषो वै श्रियं हंति अभिमानं च भारत अनुक्रोशभये चोभे यैर्वृतो नाश्नु
ते महत् न मां प्रीणाति तद्भुक्तं श्रियं दृष्ट्वा युधिष्ठिरे ज्वलंतीमिव कौंतेये विवर्णकरणीं मम सपत्नानृध्यतो त्मानं
क्षीयमाणं निशाम्य च अदृश्यामपि कौंतेये स्थितां पश्यन्निवोद्यतां तस्माद्दहं विवर्णश्च दीनश्च हरिणः कृशः अष्टाशी
तिसहस्राणि स्नातका गृहमेधिनः त्रिंशद्दासीक एकैको यान्बिभर्ति युधिष्ठिरः दशान्यानि सहस्राणि नित्यमन्नं सु
संस्कृतं भुंजते रुक्मपात्रेषु युधिष्ठिरनिवेशने कदलीमृगमोकानि कृष्णश्यामारुणानि च कांबोजाः प्राहिणोत्त
स्मै महार्हाणि च कंबलान् रथयोषिद्गजाश्वांश्च शतशोथ सहस्रशः त्रिंशतं चोष्ट्रवामीनां शतान्युपनिर्यये राजा ति
नो बलिमादाय समेता हि नृपक्षये पृथग्विधानि रत्नानि पार्थिवाः पृथिवीपते आहरन्क्रतुमुख्येस्मिन्कुंतीपुत्राय
भारत न क्वचिद्धि मया दृष्टस्तादृशो नैव च श्रुतः यादृग्धनागमो यज्ञे पांडवेयस्य धीमतः अपर्यंतं धनौघं च दृष्ट्वा
शत्रोरहं नृप शर्म नैवाभिगच्छामि चिंतयन्ननिशं विभो ब्राह्मणा वाटधानाश्च गोमंतः शतसंघशः त्रिखर्वं बलिमा
दाय द्वारि तिष्ठंत वारिताः कमंडलूनुपादाय जातरूपमयान्शुभान् एवं बलिमुपादाय प्रवेशं लेभिरे न च यथैव म
धु शक्राय धारयंत्यमरस्त्रियः तदस्मै कांस्यमाहार्षीद्वारुणं कलशोदधिः शैक्यं रुक्मसहस्रस्य बहुरत्नविभूषि
तं दृष्ट्वा च मम तत्सर्वं ज्वररूपमिवाभवत् गृहीत्वा तं तु गच्छंति समुद्रौ पूर्वदक्षिणौ तथैव पश्चिमं यांति गृहीत्वा पुरु
षर्षभ उत्तरं तु न गच्छंति विना तात पतत्रिभिः इदं चाद्भुतमत्रासीत्तन्मे निगदतः शृणु पूर्णे शतसहस्रे तु विप्राणां प
रिवेष्यतां स्थापिता तत्र संज्ञाभूच्छंखो ध्मायति नित्यदा मुहुर्मुहुः प्रणदतस्तस्य शंखस्य भारत उत्तमं शब्दम

न्य

सभा० श्रोषं ततो रोमाणि मे हृषन् पार्थिवैर्बहुभिः कीर्णमुपस्थानं ददृशुस्मि: सर्वरत्नान्युपादाय पार्थिवाः पृथिवीपते यथैव
५० स्यमहाराज पांडुपुत्रस्य धीमतः वैश्या इवमहीपाला द्विजातिपरिवेषकाः नसाश्रीर्देवराजस्य यमस्य वरुणस्य वा
गुह्यकाधिपतेर्वापि याश्री राजन्युधिष्ठिरे तां दृष्ट्वा पांडुपुत्रस्य श्रियं परमिकामहं शांतिं न परिगच्छामि दह्यमाने
नचेतसा शकुनि० यामेतांमुत्तमांलक्ष्मीं दृष्टवानसि पांडवे तस्याः प्राप्तावुपायंमे शृणुसत्यपराक्रम अहमक्षेष्व
भिज्ञातः पृथिव्यामपि भारत हृदयज्ञः पणज्ञश्च विशेषज्ञश्च देवने प्रियद्यूतश्च कौंतेयो नसजानाति देवितुं
आहूतश्चैष्यति व्यक्तं द्यूतादपि रणादपि नियतं तं विजेष्यामि कृत्वातु कपटं विभो आनयामि समृद्धिं तां दिव्यां चो
पाह्वयस्व तं वैशं० एवमुक्तः शकुनिना राजा दुर्योधनस्तदा धृतराष्ट्रमिदं वाक्यमपदांतरमब्रवीत् अयमुत्स
हते राजञ्छ्रियमाहर्तुमक्षवित् द्यूतेन पांडुपुत्रस्य तदनुज्ञातुमर्हसि धृतराष्ट्र० क्षत्ता मंत्री महाप्राज्ञः स्थि
तो यस्यास्मि शासने तेन संगम्य वक्ष्यामि कार्यस्यास्य विनिश्चयं सहि धर्मं पुरस्कृत्य दीर्घदर्शी परं हितं उभयोः
पक्षयोर्युक्तं वक्ष्यत्यर्थविनिश्चयं दुर्योधन० निवर्तयिष्यति त्वासौ यदि क्षत्ता समेष्यति निवृत्ते त्वयि राजें
द्र मरिष्येऽहं न संशयः स मयि त्वं मृते राजन्विदुरेण सुखी भव भोक्ष्यसे पृथिवीं सर्वां किं मया त्वं करिष्यसि श्रीः
वैशं० आर्तवाक्यं तु तत्तस्य प्रणयोक्तं निशम्य सः धृतराष्ट्रोऽब्रवीत्प्रेष्यान्दुर्योधनमते स्थितान् स्थूणासहस्रै ५०
र्बृहतीं शतद्वारां सभां मम मनोरमां दर्शनीयामाशु कुर्वंतु शिल्पिनः ततः संस्तीर्य रत्नैस्तामक्षानावाप्य सर्वशः सु
कृतां सुप्रवेशां च निवेदयत मे शनैः दुर्योधनस्य शांत्यर्थमिति निश्चित्य भूमिपः धृतराष्ट्रो महाराज प्राहिणोद्विदुरा

यवै अपृष्ट्वा विदुरं ह्यस्य नासीत्कश्चिद्विनिश्चयः द्यूतदोषांश्च जानन्स पुत्रस्नेहादकृष्यत तच्छ्रुत्वा विदुरो धीमान्कलि
द्वारमुपस्थितं विनाशमुखमुत्पन्नं धृतराष्ट्रमुपाद्रवत् सोऽभिगम्य महात्मानं भ्राता भ्रातरमग्रजं मूर्ध्ना प्रणम्य चरणाविदम
प्यब्रवीद्वचः विदुरउवाच नाभिनंदामि ते राजन्व्यवसायमिमं प्रभो पुत्रैर्भेदो यथा न स्याद्द्यूतहेतोस्तथा कुरु
धृतराष्ट्रउवाच ततः पुत्रेषु पुत्रैर्मे कलहो न भविष्यति यदि देवाः प्रसादं नः करिष्यंति न संशयः अशुभं वा शुभं वा
पि हितं वा यदि वाहितं प्रवर्ततां सुहृद्द्यूतं दिष्टमेतन्न संशयः मयि संनिहिते च भीष्मे च भरतर्षभे अनयो दैवविहि
तो न कथंचिद्भविष्यति गच्छ त्वं रथमारुह्य हयैर्वातसमैर्जवे खांडवप्रस्थमद्यैव समानय युधिष्ठिरं न वार्यो व्यवसायो
मे विदुरैतद्ब्रवीमि ते दैवमेव परं मन्ये येनैतदुपपद्यते इत्युक्तो विदुरो धीमान्नैतदस्तीति चिंतयन् आपगेयं महात्मा
नमभ्यगच्छत्सुदुःखितः इति सभापर्वणि द्यूते ४८ जनमेजयउवाच कथं समभवद्द्यूतं भ्रातॄणां तन्महा
त्ययं यत्र तद्व्यसनं प्राप्तं पांडवैर्मे पितामहैः के च तत्र सभास्तारा राजानो ब्रह्मवित्तम के चैनमन्वमोदंत के चैनं प्रत्यषे
धयन् विस्तरेणैतदिच्छामि कथ्यमानं त्वयानघ मूलमेतद्विनाशस्य पृथिव्या द्विजसत्तम सौतिरुवाच एवमुक्त
स्तदा राज्ञा व्यासशिष्यो महामतिः आचचक्षेऽथ यद्वृत्तं तत्सर्वं सर्ववेदवित् वैशं० शृणु मे विस्तरेणेमां कथां भ
रतसत्तम भूय एव महाराज यदि ते श्रवणे मतिः विदुरस्य मतं ज्ञात्वा धृतराष्ट्रोऽंबिकासुतः दुर्योधनमिदं वाक्यमुवाच
विजने पुनः अलं द्यूतेन गांधारे विदुरो न प्रशंसति न ह्यसौ सुमहाबुद्धिरहितं नो वदिष्यति हितं हि परमं मन्ये विदुरो य

सभा० ५१ संभाषते क्रियतां पुत्र तत्सर्वमेतन्मन्ये हितं तव देवर्षिर्वासवगुरुर्देवराजाय धीमते भेदे विनाशो राज्यस्येत्यत्राह श
स्त्रं भगवान्बृहस्पतिरुदारधीः तद्वेद विदुरः सर्वं सरहस्यं महाकविः स्थितश्च वचने तस्य सदाहमपि पुत्रक विदुरो वापि मेधा
वी कुरूणां प्रवरो मतः उद्धवो वा महाबुद्धिर्वृष्णीनामर्चितो नृप द्यूतेन तदलं पुत्र द्यूते भेदो हि जायते भेदे विना
शो राज्यस्य तत्पुत्र परिवर्जय पित्रा मात्रा च पुत्रस्य यद्वै कार्यं परं स्मृतं प्राप्तस्त्वमसि तत्पुत्र पितृपैतामहं पदं अ
धीतवान्कृती शास्त्रे लालितः सततं गृहे भ्रातृज्येष्ठः स्थितो राज्ये विन्दसे किं न शोभनं पृथग्जनैरलभ्यं यद्भोजनाच्छाद
नं परं तत्प्राप्तोसि महाबाहो कस्माच्छोचसि पुत्रक स्फीतं राष्ट्रं महाबाहो पितृपैतामहं महत् नित्यमाज्ञापयन्भा
सि दिवि देवेश्वरो यथा तस्य ते विदितप्रज्ञ शोकमूलमिदं कुतः समुत्थितं दुःखतरं तन्मे शंसितुमर्हसि दुर्योधन०
अश्नाम्याच्छादयामीति प्रपश्यन्भरतर्षभ नामर्षं कुरुते यस्तु स साधमः पुरुषः स्मृतः न मां प्रीणाति राजेन्द्र लक्ष्मीः साधार
णी विभो ज्वलितामिव कौंतेये श्रियं दृष्ट्वा च विव्यथे सर्वां हि पृथिवीं दृष्ट्वा युधिष्ठिरवशानुगां स्थिरोस्मि योहं जीवामि
दुःखादेतद्ब्रवीमि ते आवर्जिता इवाभांति निपाश्चित्रककौकुराः कारस्करा लोहजंघा युधिष्ठिरनिवेशने हिमवत्साग
रानूपाः सर्वरत्नाकरास्तथा अंत्याः सर्वे पर्युदस्ता युधिष्ठिरनिवेशने ज्येष्ठोयमिति मां मत्वा श्रेष्ठश्चेति विशांपते युधि श्रीः
ष्ठिरेण सत्कृत्य युक्तो रत्नपरिग्रहे उपस्थितानां रत्नानां श्रेष्ठानामर्घहारिणां नादृश्यत पुनः प्रांतो नापरो न तत्र भा ५१
रत न मे हस्तः समभवद्वसु तत्प्रतिगृह्णतः अतिष्ठंत मयि श्रांते गृह्य दूराहृतं वसु कृतां बिंदुसरोरत्नैर्मयेन स्फा

टिकच्छदां अपश्यं नलिनीं पूर्णामुदकस्येव भारत वस्त्रमुत्कर्षति मयि प्राहसत्स वृकोदरः शत्रोर्ऋद्धिविशेषेण विमूढं
रत्नवर्जितं तत्र स्म यदि शक्तः स्यां पातयेयं वृकोदरं यदि कुर्यां समारंभं भीमं हंतुं नराधिप शिशुपाल इवास्माकं गतिः स्या
न्नात्र संशयः सपत्नेनावहासो हि स मां दहति भारत पुनश्च तादृशीमेव वापीं जलजशालिनीं मत्वा शिलासमां तोये
पतितोस्मि नराधिप तत्र मां प्राहसत्कृष्णः पार्थेन सह सस्वनं द्रौपदी च सह स्त्रीभिर्व्यथयंती मनो मम क्लिन्नवस्त्रस्य
च जले किंकरा राजचोदिताः ददुर्वासांसि चान्यानि तच्च दुःखतरं मम प्रलंभं च शृणुष्वान्यद्वदतो मे नराधिप अद्वारेण
विनिर्गच्छन्द्वारसंस्थानरूपिणा अभिहत्य शिलां भूयो ललाटेनास्मि विक्षतः तत्र मां यमजौ दूरादालोक्य ललितौ क दा
ल बाहुभिः परिगृह्णीतां शोचंतौ सहितावुभौ उवाच सहदेवस्तु तत्र मां विस्मयन्निव इदं द्वारमितो गच्छ राजन्नि
ति पुनः पुनः नामधेयानि रत्नानां पुरस्तान्न श्रुतानि मे यानि दृष्टानि तस्यां मे तन्न मे व्यथितं मनः
इति सभापर्वणि द्यूते ४९ दुर्योधन० यन्मया पांडवानां तु दृष्टं तच्छृणु भारत आहृतं भूमिपालैर्हि वसुमुख्यं
ततस्ततः नाविंदं मूढमात्मानं दृष्ट्वाहं तदरेर्धनं फलतो भूमितो वापि प्रतिपद्यस्व भारत और्णान्बैलान्वार्षदं
शान्जातरूपपरिष्कृतान् प्रावाराजिनमुख्यांश्च कांबोजः प्रददौ वसु अश्वांस्तित्तिरिकल्माषांस्त्रिंशतं शुकनासि
कान् उष्ट्रवामीस्त्रिशतं च पुष्टाः पीलुशमीगुदैः गोवासना ब्राह्मणाश्च दासनीयाश्च सर्वशः प्रीत्यर्थं ते महाभागा
धर्मराज्ञो महात्मनः त्रिखर्वं बलिमादाय द्वारि तिष्ठंति वारिताः शतं दासीसहस्राणां कारमीरिकनिवासिनां

सभा० ५२ श्यामास्तन्व्यो दीर्घकेश्यः सर्वाभरणभूषिताः बलिं च कृत्स्नमादाय मरुकच्छनिवासिनः उपनिन्यु
र्महाराज हयान्गंधर्वदेशजान् शूद्रा विप्रोत्तमार्हाणि रांकवान्यजिनानि च समुद्रनिष्कुटे जाताः पारेसिं
धुं च मानवाः इंद्रकृष्टैर्वर्तयंति धान्यैर्नदीमुखैश्च ये वैरामाः पारदाश्चैव वंगाश्च कितवैः सह विविधं बलिमा
दाय रत्नानि विविधानि च अजाविकं गोहिरण्यं खरोष्ट्रं फलजं मधु कंबलान्विविधांश्चैव द्वारि तिष्ठंति वारिताः
प्राग्ज्योतिषाधिपः शूरो म्लेछानामधिपो बली यवनैः सहितो राजा भगदत्तो महारथः आजानेयान्हयाञ्छी
घ्रानादायानिलरंहसः बलिं च कृत्स्नमादाय द्वारि तिष्ठति वारिताः अश्मसारमयं भांडं शुद्धदंतत्सरूनसी सरुस्वड्गमुष्टी
न् प्राग्ज्योतिषोथ तद्दत्वा भगदत्तो व्रजत्तदा द्व्यक्षांस्त्र्यक्षांल्ललाटाक्षान्नानादिग्भ्यः समागतान् औष्णीका
नन्तवासांश्च बाहुकान्पुरुषादकान् एकपादांश्च तत्राहमपश्यं द्वारि वारितान् राजानो बलिमादाय नानाव
२ र्णाननेकशः कृष्णग्रीवान्महाकायान्रासभान्दूरपातिनः आजह्रुर्दशसाहस्रान्विनीतान्दिक्षु विश्रुतान् श्री:
प्रमाणरागसंपन्नान्वंक्षुतीरसमुद्भवान् बल्यर्थं ददतस्तस्मै हिरण्यं रजतं बहु इंद्रगोपकवर्णाभाञ्छुकवर्णा ५२
न्म न्मनोजवान् तथैवेंद्रायुधनिभान्संध्याभ्रसदृशानपि अनेकवर्णानारण्यान्गृहीत्वाश्वान्मनोजवान्

जातरूपमनल्पं च ददुस्तस्यैकपादकाः चीनान्हूणाञ्छकांश्चोड्रान्पर्वतांतरवासिनः निषादान्पारसीकांश्च क
श्मान्हैमवतांस्तथा अपरांताद्भिगतान्विविधान्द्वारिवारितान् बल्यर्थं ददतस्तस्य नानारूपाननेकशः
कृष्णग्रीवान्महाकायान्रासभान्शतपातिनः आहर्षुर्दशसाहस्रान्विनीतान्दिक्षु विश्रुतान् प्रमाणरागस्प
र्शाढ्यं वंक्षुतीरसमुद्भवं ऊर्णं रांकवं चैव कीटजं पट्टजं तथा कुटीकृतं तथैवान्यत्कमलाभं सहस्रशः
श्लक्ष्णवस्त्रं च कार्पासमाविकं मृदु चाजिनं निशितांश्चैव दीर्घांश्च शक्तिभल्लपरश्वधान् अपरांत
समुद्भूतांस्तथैव परशूंस्तीक्ष्णान् रसान्गंधांश्च विविधान्रत्नानि विविधानि च बलिं च कृत्स्नमादाय द्वा
रि तिष्ठंति वारिताः शकास्तुषाराः कंकाश्च रोमकाः शृंगिणो नराः महागजान्दूरगमान्गणितानर्बुदा
न्हयान् कोटिशश्चैव बहुशः सुवर्णं पद्मसंमितं बलिमादाय विविधं द्वारि तिष्ठंति वारिताः आस
नानि विचित्राणि यानानि विविधानि च मणिकांचनचित्राणि गजदंतमयानि च कवचानि महार्हाणि श
स्त्राणि विविधानि च रथांश्च विविधाकारान्जातरूपपरिष्कृतान् हयैर्विनीतैः संपन्नान्वैयाघ्र
परिवारणान् विचित्रांश्च परिस्तोमान्रत्नानि विविधानि च एतद्दत्वा महद्द्रव्यं पूर्वदेशाधिपान्नृ

सभा
५३

प्रविष्टोऽयज्ञसदनं पांडवस्य महात्मनः ॥ इति सभापर्वणि द्यूते ५० ॥ दुर्योध० इमं तु विविधं दायं यन्मया
श्रृणुष्वानघ यज्ञार्थं राजभिर्दत्तं महांतं धनसंचयं मेरुमंदरयोर्मध्ये शैलोदाम् अभितो नदीं ते कीचकवेणूनां
छायां रम्यामुपासते खशा एकाशना ज्योहाः प्रदरा दीर्घवेणवः पशुपाश्च कुलिंदाश्च तंगणाः परतंगणाः
तेवै पिपीलिका नाम वरदत्ताः पिपीलिकैः जातरूपं द्रोणमेयमाजह्नुः पुंजशो नृपाः कृष्णांल्ललामांश्चमरांछु
क्लांश्चान्यां शशिप्रभान् हिमवत्पुष्पजं चैव स्वादु क्षौद्रं तथा बहु उत्तरेभ्यः कुरुभ्यश्चाप्यपतन्माल्यमंबु च उ
त्तरादपि कैलासादोषधीः सुमहाबलाः आहृत्य पार्वतीयाश्च तत्र वगणाः स्थिताः अजातशत्रोर्नृपते द्वा
रि तिष्ठंति वारिताः ये परार्द्धे हिमवतः सूर्योदयगिरौ नृपाः कारूषे च समुद्रांते लौहित्यमभितश्च ये फल
मूलाशना ये च किराताश्चर्मवाससः क्रूरशस्त्राः क्रूरकृतस्तांश्च पश्याम्यहं प्रभो चंदनागरुकाष्ठानां भा
रान्कालीयकस्य च चर्मरत्नसुवर्णानां गंधानां चैव राजयः कैरातकीनामयुतं दासीनां च विशांपते आहृत्य
रमणीयार्थान्दूरजान्मृगपक्षिणः निचितं पर्वतेभ्यश्च हिरण्यं भूरिवर्चसं बलिं च कृत्स्नमादाय द्वारि तिष्ठं ५३
ति वारिताः कव्या दादरदा दर्वाः शूरा वैयमकास्तथा औदुंबरा दुर्विभागाः पारदाः सह बाल्हिकैः काश्मी

राः कुंदमानाश्च पौरका हंसकायनाः शिबित्रिगर्तयौधेया राजन्या मद्रकैकयाः अंबष्ठाः कुकुरास्तार्क्ष्या वास्त्र
याः पल्हवैः सह वशातयः समौलेयाः सह क्षुद्रकमालवैः शौंडिकाः कुक्कुराश्चैव शकाश्चैव विशांपते अंगा वंगाश्च
पौंड्राश्च शाणवत्या गयास्तथा सुजातयः श्रेणिमंतः श्रेयांसः शस्त्रपाणयः आजह्नुः क्षत्रिया वित्तं शतशोऽजा
तशत्रवे वंगकालिंगपतयः ताम्रलिप्ताः सपुंड्रकाः द्रविडोड्राः सपांड्याश्च रालाः कुल्यास्तथैव च दुकूलं कौशि
कं चैव पत्रोर्णं प्रवरानपि तत्र स्म द्वारपालैस्ते प्रोच्यंते राजशासनात् कृतकालाः सुबलयस्ततो द्वारमवाप्स्यथ
ईषादंतान्हेमकक्षान्सकुथ्यान्हेमभूषितान् शैलाभान्नित्यमत्तांश्च अभितः काम्यकं सरः दत्त्वैकैको दश
शतान्कुंजरान्कवचावृतान् क्षमावतः कुलीनांश्च द्वारेण प्राविशंस्ततः एते चान्ये च बहवो नानादिग्भ्यः
समागताः अन्यैश्चापि हृतान्यत्र रत्नानि सुमहात्मभिः राजा चित्ररथो नाम गंधर्वो वासवानुगः शतानि च
त्वार्यददद्धयानां वातरंहसां तुंबरुश्च प्रमुदितो गंधर्वो वाजिनां शतं ताम्रपत्रसवर्णानामददद्धेममालिनां
तथैव राजा कार्व्यः शूकराणां विशांपते अददद्गजरत्नानां शतानि सुबहून्यपि विराटेन तु मत्स्येन ब
ल्यर्थं हेममालिनां कुंजराणां सहस्रे द्वे मत्तानां समुपाहृते पांसुराष्ट्राद्वसुदानो राजा षड्विंशतिं गजान्
अश्वानां च सहस्रे द्वे राजन्कांचनमालिनां जवसत्त्वोपपन्नानां वयस्थानां नराधिप बलिं च कृत्स्नमुपादाय पां

सभा
५४

डवेभ्योन्यवेदयत् यज्ञसेनेनदासीनांसहस्राणिचतुर्दश दासानामयुतंचैवसदाराणांविशांपते अददद्गज
लानिजातानिसुबहूनिच गजयुक्तामहाराजरथाःषड्विंशतिस्तथा राज्यंचकृत्स्नंपार्थेभ्योयज्ञार्थेविनिवेदितं
वासुदेवोपिवार्ष्णेयोमानंकुर्वन्किरीटिनः अददद्गजमुख्यानांसहस्राणिचतुर्दश आत्माहिपार्थःकृष्णस्य
कृष्णोप्यात्माकिरीटिनः यद्ब्रूयादर्जुनःकृष्णंसर्वंकुर्यादसंशयं कृष्णोधनंजयस्यार्थेस्वर्गराज्यमपित्यजेत्
तथैवपार्थःकृष्णार्थेप्राणानपिपरित्यजेत् सुरसांश्चंदनस्यान्हेमकुंभसमास्थितान् सह्यजान्
दर्दुरांश्चंदनागरुसंचयान् मणिरत्नानिभास्वंतिकांचनंसूक्ष्मवस्त्रकं चोलपांड्यावपिद्वारं
नलेभात उपस्थितौ समुद्रसारंवैडूर्यंमुक्ताःशंखांस्तथैवच शतशश्चकुथांस्तत्रसिंहलाःसमुपा
हरन् संवृतामणिभिश्चित्रैःश्यामास्ताम्रांतलोचनाः तान्गृहीत्वानरास्तत्रद्वारितिष्ठंतिवारिताः
प्रीत्यर्थंब्राह्मणास्तत्रक्षत्रियाश्चविनिर्जिताः उपाजह्रुर्विशश्चैवशूद्राःशुश्रूषवोपिच प्रीत्याचबहु
मानाच्चप्रत्यागच्छन्युधिष्ठिरं सर्वेम्लेच्छाःसर्ववर्णाआदिमध्यांतजास्तथा नानादेशसमुत्थैश्चनाना श्री:
जातिभिरागतैः पर्यस्तइवलोकोयंयुधिष्ठिरनिवेशने उच्चावचानुपग्राहान्राजभिःप्रापितान्बहून् ५४
शत्रूणांपश्यतोदुःखान्मुमूर्षामेद्यजायत भृत्यास्तुयेपांडवानांतांस्तेवक्ष्यामिभारत येषामामंचप

क्वांसंबिभर्तियुधिष्ठिरः प्रयुतंत्रीणिपद्मानिगजारोहाःससादिनः रथानामर्बुदंचापिपादाताबहवस्तथा प्रमीयमाणमामंपच्यमानंतथैव
चविसृज्यमानंचान्यत्रपुण्याहस्वनएवच नामुक्तवंतंनाहृष्टंनासुभिक्षंकथंचन अपश्यंसर्ववर्णानांयुधिष्ठिरनिवेशने अष्टाशीतिसहस्रा
णिस्नातकागृहमेधिनः त्रिंशद्दासीकएकैकोयान्बिभर्तियुधिष्ठिरः सुप्रीताःपरितुष्टाश्चतेप्याशंसंत्यरिक्षयं दशान्यानिसहस्राणि
यतीनामूर्ध्वरेतसां भुंजतेरुक्मपात्रेषुयुधिष्ठिरनिवेशने कृताकृतंभुक्ताभुक्तंसर्वमाकुब्जवामनं अभुंजानायाज्ञसेनीप्रत्यवेक्ष
तिस्मवै द्वौकरान्नप्रयच्छेतेकुंतीपुत्रायभारत वैवाहिकेनपांचालाःसख्येनांधकवृष्णयः इतिसभापर्वणिद्यूतेदुर्योधनविलापः
५१ दुर्योधनउवाच आर्यास्तुयेवैराजानःसत्यसंधामहाव्रताः पर्याप्तविद्यावक्तारोवेदांतावभृथप्लुताः धृतिमंतोह्रीनि
षेधाधर्मात्मानोयशस्विनः मूर्धाभिषिक्तास्तेचैनंराजानंपर्युपासते दक्षिणार्थंसमानीताराजभिःकांस्यदोहनाः आरण्या
बहुसाहस्राअपश्यंतत्रतत्रगाः आजह्रुस्तत्रसत्कृत्यस्वयमुद्यम्यभारत अभिषेकार्थमव्यग्राभांडमुच्चावचंनृपाः बाह्लीकोरथमा
हार्षीज्जांबूनदपरिष्कृतं सुदक्षिणस्तंयुयुजेश्वैतैःकांबोजजैर्हयैः सुनीथोप्रतिमंतस्यानुकर्षंमहायशाः ध्वजंचेदिपतिःक्षि
प्रमाकार्षीत्स्वयमुद्यतं दाक्षिणात्यःसंहननंस्रगुष्णीषेचमागधः वसुदानोमहेष्वासोगजेंद्रंषष्टिहायनं मत्स्यस्त्वक्षान्हेमबद्धा
नेकलव्यउपानहौ आवंत्यस्त्वभिषेकार्थमपोबहुविधास्तथा चेकितानउपासंगंधनुःकाश्यउपाहरत् असिंचसुत्सरुंशल्यःशै
क्यंकांचनभूषणं अभ्यषिंचत्ततोधौम्योव्यासश्चसुमहातपाः नारदंवैपुरस्कृत्यदेवलंचासितंमुनिं प्रीतिमंतउपातिष्ठन्नभिषेकं
महर्षयः जामदग्न्येनसहितास्तथान्येवेदपारगाः अभिजग्मुर्महात्मानंमंत्रवद्भूरिदक्षिणं महेंद्रमिवदेवेंद्रंदिविसप्तर्षयोयथा
अधारयच्छत्रमस्यसात्यकिःसत्यविक्रमः धनंजयश्चव्यजनंभीमसेनश्चपांडवः चामरेचापिशुद्धेद्वेयमौजगृहतुस्तदा उपागृ

धृतराष्ट्र उवाच त्वं वै ज्येष्ठो वरिष्ठश्च पुत्र मा पांडवान्द्विष द्वेष्टा ह्यसुखमादत्ते यथैव निधनं तथा अव्युत्पन्नं समानार्थं तुल्यमित्रं युधिष्ठिरं अद्विषंतं कथं द्विष्यात्वादृशो भरतर्षभ तुल्याभिजनवीर्यश्च
कथं भ्रातुः सुतन्नृप पुत्र कामयसे मोहात्मैवं भूः मा च्युमास्विह अथ यज्ञविभूतिं तां काङ्क्षसे भरतर्षभ ऋत्विजस्तव तन्वंतु सप्ततंतुं महाध्वरं आहरिष्यंति राजानस्तवापि विपुलं धनं प्रीत्या च बहु

सभा० द्याद्यमिंद्राय पुरा कल्पे प्रजापतिः तमस्मै शंखमाहार्षीद्वारुणं कलशोदधिः शैक्यं निष्कसहस्रेण सुकृतं विश्वकर्मणा तेनाभिषिक्तः कृ
५५ ष्णेन तत्र मे कश्मलोऽभवत् गच्छंति पूर्वादपरं समुद्रं चापि दक्षिणं उत्तरं तु न गच्छंति विना तात पतत्रिभिः तत्र स्म दध्मुः शतशः शंखान्मा
गल्यकारणात् प्रणेदुस्ते समाध्मातास्तत्र रोमाणि मे हृषन् प्रापतन्भूमिपालाश्च ये तु हीनाः स्वतेजसा धृष्टद्युम्नः पांडवाश्च सा
त्यकिः केशवोऽष्टमः सत्वस्थाः सत्वसंपन्ना अन्योन्यप्रियदर्शनाः विसंज्ञान्भूमिपान्दृष्ट्वा मां च ते प्राहसंस्तदा ततः प्रहृष्टो बीभत्सुः प्राद
द्धेमविषाणिनां शतान्यनडुहां पंच द्विजमुख्येषु भारत नरंतिदेवो नाभागो यौवनाश्वो मनुर्न च न च राजा पृथुर्वैन्यो न चाप्यासीद्भगी
रथः यथातिमात्रं कौंतेयः श्रिया परमया युतः राजसूयमवाप्यैव हरिश्चंद्र इव प्रभुः एवं दृष्ट्वा श्रियं पार्थे हरिश्चंद्रे यथा विभो कथं तु जी
वितं श्रेयो मम पश्यसि भारत अंधेनेव युगं नद्धं विपर्यस्तं नराधिप कनीयांसो विवर्द्धंते ज्येष्ठा हीयंति भारत एवं दृष्ट्वा नाभिविंदामि शर्म
परीक्षमाणोऽपि कुरुप्रवीर तेनाहमेवं कृशतां गतश्च विवर्णतां चैव सशोकतां च इति सभापर्वणि द्यूते दुर्योधनवाक्यं ५२
दुर्योधनः यस्य नास्ति निजा प्रज्ञा केवलं तु बहुश्रुतः स न जानाति शास्त्रार्थं दर्वी सूपरसानिव जानन्वै मोहयसि मां नावि नौरिव
संयता स्वार्थे किं नावधानं ते उताहो द्वेष्टि मां भवान् न संतीमे धार्तराष्ट्रा येषां त्वमनुशासिता भविष्यमर्थमाख्यासि यदा त्वं कृत्य
मात्मनः परनेयोऽग्रणीर्यस्य स मार्गान्प्रतिमुह्यति पंथानमनुगच्छेयुः कथं तस्य पदानुगाः राजन्परिणतप्रज्ञो वृद्धसेवी जितें
द्रियः प्रतिपन्नान्स्वकार्येषु संमोहयसि नो भृशं लोकवृत्ताद्राजवृत्तमन्यदाह बृहस्पतिः तस्माद्राज्ञा प्रयत्नेन स्वार्थश्चिंत्यः स
दैव हि क्षत्रियस्य महाराज जयेवृत्तिः समाहिता स वै धर्मस्त्वधर्मो वा स्ववृत्तौ भरतर्षभ प्रकालयेद्दिशः सर्वाः प्रतोदेनेव सारथिः प्र
त्यमित्रश्रियं दीप्तां बुभूषुर्भरतर्षभ प्रच्छन्नो वा प्रकाशो वा योगो योऽरिं प्रबाधते तद्वै शस्त्रं शस्त्रविदां न शस्त्रं छेदनं स्मृतं शत्रुश्चैव हि ५५

मानाग्र्यरत्नान्याभरणानि च अनार्याचरणं तात परस्वाहरणं भृशं स्वसंतुष्टः स्वधर्मस्थो यः स वै सुखमेधते अव्यापारः परार्थेषु नित्योद्योगः स्वकर्मसु उद्यमो रक्षणे चैव यो मे तद्वै भवलक्षणं विपत्ति
ष्वव्यथो दक्षो नित्यमुत्थानवानरः अप्रमत्तो विनीतात्मा नित्यं भद्राणि पश्यति पांडोः सुतान्मा द्विषस्वेह राजंस्तथैव ते भ्रातृधनं च सर्वं मित्रद्रोहे तात महानधर्मः पितामहा ये तव ते पि तेषां अंतर्वेद्यां
ददद्वित्तं कामाननुभवन्प्रियान् क्रीडन्स्त्रीभिर्निरातंकः प्रशाम्य भरतर्षभ ॥ इति सभापर्वणि द्यूते ५३॥ ॥

क्षिप्रमानय दुर्धर्षं कुंतीपुत्रं युधिष्ठिरं इति सभापर्वणि द्यूते ५४ वैशं० ततः प्रायाद्विदुरोऽश्वैरुदारैर्मनोजवैर्बलिभिः सा
धुदांतैः बलान्नियुक्तो धृतराष्ट्रेण राज्ञा मनीषिणां पांडवानां सकाशं सोऽभिपद्य तदध्वानमासाद्य नृपतेः पुरं प्रविवेश महाबुद्धिः पूज्य
मानो द्विजातिभिः स राजगृहमासाद्य कुबेरभवनोपमं अभ्यागच्छत धर्मात्मा धर्मपुत्रं युधिष्ठिरं तं वै राजा सत्यधृतिर्महात्मा अजा
तशत्रुर्विदुरं यथावत् पूजापूर्वं प्रतिगृह्याजमीढस्ततोऽपृच्छद्धृतराष्ट्रं सपुत्रं युधिष्ठिरः विज्ञायते ते मनसो न प्रहर्षः कच्चित्क्षत्तः कुश
लेनागतोऽसि कच्चित्पुत्राः स्थविरस्यानुलोमा वशानुगाश्चापि विशोऽनु कच्चित् विदुरः राजा महात्मा कुशली सपुत्र आस्ते वृतो ज्ञाति
भिरिंद्रकल्पैः प्रीतो राजन्पुत्रगणैर्विनीतो विशोक एवात्मरतिर्महात्मा इदं तु त्वां कुरुराजोऽभ्युवाच पूर्वं पृष्ट्वा कुशलं चाव्ययं च प्रीया
मह्ये सभा ... संगमेन समागताः कुरव ... सर्वे दुरोदराविहितायेतु तत्र महात्मानो धृतराष्ट्रेण राज्ञा तान्द्रक्ष्यसि त्वं कितवान्संनिविष्टा
नित्यागतोऽहं नृपते तज्जुषस्व युधिष्ठिरः द्यूते क्षत्तः कलहो विद्यते नः को वै द्यूतं रोचयेद्बुध्यमानः किं वा भवान्मन्यते युक्तरूपं भ
वद्वाक्ये सर्व एव स्थिताः स्मः विदुरः जानाम्यहं द्यूतमनर्थमूलं कृतश्च यत्नोऽस्य निवारणे मया राजा तु मां प्राहिणोत्त्वत्सकाशं श्रु
त्वा विद्वन् श्रेय एवाचरस्व युधिष्ठिरः के तत्रान्ये कितवा दीव्यमाना विना राज्ञो धृतराष्ट्रस्य पुत्रैः पृच्छामि त्वां विदुर ब्रूहि नस्तान्येर्दीव्या
मः शतशः सन्निपत्य विदुरः गांधारराजः शकुनिर्विशांपते राजातिदेवी कृतहस्तो मताक्षः विविंशतिश्चित्रसेनश्च राजा सत्य
व्रतः पुरुमित्रो जयश्च युधिष्ठिरः महाभयाः कितवाः सन्निविष्टा मायोपधा देवितारोऽत्र संति धात्रा तु दिष्टस्य वशे किलेदं ना
देवनं कितवैरद्य तेर्मे नाहं राज्ञो धृतराष्ट्रस्य शासनान्न गंतुमर्हामि कवे दुरोदरं इष्टो हि पुत्रस्य पिता सदैव तदस्मि कर्ता विदुरात्थ
मां यथा न चाकामः शकुनिना देविताहं न चेन्मां धृष्ट आह्वयिता सभायां आहूतोऽहं न निवर्ते कदाचित्तदाहितं शाश्वतं वै व्रतं मे वैशं०

सभा० एवमुक्त्वाविदुरंधर्मराजःप्रायात्रिकंसर्वमाज्ञाप्यतूर्णं प्रायाच्छ्वोभूतेसगणःसानुयात्रःसहस्त्रीभिर्द्रौपदीमादिकृत्वा दैवंप्रज्ञांमुष्णातितेज
५८ श्चक्षुरिवापतत् धातुश्चवशमन्वेतिपाशैरिवनरःसितः इत्युक्त्वाप्रययौराजासहक्षत्त्रायुधिष्ठिरः अमृष्यमाणस्तत्पार्थःसमाह्वानम
रिंदमः बाह्लीकेनरथंदत्तमास्थायपरवीरहा परिछन्नोययौराजाभ्रातृभिःसहपांडवः राजश्रियादीप्यमानस्ततोब्रह्मपुरःसरः धृत
राष्ट्रेणचाहूतःकालस्यसमयेनच सहास्तिनपुरंगत्वाधृतराष्ट्रगृहंययौ समीयायचधर्मात्माधृतराष्ट्रेणपांडवः तथाद्रोणेनकर्णेन
भीष्मेणचकृपेणच समीयाययथान्यायंद्रौणिनाचविभुःसह बाह्लीकेनचराजेंद्रसोमदत्तेनचैवहि दुर्योधनेनशल्येनसौबलेन
चवीर्यवान् येचान्येतत्रराजानःपूर्वमेवसमागताः दुःशासनेनकौंतेयःसर्वैर्भ्रातृभिरेवच जयद्रथेनचतथाकुरुभिश्चापिसर्वशः ततः
सर्वैर्महाबाहुर्भ्रातृभिःपरिवारितः प्रविवेशगृहंराज्ञोधृतराष्ट्रस्यधीमतः ददर्शतत्रगांधारींदेवींपतिमनुव्रताम् स्नुषाभिःसंवृतांश
श्वत्ताराभिरिवरोहिणीं अभिवाद्यसगांधारींतयाचप्रतिनंदितः ददर्शपितरंवृद्धंप्रज्ञाचक्षुषमीश्वरं राज्ञामूर्द्धन्युपाघ्रातास्तेचकौर
वनंदनाः चत्वारःपांडवाराजन्भीमसेनपुरोगमाः ततोहर्षःसमभवत्कौरवाणांविशांपते तान्दृष्ट्वापुरुषव्याघ्रान्पांडवान्प्रियदर्शना
न् विविशुस्तेभ्यनुज्ञातारत्नवंतिगृहाण्युत ददृशुश्चोपयातांस्तान्दुःशलाप्रमुखास्त्रियः याज्ञसेन्याःपरामृद्धिंदृष्ट्वाप्रज्वलिता
मिव स्नुषास्ताधृतराष्ट्रस्यनातिप्रमनसोभवन् तास्तेपुरुषव्याघ्रागत्वास्त्रीभिस्तुसंविदं कृत्वाव्यायामपूर्वाणिकृत्यानिप्रति
कर्मच ततःकृताह्निकाःसर्वेदिव्यचंदनरूषिताः कल्याणमनसश्चैवब्राह्मणान्स्वस्तिवाच्यच मनोज्ञमशनंभुक्त्वाविविशुर्भवना
न्युत उपगीयमानानारीभिरस्वपन्कुरुनंदनाः जगामतेषांसारात्रिःपुण्यारतिविहारिणी स्तूयमानाश्चविश्रांताःकालेनिद्राम् ५८
थात्यजन् सुखोषितास्तांरजनींप्रातःसर्वेकृताह्निकाः सभांरम्यांप्रविविशुःकितवैरभिसंवृताः इतिसभापर्वणिद्यूते५५

वैशंपायनः प्रविश्यतांसभांपार्थायुधिष्ठिरपुरोगमाः समेत्यपार्थिवान्सर्वान्पूजार्हानभिपूज्यच यथावयःसमेयानांउपविष्टायथार्हतः
आसनेषुविचित्रेषुस्पर्द्ध्यास्तरणवत्सुच अथतेषूपविष्टेषुसर्वेषुनृपेषुच शकुनिःसौबलस्तत्रयुधिष्ठिरमभाषत शकुनिः उपस्ती
र्णासभाराजन्सर्वेत्वयिकृतक्षणाः अक्षानुप्त्वादेवनस्यसमयोस्तुयुधिष्ठिर युधि० निकृतिर्देवनंपापंनक्षात्रोत्रपराक्रमः नचनीति
र्ध्रुवाराजन्किंत्वंद्यूतंप्रशंससि नहिमानंप्रशंसंतिनिकृतौकितवस्यह शकुनेमैवंनोजैषीरमार्गेणनृशंसवत् शकुनिः योवेत्ति
संख्यांनिकृतौविधिज्ञश्चेष्टास्वखिन्नःकितवोक्षजासु महामतिर्यश्चजानातिद्यूतंसर्वंसहतेप्रक्रियासु अक्षग्लहःसोभिभवेत्प
रंनस्तेनैवदोषोभवतीहपार्थ दीव्यामहेपार्थिवमाविशंकांकुरुष्वपाणंचचिरंचमाकृथाः युधि० एवमाहायमसितोदेवलोमुनिसत्त
मः इमानिलोकद्वाराणियोवैभ्राम्यत्यलंवशी इदंवैदेवनंपापंमाययाकितवैःसह धर्मेणतुजयोयुद्धेतत्परंसाधुदेवनं नार्याम्लेच्छंति
भाषाभिर्माययानचरंत्युत अजिह्ममशठंयुद्धमेतत्सत्पुरुषव्रतं शक्तितोब्राह्मणार्थायशिक्षितुंप्रयतामहे तद्वैवित्तंमातिदेवी
र्जैषीर्माशकुनेपरान् निकृत्याकामयेनाहंसुखान्युतधनानिच कितवस्येहकृतिनोवृत्तमेतन्नपूज्यते शकुनिः श्रोत्रियोश्रो
त्रियानेतिनिकृत्यैवयुधिष्ठिर विद्वानविदुषोभ्येतिनाहुस्तांनिकृतिंजनाः अक्षैर्हिशिक्षितोभ्येतिनिकृत्यैवयुधिष्ठिर विद्वानवि
दुषोभ्येतिनाहुस्तांनिकृतिंजनाः अकृतास्त्रंकृतास्त्रश्चदुर्बलंबलवत्तरः एवंकर्मसुसर्वेषुनिकृत्यैवयुधिष्ठिर विद्वानविदुषोभ्ये
तिना० एवंत्वंमामिहाभ्येत्यनिकृतिंमन्यसेयदि देवनाद्विनिवर्तस्वयदितेविद्यतेभयं युधि० आहूतोननिवर्तेयमितिमेव्रत
माहितं विधिश्चबलवान्राजादिष्टस्यास्मिवशेस्थितः अस्मिन्समागमेकेनदेवनंमेभविष्यति पणश्चवेहिकोन्यस्तस्ततोद्यूतंप्र
वर्ततां दुर्योधनः अहंदातास्मिरत्नानांधनानिविविधानिच मदर्थेदेवितायंशकुनिर्मातुलोमम युधि० अन्येनान्यस्य

सभा० वैद्यूतंविषमंप्रतिभातिमे एतद्बुद्ध्वाउपादत्स्वकाममेवंप्रवर्त्ततां वैशं० उपोह्यमानेद्यूतेतुराजानःसर्वएवतु धृतराष्ट्रंपुरस्कृत्यविविशु
५८ स्तांसभांनृप भीष्मोद्रोणःकृपश्चैवविदुरश्चमहामतिः नैवातिप्रीतमनसस्तेन्ववर्त्ततभारत द्वंद्वशश्चपृथक्चैवसिंहग्रीवामहाभुजाः सिं
हासनानिभूरीणिविचित्राणिचभेजिरे शुशुभेसासभाराजन्राजभिस्तैःसमागतैः देवैरिवमहाभागैःसमवेतैस्त्रिविष्टपं सर्वेवेदविदः
शूराःसर्वेभास्वरमूर्त्तयः प्रावर्त्ततमहाराजसुहृद्द्यूतमनंतरं युधि० अयंबहुधनोराजन्सागरावर्त्तसंभवः मणिर्हारोत्तरःश्रीमान्क
नकोत्तमभूषणः एतद्राजन्ममधनंप्रतिपाणोस्तिकस्तव भवत्वेषक्रमस्तावज्जयाम्येनंदुरोदरं दुर्योधनः संतिमेमणयश्चैवधनानि
विविधानिच मत्सरश्चनमेर्थेषुजयाम्येनंदुरोदरं वैशं० ततोजग्राहशकुनिस्तानक्षानक्षतत्त्ववित् जितमित्येवशकुनिस्तानक्षान्प्रति
पद्यत इतिसभापर्वणिद्यूते ५६ युधि० मत्तःकितवकेनेहयज्जितोसिदुरोदरं शकुनेहंतदीव्यामग्लहमानःसहस्र
शः इमेनिष्कसहस्राणांभांडिनोभरिताःशतं कोशोहिरण्यमक्षय्यंजातरूपमनेकशः एतद्राजन्ममधनंतेनदीव्याम्यहंत्वया
इत्युक्तःशकुनिःप्राहप्रहसन्पापचेतनः जितमित्येवनृपतेभूयस्त्वंकेनदीव्यसे युधि० अयंसहस्रसमितोवैयाघ्रःसुप्रवर्तितः
सुचक्रोपस्करःश्रीमान्किंकिणीजालमंडितः संह्लादनोराजरथोयइहास्मानुपावहत् जैत्रोरथवरःपुण्योमेघसागरनिःस्वनः अष्टौ
मेकुररच्छायाःसदश्वाराष्ट्रसंमताः वहंतिनैषांमुच्येतपादाद्भूमिमुपस्पृशन् एतद्राजन्ममधनंतेनदीव्याम्यहंत्वया वैशं० ए
तच्छ्रुत्वाव्यवसितोनिकृतिंसमुपाश्रितः जितमित्येवशकुनिर्युधिष्ठिरमभाषत युधिष्ठिरः शतंदासीसहस्राणितरुण्योहेमभ ५८
द्रिकाः कंबुकेयूरधारिण्योनिष्ककंठ्यःस्वलंकृताः महार्हमाल्याभरणाःसुवस्त्राश्चंदनोक्षिताः मणीन्हेमचबिभ्रत्यःसर्वाश्चतुःषष्टिविशा
रदाः अनुसेवांचरंतीमाःकुशलान्नृपसामसु स्नातकानाममात्यानांराज्ञांचममशासनात् एतद्राजन्ममधनंतेनदीव्याम्यहंत्वया

मित्रंचनलेख्यंनचमातृका योवैसंतापयतियंसशत्रुःप्रोच्यतेनृप असंतोषःश्रियोमूलंतस्मात्तंकामयेनृप समुच्छ्रायायततेसराजन्य
स्मोनयी समलंहिनकर्त्तव्यंऐश्वर्यबाधनेपिवा पूर्वावाप्तंहरंत्यन्येराजधर्मंहितंविदुः अद्रोहेसमयंकृत्वाचिच्छेदनमुचेःशिरः शक्रःसा
हिमतातस्यरिपौवृत्तिःसनातनी द्वाविमौग्रसतेभूमिःसर्पोबिलशयानिव राजानंचाविरोद्धारंब्राह्मणंचाप्रवासिनं नास्तिवैजा
तितःशत्रुःपुरुषस्यविशांपते येनसाधारणीवृत्तिःसशत्रुर्नेतरोजनः शत्रुपक्षंसमृध्यंतंयोमोहात्समुपेक्षते व्याधिराप्यायितइवत
स्यमूलंछिनत्तिसः अल्पोपिह्यरिरत्यर्थंवर्धमानपराक्रमः वल्मीकोमूलजइवग्रसतेवृक्षमंतिकात् आजमीढरिपोर्लक्ष्मीर्मातेरोचि
ष्टभारत एषभारःसत्ववतांनयःशिरसिधिष्ठितः जन्मवृद्धिमिवार्थानांयोवृद्धिमभिकांक्षति एधतेज्ञातिषुसवैसद्योवृद्धिर्हिविक्र
मः नाप्राप्यपांडवैश्वर्यंसंशयोमेभविष्यति अवाप्स्येवाश्रियंतांहिशेष्येवानिहतोयुधि एतादृशस्यकिंमेद्यजीवितस्यविशांप
ते वर्द्धंतेपांडवानित्यंवयंत्वस्थिरवृद्धयः इतिसभापर्वणिद्यूते ५३ शकुनिः यांत्वमेतांश्रियंदृष्ट्वापांडुपुत्रेयुधिष्ठिरे
तप्यसेतांहरिष्यामिद्यूतेनजयतांवर आहूयतांपरोराजन्कुंतीपुत्रोयुधिष्ठिरः अगत्वासंशयमहमगत्वाचचमूमुखे अक्षा
न्क्षिपन्नक्षतःसन्विद्वानविदुषोजये ग्लहान्धनूंषिमेविद्धिशरानक्षांश्चभारत अक्षाणांहृदयंमेज्यांरथंविद्धिममास्तरं दु
र्योधनः अयमुत्सहतेराजन्श्रियमाहर्तुमक्षवित् द्यूतेनपांडुपुत्रेभ्यस्तत्तातततवरोचतां धृतराष्ट्रः स्थितोस्मिशासनेभ्रातुर्वि
दुरस्यमहात्मनः तेनसंगम्यवक्ष्यामिकार्यस्यास्यविनिश्चयं दुर्योधनः विहनिष्यतितेबुद्धिंविदुरोनात्रसंशयः पांडवानांहितेयु
क्तोनतथाममकौरव नारभेतान्यसामर्थ्यात्पुरुषःकार्यमात्मनः मतिसाम्यंद्वयोर्नास्तिकार्येषुकुरुसत्तम भयंपरिहरन्मंद आ
त्मानंपरिपालयन् वर्षासुक्लिन्नकटवत्तिष्ठन्नेवावसीदति नव्याधयोनापियमःश्रेयःप्राप्तिंप्रतीक्षते यावदेवभवेत्कल्पस्तावच्छ्रेयः

सभा० समाचरेत् धृतराष्ट्रः सर्वथापुत्रबालिशिप्रियहोमेनरोचते वैरंविकारंस्रजतितद्धेशस्त्रमनायसं अनर्थमर्थंमन्यसेराजपुत्रसंग्रथ
५६ नंकलहस्यातिघोरं तद्धिप्रवृत्तंतुयथाकथंचित्स्रजेद्दसीन्निशितान्सायकांश्च दुर्योधनः द्यूतेपुराणैर्व्यवहारःप्रणीतस्तत्रापायोना
स्तिनसंप्रहारः तद्रोचतांतेशकुनेर्वाक्यमद्यसभांक्षिप्रंत्वमिहाज्ञापयस्व स्वर्गद्वारंदीव्यतांनोविशिष्टंतद्वर्तिनांवापितथैवयुक्तं भवे
द्वेहात्मनस्तुल्यमेवदुरोदरंपांडवैस्त्वंकुरुष्व धृतराष्ट्रः वाक्यंनमेरोचतेयत्त्वयोक्तंयत्तेप्रियंतत्क्रियतांनरेंद्र पश्चात्तप्स्यसेतदुपाक्रम्य
वाक्यंनहीदृशंभाविववोह्यधर्म्यं दृष्टंह्येतद्विदुरेणैवमेसर्वंपूर्वंबुद्धिविद्यानुगेन तदेवैतदैववशादुपैतिमहद्भयंक्षत्रिजीवघाति
वैशंपायनः एवमुक्त्वाधृतराष्ट्रोमनीषीदैवंमत्वापरमंदुस्तरंच शशासोच्चैःपुरुषान्पुत्रवाक्येस्थितोराजादैवसंमूढचेताः सह
स्रस्तंभांहेमवैदूर्यचित्रांशतद्वारांतोरणोदग्रशृंगां सभामग्र्यांक्रोशमात्रायतांमेतद्विस्तारामाशुकुर्वंतुयुक्ताः श्रुत्वातस्यत्वरिता
निर्विशंकाःप्राज्ञादक्षास्तांतथाचक्रुराशु सर्वद्रव्याण्युपजह्रुःसभायांसहस्रशःशिल्पिनश्चापियुक्ताः कालेनाल्पेनाथनिष्ठांग
तांतांसभांरम्यांबहुरत्नांविचित्रां चित्रैर्हैमैरासनैरभ्युपेतांतामाचख्युस्तेतस्यराज्ञःप्रतीताः ततोविद्वान्विदुरंमंत्रिमुख्यमुवाचेदं
धृतराष्ट्रोनरेंद्रः युधिष्ठिरंराजपुत्रंहिगत्वामद्वाक्येनक्षिप्रमिहानयस्व सभेयंमेबहुरत्नाविचित्राशय्यासनैरुपपन्नामहार्हैः सा
दृश्यतांभ्रातृभिःसार्द्धमेत्यसुहृद्द्यूतंवर्ततामत्रचेति वैशं० मतमाज्ञायपुत्रस्यधृतराष्ट्रोमहीपतिः मत्वाचदुस्तरंदैवमेतद्रा
जाचकारह अन्यायेनतथायुक्तंविदुरोविदुषांवरः नाभ्यनंदद्वचोभ्रातुर्वचनंचेदमब्रवीत् विदुरः नाभिनंदामिनृपतेप्रै
षमेतंमैवंकृथाःकुलनाशाद्विभेमि पुत्रैर्भिन्नैःकलहस्तेध्रुवंस्यादेतच्छंकेद्यूतकृतेनरेंद्र धृतराष्ट्रः नेहक्षत्तःकलहस्त ५६
प्स्यतेमांनचेद्दैवंप्रतिलोमंभविष्यत् धात्रातुदिष्टस्यवशेकिलेदंसर्वंजगच्चेष्टतेनस्वतंत्रं तदद्यविदुरप्राप्यराजानंममशासनात्

एतच्छ्रुत्वाव्यवसितोनिकृतिंसमुपाश्रितः जितमित्येवशकुनिस्तानक्षान्समपद्यत युधिष्ठिरः एतावंत्येवदासानांसहस्राण्युतसंतिमे द
क्षिणावानुकूलाश्चप्रवारवसनाःसदा प्रज्ञामेधाविनोदांतायुवानोमृष्टकुंडलाः पात्रीहस्तादिवारात्रमतिथीन्भोजयंतिच एतद्राजन्मम
धनंतेनदीव्याम्यहंत्वया एतच्छ्रुत्वाव्यवसितोनिकृतिंसमुपाश्रितः जितमित्येवशकुनिर्युधिष्ठिरमभाषत युधिष्ठिरः सहस्रसंख्यान्ना
गामेमत्तास्तिष्ठंतिसौबल हेमकक्षाःकृतापीडाःपद्मिनोहेममालिनः सुदांताराजवहनाःसर्वशब्दक्षमायुधि ईषादंतामहाकायाःस
र्वेचाष्टकरेणवः सर्वेचपुरभेत्तारोनवमेघनिभागजाः एतद्राजन्ममधनंतेनदीव्याम्यहंत्वया वैशं० इत्येवंवादिनंपार्थंप्रहसन्निवसौ
बलः जितमित्येवशकुनिर्युधिष्ठिरमभाषत युधि० रथास्तावंतएवेमेहेमदंडाःपताकिनः हयैर्विनीतैःसंपन्नारथिभिश्चित्रयो
धिभिः एकैकोयत्रलभतेसहस्रपरमांभृतिं युध्यतोयुध्यतोवापिवेतनंमासकालिकं एतद्राजन्ममधनंतेनदीव्याम्यहंत्वया वैशं०
एतच्छ्रुत्वाव्यवसितोनिकृतिंसमुपाश्रितः जितमित्येवशकुनिर्युधिष्ठिरमभाषत युधिष्ठिरः अश्वांस्तित्तिरिकल्माषान्गांधर्वान्हे
ममालिनः ददौचित्ररथस्तुष्टोयांस्तान्गांडीवधन्वने एतद्राजन्ममधनंतेनदीव्याम्यहंत्वया वैशं० एतच्छ्रुत्वाव्यवसितोनिकृतिंस
मुपाश्रितः जितमित्येवशकुनिर्युधिष्ठिरमभाषत युधि० रथानांशकटानांचहयानांचायुतानिमे युक्तान्येवहितिष्ठंतिवाहैरुच्चा
वचैर्वृताःहि तथासमुदितावीराःसर्वेवीरपराक्रमाः क्षीरंपिबंतस्तिष्ठंतिभुंजानाःशालितंडुलान् षष्टिस्तानिसहस्राणिन्दपाणांपृ
थुवक्षसां एतद्राजन्ममधनंतेनदीव्याम्यहंत्वया वैशं० एतच्छ्रुत्वाव्यवसितोनि० जितमि० युधि० ताम्रलोहैःपरिवृतानिधयो
यसुःशताः पंचद्रौणिकएकैकःसुवर्णस्याहतस्यवै एतद्राजन्ममधनंतेनदीव्याम्यहंत्वया वैशं० एतच्छ्रुत्वाव्यव० जितमित्येवशकु०
इतिसभापर्वणिद्यूते ५७ वैशं० एवंप्रवर्तितेद्यूतेघोरेसर्वापहारिणि सर्वसंशयनिर्मोक्ताविदुरोवाक्यमब्रवीत् विदु०

सभा०
५७ महाराजविजानीहियत्त्वांवक्ष्याम्यहंतया मुमूर्षोरौषधमिवनरोचेतापितेश्रुतं यद्वैपुराजातमात्रोरुरावगोमायुवद्विस्वरंपापचेताः
दुर्योधनोभरतानांकुलघ्नःसोयंनूनंभविताकालहेतुः गृहेवसंतंगोमायुंकथंत्वंनावबुध्यसे दुर्योधनस्यरूपेणशृणुकाव्यांगिरंमम
मधुवैमाध्विकोलब्ध्वाप्रपातंनावबुध्यते आरुह्यतंमज्जतिवापतनंवाधिगच्छति सोयंमत्तोक्षदेवनेनमधुवन्नपरीक्षते प्रपातंबुध्य
तेनैववैरंकुर्वन्महारथैः विदितंमेमहाराजभोजेष्वेवासमंजसं अंधकायादवाभोजाःसमेताःकंसमत्यजन् नियोगाच्चहतेतस्मिन्कृष्णे
नामित्रघातिना एवंतेज्ञातयःसर्वेमोदमानाःशतंसमाः त्वन्नियुक्तःसव्यसाचीनिगृह्णातुसुयोधनं निग्रहादस्यपापस्यमोदंतांकु
रवःसुखं काकेनेमांश्चित्रबर्हान्शार्दूलान्क्रोष्टुकेनच क्रीणीष्वपांडवान्राजन्मामज्जीःशोकसागरे त्यजेत्कुलार्थेपुरुषंग्रामस्या
र्थेकुलंत्यजेत् ग्रामंजनपदस्यार्थेआत्मार्थेपृथिवींत्यजेत् सर्वज्ञःसर्वभावज्ञःसर्वशत्रुभयंकरः इतिस्मभाषतेकाव्योजंभत्यागे
महासुरान् हिरण्यष्ठीविनःकश्चित्पक्षिणोवनगोचरान् गेहेकिलकृतावासान्लोभाद्राजन्नपातयत् सदोपभोज्यान्लोभांधोहि
रण्यार्थेपरंतप आयतिंचतदात्वंचउभेसद्योव्यनाशयत् तदर्थकामःपांडवान्माद्रुहोभरतर्षभ मोहात्मातप्स्यसेपश्चात्पक्षिहा
पुरुषोयथा जातंजातंपांडवेभ्यःपुष्पमादत्स्वभारत मालाकारइवारामेस्नेहंकुर्वन्पुनःपुनः वृक्षानंगारकारीवमैनान्धाक्षीःसमू
लकान् मागमःससुतामात्यःसबलश्चयमक्षयं समवेतान्हिकःपार्थान्प्रतियुध्येतभारत मरुद्भिःसहितोराजन्नपिसाक्षा
न्मरुत्पतिः इतिसभापर्वणिद्यूते ५८ विदुरः द्यूतंमूलंकलहस्याभ्युपैतिमिथोभेदान्महतेवैभयाय तदास्थि ५७
तोयंधृतराष्ट्रस्यपुत्रोदुर्योधनःसृजतेवैरमुग्रं प्रातिपेयाःशांतनवाभैमसेनाःसबाह्लिकाः दुर्योधनापराधेनकृच्छ्रंप्राप्स्यंति
सर्वशः दुर्योधनोमदेनैषक्षेमंराष्ट्रादपोहति विषाणंगौरिवबलात्स्वयमारुज्यतेमनः यश्चित्तमन्वेतिपरस्यराजन्वीरःकविःस्वा

मवमन्यदृष्टिं नावंसमुद्रइवबालनेत्रामारुह्यघोरेव्यसनेनिमज्जेत् दुर्योधनोग्लहतेपांडवेनप्रीयायसेत्वंजयतीतितच्च अतःसमुन्मज्जा
तिसंप्रहारायातोविनाशःसमुपैतिपुंसां आकर्षस्तेवाक्फलेकुप्रणीतोहृदिप्रौढोमंत्रपदःसमाधिः युधिष्ठिरेणकलहस्तवायमचिंतितो
भिमतःस्वबंधुना प्रातिपेयःशांतनवाश्चसर्वेकाव्यावाचंशृणुतमात्यगाद्वः वैश्वानरंप्रज्वलितंसुघोरमयुद्धेनप्रशमयस्वोत्पतंतं यदा
मन्युंपांडवोजातशत्रुर्नसंयच्छेदक्षमदाभिभूतः वृकोदरःसव्यसाचीयमौचकोत्रद्वीपःस्यात्तुमुलेवस्तदानीं महाराजप्रभवस्त्वंधना
नांविनाद्यूतान्मनसायद्यदिच्छेः बहुवित्तंपांडवांश्चेज्जयेस्त्वंकिंतेनस्याद्वसुविंदस्वपार्थान् जानीमहेदेवितंसौबलस्यवेदद्यूतेनिकृ
तिंपार्वतीयः यतःप्राप्तःशकुनिस्तत्रयातुमायुयुधोभारतपांडवेयान् दुर्योधनः परेषामेवयशसाश्लाघसेत्वंयथात्यतःकुत्सय
हिपांडवेयान्प्रशंस न्धार्त्तराष्ट्रान् जानीमस्त्वांविदुरयत्प्रियस्त्वंबालानिवास्मानवमन्यसेनित्यमेव सविज्ञेयःपुरुषोन्यत्रकामोनिंदाप्रशंसेहितयोयुनक्ति
जिह्वाकथयतेहृदयंयनक्तियोनःकथामनसःप्रातिकूल्यं उत्संगेनव्यालइवाहृतोसिमार्जारवत्पोषकंचोपहंसि भर्तृघ्नत्वान्नहिपापी
यआहुस्तस्मात्क्षत्तःकिंनबिभेषिपापात् जित्वाशत्रून्फलमाप्तंमहन्नोमास्मक्षत्तःपरुषाणीहवोचः द्विषद्भिस्त्वंसंप्रयोगाभिनंदी
यासिनःसंप्रयोगात् अमित्रतांयातिपरोक्षमब्रुवन्निगूहतेगुह्यममित्रसंस्तवे तदाश्रितःपार्थिवमेवबाधसेयदिच्छसित्वंतदिहाद्य
भाषसे मानावमंस्थाविद्ममनस्तवेदं शिक्षस्वबुद्धिंस्थविराणांसकाशात् यशोरक्षस्वविदुरसंप्रणीतंमाव्यापृतःपरकार्येषु
भूस्त्वं अहंकर्तेतिविदुरमावमंस्थामानोनित्यंपरुषाणीहवोचः नत्वांपृच्छामिविदुरयद्धितंमेस्वस्तिक्षत्तर्मातितिक्षून्क्षिणुत्वं एकः
शास्तानद्वितीयोस्तिशास्तागर्भेशयानंपुरुषंशास्तियोवै तेनानुशिष्टःप्रवणादिवांभोयथानियुक्तोस्मितथावहामि भिनत्ति
शिरसाशैलमहिंभोजयतेचयः सएवकुरुतेतत्रकार्याणामनुशासनं योबलादनुशास्तीहसोमित्रंतेनविंदति मैत्रतामनुवृत्त

सभा० स्यसमुपेक्षत्तपंडितः प्रदीप्यपःप्रदीप्ताग्निंप्राक्किरंनाभिधावति भस्मापिनसविंदेतशिष्टंकस्नभारत नवासयेत्पारवर्ग्यंक्षिप्तंतंवि
६० शषतःक्षत्तरहितंमनुष्यं सयत्रैछसिविदुरतत्रगछसुसांत्विपितोस्त्रीअसतीजहाति विदु० एतावत्तायेपुरुषंत्यजंतितेषांवृत्तंसाक्षिव
द्बुहिराजन् राज्ञांहिवित्तानिपरिप्लुतानिसांत्वंदत्वामुसलैर्घातयंति अबालत्वंमन्यसेराजपुत्रबालोहमित्येवसुमंदबुद्धे यःसौह
दंप्रथमंस्थापयित्वापश्चादेनंदूषयेत्तसबालः नश्रेयसेयुज्यसेमंदबुद्धेस्त्रीश्रोत्रियस्यवगृहेप्रदुष्टा ध्रुवंनरानेच्छतिभर्तृपस्यपतिः
कुमार्याइवषष्टिवर्षः अतःप्रियंवेदनुकांक्षसेत्वंसर्वेषुकार्येषुहिताहितेषु स्त्रियश्चराजन्जडपंगुकांश्चसंपृच्छत्वंतादृशांश्चैवमूढा
न् लभ्यतेखलुपापीयान्नरोत्रप्रियवागिह अप्रियस्यतुपथ्यस्यवक्ताश्रोताचदुर्लभः यस्तुधर्ममुपाश्रित्याहित्वाभर्तुःप्रियाप्रिये
अप्रियाण्याहपथ्यानितेनराज्ञासहायवान् अव्याधिजंकटुकंतीक्ष्णमुष्णंयशोमुषंपरुषंपूतिगंधि सतांपेयंयन्नपिबंत्य
संतोमन्युंमहाराजपिबप्रपश्य वैचित्रवीर्यस्ययशोधनंचवांछाम्यहंसहपुत्रस्यशश्वत् तथास्तुतेयशःशिवंममापिचस्वस्ति
दिशंतुसंतः आशीविषान्नेत्रविषान्कोपयेन्नतुपंडितः एतत्तेहंवदाम्येषप्रयतःकुरुनं॰तथा॰दन इतिसभापर्वणिद्यूते ५०
शकुनिः बहुवित्तंपराजैषीःपांडवानांयुधिष्ठिर आचक्ष्ववित्तंकौंतेययदितस्त्यपराजितं युधिष्ठिरः ममवित्तमसंख्येयंय
दहंवेदसौबल अथत्वंशकुनेवित्तंकस्मात्समनुपृछसि अयुतंप्रयुतंचैवपद्मंखर्वंतथार्बुदं शंखंचैवमहापद्मंनिखर्वंकोटि
रेवच मध्यंचैवपरार्धंचसपरंचात्रपण्यतां एतद्राजन्ममधनंतेनदीव्याम्यहंत्वया वैशं० एतछ्रुत्वाव्यवसितोनिकृतिंसमुपाश्रि ६०
तः जितमित्येवशकुनिर्युधिष्ठिरमभाषत युधि० गवाश्वंबहुधेनूकमसंख्येयमजाविकं यत्किंचिदनुपर्णाशांप्राक्सिंधो
रपिसौबल एतद्राजन्ममधनंतेनदीव्याम्यहंत्वया वैशं एतछ्रुत्वाव्यवसितोनि० जितमित्येव० युधि० पुरंजनपदोभूमिरब्रा

ह्मणधनैःसह अब्राह्मणाश्चपुरुषाराजंशिष्टंधनंमम एतद्राजन्ममधनंतेनदीव्याम्यहंत्वया वैशं० एतछ्रुत्वाव्यवसितोनि० जितमि
त्येवश० युधि० राजपुत्राइमेराजंछोभंतेयैर्विभूषिताः कुंडलानिचनिष्काश्चसर्वंचेदंविभूषणं एतद्राजन्ममधनंतेनदीव्याम्यहंत्वया
वैशं० एतछ्रुत्वाव्यवसितोनि० जितमित्येवश० युधि० श्यामोयुवालोहिताक्षःसिंहस्कंधोमहाबलः नकुलोग्लहएकोमेयच्चै
स्यात्तद्गतंधनं शकुनिः प्रियस्तेनकुलोराजन्राजपुत्रोयुधिष्ठिर अस्माकंधनतांप्राप्तोभूयस्त्वंकेनदीव्यसे वैशं० एवमु
क्त्वाशकुनिस्तानक्षान्प्रतिपद्यत जितमित्येवश० युधि० अयंधर्मान्सहदेवोनुशास्तिलोकेह्यस्मिन्पंडिताख्यांगतश्च अन
र्हताराजपुत्रेणतेनत्वयादीव्याम्यप्रियवान्प्रियेण वैशं० एतछ्रुत्वाव्यवसितोनि० जितमित्येवश० शकु० माद्रीपुत्रौप्रियौ
राजंस्तवेमौविजितौमया गरीयांसौतुतौमन्येभीमसेनधनंजयौ युधि० अधर्मंचरसेनूनंयोनावेक्षसिसौहृदं योनःसुमनसां
मूढविभेदंकर्तुमर्हसि शकु० गर्तेमत्तःप्रपततिःप्रमत्तःस्थाणुमृछति ज्येष्ठोसिश्रेष्ठोसिनमस्तेपुरुषर्षभ स्वप्नेनतानिप
श्यंतिजाग्रतोवायुधिष्ठिर कितवायानिदीव्यंतःप्रलपंत्युत्कटाइव युधि० योनःसंख्येनौरिवपारनेताजेतारिपूणांराजपुत्र
स्तरस्वी अनर्हतालोकवीरेणतेनदीव्याम्यहंशकुनेफाल्गुनेन वैशं० एतछ्रुत्वाव्यवसितोनि० जितमित्येवश० शकु० अ
यंमयासर्वधनुर्धराणांवरोजितःपांडवःसव्यसाची भीमेनराजन्दयितेनदीव्ययत्केतवंपांडवतेवशिष्टं युधि० योनोनेतायु
धिनःसंप्रणेतायथावज्रीदानवशत्रुरेकः तीर्यक्प्रेक्षीसंहतभ्रूर्महात्मासिंहस्कंधोयश्चसदात्यमर्षी बलेनतुल्योयस्यपुमान्न
विद्यतेगदाभृतामग्र्यइहारिमर्दी अनर्हतालोकवीरेणतेनदीव्याम्यहंभीमसेनेनराजन् वैशं० एतछ्रुत्वाव्यवसितोनि० जि
तमित्येवश० शकु० बहुवित्तंपराजैषीर्भ्रातंश्चैवसहद्विपान् आचक्ष्ववित्तंकौंतेययदिवास्त्यपराजितं युधि० अहंविशि

सभा० ष्टः सर्वेषां भ्रातृणां दयितस्तथा कुर्यामहं जितः कर्म स्वयमात्मन्युपप्लवे वैशं० एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः जित
६१ मित्येव शकुनिर्युधिष्ठिरमभाषत शकु० एतत्पापिष्ठमकरोरात्मानं यत्पराजयः शिष्टे सति धने राजन्पाप आत्मपराजयः वैशं०
एवमुक्त्वा महाक्षज्ञाग्लहे सर्वान्व्यवस्थितान् पराजयल्लोकवीरानुक्त्वा राज्ञां पृथक्पृथक् शकु० अस्ति वै ते प्रिया देवी ग्लह एको
पराजितः पण स्व कृष्णां पांचालीं तयात्मानं पुनर्जय युधि० नैव ह्रस्वा न महती नातिकृष्णा न रोहिणी नीलकुंचितकेशी च त
यादृशी व्याम्यहं तया शारदोत्पलपत्राक्ष्या शारदोत्पलगंधया शारदोत्पलसेविन्या रूपेण श्रीसमानया तथैव स्यादानृशंस्या
त्तथा स्याद्रूपसंपदा तथा स्याच्छीलसंपत्त्या यामिच्छेत्पुरुषः स्त्रियं सर्वैर्गुणैर्हि संपन्नामनुकूलां प्रियंवदां यादृशीं धर्मकामा
र्थसिद्धिमिच्छेन्नरः स्त्रियं चरमं संविशति या प्रथमं प्रतिबुध्यते आगोपालाविपालेभ्यः सर्वं वेद कृताकृतं यस्याः पद्मनिभं
वक्त्रं सस्वेदं मल्लिकेव च भाति वेदीमध्या दीर्घकेशी ताम्राक्षी नातिलोमशी तयैवंविधया राजन्पांचाल्याहं सुमध्यया ग्लहं दीव्या
मि चार्वंग्या द्रौपद्या हंत सौबल वैशं० एवमुक्ते तु वचने धर्मराजेन भारत धिग्धिगित्येव सभ्यानां वृद्धानां निःसृता गिरः
चुक्षुभे सा सभा राजन्राज्ञां संजज्ञिरे शुचः भीष्मद्रोणकृपादीनां स्वेदश्च समजायत शिरो गृहीत्वा विदुरो गतसत्व इवाभव
त् आस्ते ध्यायन्नधोवक्त्रो निःश्वसन्पन्नगो यथा धृतराष्ट्रस्तु संहृष्टः पर्यपृच्छत्पुनः पुनः किं जितं किं जितमिति ह्याकारं सं
रक्षत जहास कर्णोतिभृशं सह दुःशासनादिभिः इतरेषां तु सभ्यानां नेत्रेभ्यः प्रापतज्जलं सौबलस्त्वभिधायैवं जित
काशी मदोत्कटः जितमित्येव तानक्षान्पुनरेवान्वपद्यत इति सभापर्वणि द्यूते ६० दुर्योधनः एहि क्षत्त ६१
द्रौपदीमानयस्व प्रियां भार्यां संमतां पांडवानां संमार्जतां वेश्म परैतु शीघ्रं तत्रास्तु दासीभिरपुण्यशीला विदु० दुर्वि

भाषं भाषितं त्वादृशेन न मंदः संबुध्यसि पाशबद्धः प्रपाते त्वं लंबमानो न वेत्सि व्याघ्रान्मृगः कोपयसेतिबाल्यात् आशीविषाः शिरसि
ते पूर्णकोपा महाविषाः मा कोपिष्ठाः सुमंदमते त्वं मा गाः स्त्वं यमक्षयं न हि दासित्वमापन्ना कृष्णा भवति भारत अनीशेन हि राज्ञैषा
पणे न्यस्तेति मे मतिः अयं धत्ते वेणुरिवात्मघाती फलं राजा धृतराष्ट्रस्य पुत्रः द्यूतं हि वैराय महाभयाय मत्तो न बुध्यत्ययमंतका
ले नारुंतुदः स्यान्न नृशंसवादी न हीनतः परमभ्याददीत ययास्य वाचा पर उद्विजेत न तां वदेदुशतीं पापलोक्यां समुच्चरंत्यतिवा
दा हि वक्त्राद्यैराहतः शोचति रात्र्यहानि परस्य नामर्मसु ते पतंति तान्पंडितो नावसृजेत्परेषु अजो हि शस्त्रमगिलत्किलैकः
शस्त्रे विपन्ने पद्भिरपास्य भूमिं निकृंतनं स्वस्य कंठस्य घोरं तद्वद्वैरं मा कृथाः पांडुपुत्रैः न किंचिदन्यत्प्रवदंति पापं वनेचरा वा गृहमेधि
नो वा तपस्विनः संपरिपूर्णविद्या भषंति हैवं श्वनराः सदैव द्वारं सुघोरं नरकस्य जिह्मं न बुध्यसे धृतराष्ट्रस्य पुत्र त्वा
मन्वेतारो बहवः कुरूणां द्यूतोदये सह दुःशासनेन मज्जंत्यलाबूनि शिलाः प्लवंते मुह्यंति नावोंभसि शश्वदेव मूढो राजा धृतरा
स्व ष्ट्रपुत्रो न मे वाचः पथ्यरूपाः शृणोति अंतो नूनं भवितायं कुरूणां सुदारुणः सर्वहरो विनाशः वाचः काव्याः सुहृदां पथ्यरूपा न
श्रूयंते वर्धते लोभ एव इति सभापर्वणि द्यूते ६१ वैशं० धिगस्तु क्षत्तारमिति ब्रुवाणो दर्पेण मत्तो धृतराष्ट्रस्य पुत्रः
अवैक्षत प्रातिकामीं सभायामुवाच चैनं परमार्यमध्ये दुर्यो० प्रातिकामिन्द्रौपदीमानयस्व न ते भयं विद्यते पांडवेभ्यः क्ष
त्ता ह्ययं विवदत्येष भीरुर्न चास्माकं वृद्धिकामः सदैव वैशं० एवमुक्तः प्रातिकामी स सूतः प्रायाच्छीघ्रं राजवचो निशम्य प्रवि
श्य च श्वेव स हि सिंहगोष्ठं समासदन्महिषीं पांडवानां प्रातिकामी उ० युधिष्ठिरो द्यूतमदेन मत्तो दुर्योधनो द्रौपदि त्वामजैषीत्

सभा॰ सा त्वं प्रपद्यस्व धृतराष्ट्रस्य वेश्म नयामि त्वां कर्मणे याज्ञसेनि द्रौपद्युवाच कथं त्वेवं वदसि प्रातिकामिन् को वा दीव्येद्भार्यया राजपुत्रः मूढो राजा
६२ द्यूतमदेन मत्तो ह्यभून्नान्यत्कैतवमस्य किंचित् प्रातिकामी॰ यदा नाभूत्कैतवमन्यदस्य तदादेवीत्पांडवो जातशत्रुः न्यस्ताः पूर्वं भ्रातरस्ते
नराज्ञा स्वयं चात्मा त्वमथो राजपुत्रि द्रौपद्युवाच॰ गच्छ त्वं कितवं गत्वा सभायां पृच्छ सूतज किंनु पूर्वं पराजैषीरात्मानमथवा नु मां एतच्छ्रुत्वा
त्वमागच्छ ततो मां नयस्व सूतज ज्ञात्वा चिकीर्षितमहं राज्ञो यास्यामि दुःखिता वैशं॰ सभां गत्वा स चोवाच द्रौपद्यास्तद्वचस्तदा युधिष्ठिरं नरें
द्राणां मध्ये स्थितमिदं वचः कस्येशो नः पराजिष्टाः कृष्णा त्वामिदमब्रवीत् किंनु पूर्वं पराजैषीरात्मानमथवापि मां युधिष्ठिरस्तु निश्चेष्टो ग
तसत्व इवाभवत् न तं सूतं प्रत्युवाच वचनं साध्वसाधु वा दुर्योध॰ इहैवागत्य पांचाली प्रश्नमेवं प्रभाषतां इहैव सर्वे शृण्वंतु तस्या अस्य
च यद्वचः वैशं॰ स गत्वा राजभवनं दुर्योधनवशानुगः उवाच द्रौपदीं सूतः प्रातिकामी व्यथान्वितः प्रातिका॰ सभ्यास्त्वमी राजपुत्र्या
ह्वयंति मन्ये प्राप्तः संक्षयः कौरवाणां न वै समृद्धिं पालयते लघीयान्यत्त्वं सभामेष्यसि राजपुत्रि द्रौपद्यु॰ एवं नूनं व्यदधात्संविधाता
स्पर्शावुभौ स्पृशतो वृद्धबालौ धर्मं त्वेकं परमं प्राह लोके स नः शमं धास्यति गोप्यमानः सोयं धर्मो मात्यगात्कौरवान्वै सभ्यान्गत्वा पृ
च्छ धर्म्यं वचो मे ते मां ब्रूयुर्निश्चितं तत्करिष्ये धर्मात्मानो नीतिमंतो वरिष्ठाः श्रुत्वा सूतस्तद्वचो याज्ञसेन्याः सभां गत्वा प्राह वाक्यं तदानीं
अधोमुखास्ते न च किंचिदूचुर्निर्बंधं तं धार्तराष्ट्रस्य बुद्ध्वा वैशं॰ युधिष्ठिरस्तु तच्छ्रुत्वा दुर्योधनचिकीर्षितं द्रौपद्याः संमतं दूतं द्रु
प्राहिणोद्भरतर्षभ एकवस्त्रा अधोनीवी रोदमाना रजस्वला सभामागत्य पांचाली श्वशुरस्याग्रतो भव अथ तामागतां दृष्ट्वा राजपु ६२
त्रीं सभां तदा सभ्याः सर्वे विनिंदेरन्मनोभिर्धृतराष्ट्रजं स गत्वा त्वरितं दूतः कृष्णाया भवनं तदा न्यवेदयन्मतं धीमान्धर्मराजस्य नि

श्चितं पांडवाश्च महात्मानो दीना दुःखसमन्विताः सत्येनाभिपरीतांगा नोदीक्षंति स्म किंचन तांस्त्वेतान्मुखमालोक्य राजा दुर्योधनः सूतमुवा
च हृष्टः इहैवैतामानय प्रातिकामिन् प्रत्यक्षमस्याः कुरवो ब्रुवंतु ततः सूतस्तस्य वशानुगामी भीतश्च कोपाद्द्रुपदात्मजायाः विहाय मानं पुनरेव स
भ्यानुवाच कृष्णां किमहं ब्रवीमि दुर्योध॰ दुःशासनैष मम सूतपुत्रो वृकोदरादुद्विजतेल्पचेताः स्वयं प्रगृह्यानय याज्ञसेनीं किं ते करिष्यं
त्यवशाः सपत्नाः ततः समुत्थाय स राजपुत्रः श्रुत्वा भ्रातुः शासनं रक्तदृष्टिः प्रविश्य तद्वेश्म महारथानामित्यब्रवीद्द्रौपदीं राजपुत्रीं एह्ये
हि पांचालि जितासि कृष्णे दुर्योधनं पश्य विमुक्तलज्जा कुरून्भजस्वायतपद्मनेत्रे धर्मेण लब्धासि सभां परेहि ततः समुत्थाय सुदुर्मना
सा विवर्णमामृज्य मुखं करेण आर्ता प्रदुद्राव यतः स्त्रियस्ता वृद्धस्य राज्ञः कुरुपुंगवस्य ततो जवेनाभिससार रोषाद्दुःशासनस्तामभिग
र्जमानः दीर्घेषु नीलेष्वथ चोर्मिमत्सु जग्राह केशेषु नरेंद्रपत्नीं ये राजसूयावभृथे जलेन महाक्रतौ मंत्रपूतेन सिक्ताः ते पांडवानां परि
भूय वीर्यं बलात्प्रमृष्टा धृतराष्ट्रजेन स तां परामृश्य सभासमीपमानीय कृष्णामतिकृष्णकेशीं दुःशासनो नाथवतीमनाथवच्चक
र्ष वायुः कदलीमिवार्तां सा कृष्यमाणा नमितांगयष्टिः शनैरुवाचाद्य रजस्वलास्मि एकं च वासो मम मंदबुद्धे सभां नेतुं नार्हसि मामनार्य
ततोब्रवीत्तां प्रसभं निगृह्य केशेषु रोषात्सकृत्स कृष्णां कृष्णं च जिष्णुं च हरिं नरं च त्राणाय विक्रोशति याज्ञसेनी दुःशासनः रजस्व
ला वा भव याज्ञसेनि एकांबरा वाप्यथवा विवस्त्रा द्यूते जिता चासि कृतासि दासी दासीषु वासश्च यथोपजोषं वैशंपाय॰ प्रकीर्णके
शी पतितार्द्धवस्त्रा दुःशासनेन व्यवधूयमाना ह्रीमत्यमर्षेण च दह्यमाना शनैरिदं वाक्यमुवाच कृष्णा द्रौपद्यु॰ इमे सभायामु
पनीतशास्त्राः क्रियावंतः सर्व एवेंद्रकल्पाः गुरुस्थाना गुरवश्चैव सर्वे तेषामग्रे नोत्सहे स्थातुमेवं नृशंसकर्मंस्त्वमनार्यवृत्त मा मां वि
वस्त्रां कुरु मा विकर्षीः न मर्षयेयुस्तव राजपुत्राः सेंद्रा अपि देवा यदि ते सहायाः धर्मे स्थितो धर्मसुतश्च राजा धर्मश्च सूक्ष्मो निपुणोपल

सभा० स्यः नावापि भर्तुःपरमाणुमात्रमिथ्याभिदोषंनगुणान्विसृज्य दृष्ट्वालनार्यंकुरुवीरमध्ये रजस्वलांपरिकर्षसमां नवापिकश्चित्कुरुतेत्रकु
६३ त्सांधवंतदीयंमतमभ्युपेतः धिगस्तुनष्टःखलुभारतानांधर्मस्तथाक्षत्रविदांचवृत्तं यत्राभ्यतीतांकुरुधर्मवेलांप्रेक्षंतिसर्वेकुरवःसभायां द्रो
णस्यभीष्मस्यचनास्तिसत्वंध्रुवंतथैवास्यमहात्मनोपि राज्ञस्तथाभीममधर्ममुग्रंनलक्षयंतेकुरुवृद्धमुख्याः वैशं० तथाब्रुवंतीक
रुणंसुमध्यमापतीन्कटाक्षैरपितानपश्यत् सापांडवान्कोपपरीतदेहान्संदीपयामासकटाक्षपातैः हृतेनराज्येनतथाधनेनरत्नैश्चमुख्यै
र्नतथाबभूव यथात्रपाकोपसमीरितेनकृष्णाकटाक्षेणबभूवदुःखं दुःशासनश्चापिसमीक्ष्यकृष्णामवेक्ष्यमाणांकृपणान्पतींस्तान्
आधूयवेगेनविसंज्ञकल्पामुवाचदासीतिहसन्निवोग्रः कर्णश्चतद्वाक्यमतीवहृष्टःसंपूजयामासहसन्सशब्दं गांधारराजःसुबलस्यपु
त्रस्तथैवदुःशासनमभ्यनंदत् सभ्यास्तुयेतत्रबभूवुरन्येताभ्यामृतेधार्त्तराष्ट्रेणचैव तेषामभूद्दुःखमतीवकृष्णांदृष्ट्वासभायांपरिकृ
ष्यमाणां भीष्म० नधर्मसौक्ष्म्यात्सुभगेविवेक्तुंशक्नोमितेप्रश्नमिमंविवेक्तुं यथावत् अस्वाम्यशक्तःपणितुंपरस्वंस्त्रियाश्चभर्तु
र्वशतांसमीक्ष्य त्यजेतसर्वांपृथिवींसमृद्धांयुधिष्ठिरःसत्यमथोनजह्यात् उक्तंजितोस्मीतिचपांडवेनतस्मान्नशक्नोमिविवेक्तुमेवं
द्यूतेद्वितीयःशकुनिर्नरेषुकुंतीसुतस्तेनविसृष्टकामः नमन्यतेतांनिकृतिंमहात्मातस्मान्नतेप्रश्नमिमंब्रवीमि द्रौपद्यु० आहूयरा
जाकुशलैःसभायांदुष्टात्मभिर्नैकृतिकैरनार्यैः द्यूतप्रियोनातिकृतप्रयत्नःकस्मादयंनामविसृष्टकामः सशुद्धभावोनिकृति
प्रवृत्तैरबुध्यमानःकुरुपांडवाग्र्यः संभूयसर्वैश्चजितोपितोयस्मात्पश्चादयंकैतवमभ्युपेतः तिष्ठंतिचेमेकुरवःसभायामीशाःसुता
नांचतथास्नुषाणां समीक्ष्यसर्वेममवाक्यमेतद्विब्रूतमेप्रश्नमिमंयथावत् वैशं० तथाब्रुवाणांरुदतींकृष्णामवेक्ष्यमाणाम ६३
सकृत्पतींस्तान् दुःशासनःपरुषाण्यप्रियाणिउवाचवाक्यान्यहितानिचैव तांक्षिप्यमाणांचरजस्वलांचस्रस्तोत्तरीयामतदर्हमाणांवृ

कोदरःप्रेक्ष्ययुधिष्ठिरंचचकारकोपंपरमार्त्तरूपः इतिसभापर्वणिद्यूते ६२ भीम० भवंतिदेशेबंधक्यःकितवानांयुधिष्ठिर नता
भिस्तादीव्यंतिदयावैवास्तितास्वपि काश्यायद्धनमाहार्षीद्द्रव्यंयच्चान्यदुत्तमं तथान्येपृथिवीपालायानिरत्नान्युपाहरन् वाहनानिधनं
चैवकवचान्यायुधानिच राज्यमात्मावयंचैवकैतवेनहृतंपरैः नचमेतत्रकोपोभूत्सर्वस्येशोहिनोभवान् इदंत्वतिकृतंमन्येद्रौपदीयत्रप
ण्यते एषाह्यनर्हतीबालापांडवान्प्राप्यकौरवैः त्वत्कृतेक्लिश्यतेक्षुद्रैर्नृशंसैर्निकृतिप्रियैः अस्याःकृतेमन्युरयंत्वयिराजन्निपात्यते
बाहूतेसंप्रधक्ष्यामिसहदेवाग्निमानय अर्जुन० नपुराभीमसेनत्वमीदृशीर्वदितागिरः परैस्तेनाशितंनूनंनृशंसैर्धर्मगौरवं
नसकामाःपरेकार्याधर्ममेवाचरोत्तमं भ्रातरंधार्मिकंज्येष्ठंनातिक्रमितुमर्हसि आहूतोहिपरैराजाक्षात्रधर्ममनुस्मरन् दीव्यते
परकामेनतन्नःकीर्त्तिकरंमहत् भीमः एवमस्मिन्कृतंविद्यांयदिनाहंधनंजय दीप्तेग्नौसहितौबाहूनिर्दहेयंबलादिव वैशं०
तथातान्दुःखितान्दृष्ट्वापांडवान्धृतराष्ट्रजः क्लिश्यमानांचपांचालींविकर्णइदमब्रवीत् याज्ञसेन्यायदुक्तंतद्वाक्यंविब्रूतपार्थिवाः अ
विवेकेनवाक्यस्यनरकःसद्यएवनः भीष्मश्चधृतराष्ट्रश्चकुरुवृद्धतमावुभौ समेत्यनाहतुःकिंचिद्विदुरश्चमहामतिः भारद्वाजोपि
हिसर्वेषामाचार्यःकृपएवच कृत्यमेतावपिप्रश्नंनाहतुर्द्विजसत्तमौ येचान्येपृथिवीपालाःसमेताःसर्वतोदिशः कामक्रोधौसमुत्सृ
ज्यतेब्रुवंतुयथामति यदिदंद्रौपदीवाक्यमुक्तवत्यसकृच्छुभा विमृश्यकस्यकःपक्षःपार्थिवावदतोत्तरं एवंसबहुशःसर्वानुक्तवां
स्तान्सभासदः नचतेपृथिवीपालास्तमूचुःसाध्वसाधुवा उक्त्वातथासकृत्सर्वान्विकर्णःपृथिवीपतीन् पाणिंपाणौविनिष्पिष्य
निश्वसन्निदमब्रवीत् विब्रूतपृथिवीपालावाक्यंमावाकथंचन मन्येन्याय्यंयदत्राहंतद्धिवक्ष्यामिकौरवाः चत्वार्याहुर्नरश्रेष्ठा
व्यसनानिमहीक्षितां मृगयांपानमक्षांश्चग्राम्येचैवातिसक्ततां एतेषुहिनरःसक्तोधर्ममुत्सृज्यवर्त्तते तथायुक्तेनचकृतां
क्रियांलोकोनमन्यते तदयंपाडुपुत्रेणव्यसनेपरिवर्त्तता समाहूतेनकितवैरास्थितोद्रौपदीपणः साधारणीचसर्वेषांपांडवा

सभा नामनिंदिता जितेनपूर्वंचानेनपांडवेनकृतःपणः इयंचकीर्तिताकृष्णासौबलेनपणार्थिना एतत्सर्वंविचार्याहंमन्येनविजितामिमां
६४ एतछ्रुत्वामहान्नादःसभ्यानामुदतिष्ठत विकर्णंशंसमानानांसौबलंचापिनिंदतां तस्मिन्नुपरतेशब्देराधेयःक्रोधमूर्छितः प्रगृ
ह्यविपुलंबाहुमिदंवचनमब्रवीत कर्णः दृश्यंतेवैविकर्णहिवैकृतानिबहून्यपि तज्जातस्तद्विनाशाययथाग्निररणीप्रजः ए
तेनकिंचिदप्याहुश्चोद्यमानाहिकृष्णया धर्मेणविजितांमन्येमन्यसेत्वंद्रुपदात्मजां त्वंतुकेवलबाल्येनधार्तराष्ट्रविदीर्यसे यद्ब्र
वीषिसभामध्येबालःस्थविरभाषितं नचधर्मंयथातत्वंवेत्सिदुर्योधनानुज यद्ब्रवीषिजितांकृष्णांमजितेतिसुमंदधीः कथंत्व
वजितांकृष्णांमन्यसेधार्तराष्ट्रज यदासभायांसर्वस्वंन्यस्तवान्पांडवाग्रजः अभ्यंतराचसर्वस्वेद्रौपदीभरतर्षभ एवंधर्मजितां
कृष्णांमन्यसेनजितांकथं कीर्तिताद्रौपदीवाचाअनुज्ञाताचपांडवैः भवत्यविजिताकेनहेतुनैषामतातव मन्यसेयत्सभामेतामा
नीतामेकवाससां अधर्मेणहितत्रापिश्रृणुमेवाक्यमुत्तरं एकोभर्तास्त्रियादेवैर्विहितःकुरुनंदन इयंत्वनेकपतिकाबंधकीतिवि
निश्चिता अस्याःसभायामानयनंनचित्रमितिमेमतिः एकांबरधरत्वंवाप्यथवापिविवस्त्रता यच्चैषांद्रविणंकिंचिद्याचैषायेचपां
डवाः सौबलेनेहतत्सर्वंधर्मेणविजितंवसु दुःशासनसुबालोयंविकर्णःप्रज्ञवादिकः पांडवानांचवासांसिद्रौपद्याश्चाप्युपा
हर श्रुत्वैवंपांडवाःसर्वेस्वानिवासांसिभारत अवकीर्योत्तरीयानिसभायांसमुपाविशन् ततोदुःशासनोराजन्द्रौपद्यावसनंब
लात सभामध्येसमाक्षिप्यव्यपक्रष्टुंप्रचक्रमे कृष्णंचजिष्णुंहरिंनरंचत्राणायविक्रोशतियाज्ञसेनी ततस्तुधर्मोन्तरितोम
हात्मासमावृणोत्तांविविधैर्वस्त्रपूगैः आकृष्यमाणेवसनेद्रौपद्याश्चविशांपते तद्रूपमपरंवस्त्रंप्रादुरासीदनेकशः नाना
रागविरागाणिवसनान्यथवैप्रभो प्रादुर्भवंतिशतशोधर्मस्यपरिपालनात ततोहलहलाशब्दस्तत्रासीद्घोरनिस्वनः तदद्भु ६४
ततमंलोकेवीक्ष्यसर्वमहीक्षितः शशंसुर्द्रौपदींतत्रकुत्संतोधृतराष्ट्रजं शशापभीमसेनस्तुसभामध्येमहास्वनः क्रोधात्प्र

स्फुरमाणौष्टोविनिष्पिष्यकरेकरं इदंमेवाक्यमादध्वंक्षत्रियालोकवासिनः नोक्तपूर्वंनरैरन्यैर्नचान्योयद्वदिष्यति यद्येतदेवमुक्त्वा
तुनकुर्यांपृथिवीश्वराः पितामहानांसर्वेषांनाहंगतिमवाप्नुयां अस्यपापस्यदुर्जातेर्भरतापसदस्यच नपिबेयंबलाद्वक्षोभित्वाचेद्रु
धिरंयुधि वैशं० तस्यतेतद्वचःश्रुत्वासर्वलोकप्रहर्षणं प्रचक्रुर्विपुलांपूजांकुत्संतोधृतराष्ट्रजं यदातुवाससांराशिःसभामध्ये
समाचितः ततोदुःशासनःश्रांतोव्रीडितःसमुपाविशत धिक्शब्दस्तुततस्तत्रसमभूल्लोमहर्षणः सभ्यानांनरदेवानांदृष्ट्वापांडु
सुतांस्तदा नविब्रुवंतिकौरव्याःप्रश्नमेतमितिस्मह सज्जनःक्रोशतिस्मात्रधृतराष्ट्रंविगर्हयन् ततोबाहूसमुत्क्षिप्यनिवार्यचस
भासदः विदुरःसर्वधर्मज्ञइदंवचनमब्रवीत विदुरः द्रौपदीप्रश्नमुक्त्वैवंरोरवीतिह्यनाथवत् नचविब्रूततंप्रश्नंसभ्याधर्मोत्रपी
ड्यते सभांप्रपद्यतेह्यार्तःप्रज्वलन्निवहव्यवाट् तंवैसत्येनधर्मेणसभ्याःप्रशमयंत्युत धर्मप्रश्नमथोब्रूयादार्तःसभ्येषुमा
नवः विब्रुयुस्तस्यतेप्रश्नंविब्रुवंतुयथामति योहिप्रश्नंनविब्रूयाद्धर्मदर्शीसभांगतः अनृतेयाफलावाप्तिस्तस्याःसोर्धंसम
श्नुते यःपुनर्वितथंब्रूयाद्धर्मदर्शीसभांगतः अनृतस्यफलंकृत्स्नंयत्प्राप्नोतीतिनिश्चयः अत्राप्युदाहरंतीमसेतिहासंपुरा
तनं प्रह्लादस्यचसंवादंमुनेरांगिरसस्यच प्रह्लादोनामदैत्येंद्रस्तस्यपुत्रोविरोचनः कन्याहेतोरांगिरसंसुधन्वानमुपाद्रवत्
अहंज्यायानहंज्यायानितिकन्येच्छयातदा तयोर्देवनमत्रासीत्प्राणयोरितिनःश्रुतं तयोःप्रश्नविवादोभूत्प्रह्लादंता
वपृच्छतां ज्यायान्कआवयोरेकःप्रश्नंप्रब्रूहिमामृषा सवैविवदनाद्भीतःसुधन्वानंव्यलोकयत् तंसुधन्वाब्रवीत्क्रुद्धोब्रह्मदं
डइवज्वलन् यदिवैवक्ष्यसिमृषाप्रह्लादाथनवक्ष्यसि शतधातेशिरोवज्रीवज्रेणप्रहरिष्यति सुधन्वनातथोक्तःसन्व्यथि
तोश्वत्थपर्णवत् जगामकश्यपंदैत्योधृतराष्ट्रमहौजसं प्रह्लादः त्वंवैधर्मस्यविज्ञातादैवस्येहासुरस्य ब्राह्मणस्यचमहाप्रा

सभा

६५ ज्ञधर्मज्ञ प्रश्नमिमं शृणु यो वै प्रश्नं न विब्रूयाद्वितथं वैव निर्दिशेत् के वै तस्य परे लोकास्तन्ममाचक्ष्व पृच्छतः कश्यपः जानन्न विब्रुवन्प्रश्नान्कामा
त्क्रोधात्तथा भयात् सहस्रं वारुणान्पाशानात्मनि प्रतिमुञ्चति साक्षी वा विब्रुवन्वाक्यं गोकर्णशिथिलश्चरन् सहस्रं वारुणान्पाशाना
त्मनि प्रतिमुञ्चति तस्य वर्षशते पूर्णे पाश एकः प्रमुच्यते तस्मात्सत्यं तु वक्तव्यं जानता सत्यमञ्जसा विद्धो धर्मो ह्यधर्मेण सभां यत्र प्रप
द्यते न चास्य शल्यं कृन्तन्ति विद्धास्तत्र सभासदः अर्धं हरति वै श्रेष्ठः पादो भवति कर्तृषु पादश्चैव सभासत्सु ये न निन्दन्ति निन्दितं अ
नेना भवति श्रेष्ठो मुच्यन्ते च सभासदः एनो गच्छति कर्तारं निन्दार्हो यत्र निन्द्यते वितथं तु वदेयुर्ये धर्मं प्रह्लाद पृच्छतः इष्टापूर्तं च ते घ्न
न्ति सप्त चैव परावरान् हृतस्वस्य हि यद्दुःखं हतपुत्रस्य चैव यत् ऋणिनं प्रति यच्चैव भार्याक्रुष्टस्य चैव यत् स्त्रियः पतिविहीनाया रा
ज्ञा ग्रस्तस्य चैव यत् अपुत्रायाश्च यद्दुःखं व्याघ्राघ्रातस्य चैव यत् अध्यूढायाश्च यद्दुःखं साक्षिभिर्विहतस्य च एतानि वै समान्या
हुर्दुःखानि त्रिदशेश्वराः तानि सर्वाण्यवाप्नोति सभायां वितथं ब्रुवन् समक्षदर्शनात्साक्षी श्रवणाद्धारणात् तस्मात्स
त्यं ब्रुवन्साक्षी धर्मार्थाभ्यां न हीयते विदुरः कश्यपस्य वचः श्रुत्वा प्रह्लादः पुत्रमब्रवीत् श्रेयान्सुधन्वा त्वत्तो वै मत्तः श्रेयांस्त
थाङ्गिराः माता सुधन्वनश्चापि श्रेयसी मातृतस्तव विरोचन सुधन्वायं प्राणानामीश्वरस्तव सुधन्वोवाच पुत्रस्नेहं परि
त्यज्य यस्त्वं धर्मे प्रतिष्ठितः अनुजानामि ते पुत्रं जीवत्वेष शतं समाः विदुरः एतद्वै परमं धर्मं श्रुत्वा सर्वे सभासदः यथाप्रश्नं
सकृष्णायामन्यध्वं तत्र किं परं वैशं० विदुरस्य वचः श्रुत्वा नोचुः किंचन पार्थिवाः कर्णो दुःशासनं प्राह कृष्णां दासीं गृहान्नय तां
वेपमानां सव्रीडां विलपन्तीं स्म पाण्डवान् दुःशासनः सभामध्ये विचकर्ष तपस्विनीं इति सभापर्वणि द्यूते ६७ द्रौप० ६५
तावत्प्रतीक्ष दुःप्रज्ञ दुःशासन नराधम पुरस्तात्करणीयं मे न कृतं कार्यमुत्तमं विह्वलास्मि कृतानेन कर्षता बलिना बलात्

अभिवादं करोम्येषां गुरूणां कुरुसंसदि न मे स्यादपराधोऽयं यदिदं न कृतं मया वैशं० सा तेन च समाधूता दुःखेन च तपस्विनी प
तिता विललापेदं सभायामतथोचिता द्रौप० स्वयंवरे यास्मि दृष्टा नृपै रंगे सभागतैः न दृष्टपूर्वा चान्यत्र साहमद्य सभां गता यां
न वायुर्न चादित्यो दृष्टवन्तौ पुरा गृहे साहमद्य सभामध्ये दृश्यास्मि कुरुसंसदि न मां मृष्यन्ति वातेन स्पृश्यमानां पुरा गृहे स्पृश्यमा
नां सहन्तेऽद्य पाण्डवा हतात्मना मृष्यन्ति कुरवश्चेमे मन्ये कालस्य पर्ययं स्नुषां दुहितरं चैव क्लिश्यमानामनर्हतीं किं न्वतः कृपण
तरं यदहं स्त्री सती शुभा सभामध्यं विगाहेऽद्य क्व नु धर्मो महीक्षितां धर्म्यां स्त्रियं सभां पूर्वं न नयन्तीति नः श्रुतं स नष्टः कौरवे
येषु पूर्वो धर्मः सनातनः कथं हि भार्या पाण्डूनां पार्षतस्य स्वसा सती वासुदेवस्य च सखी पार्थिवानां सभामियां तामिमां धर्मराजस्य
भार्यां सदृशवर्णजां ब्रूत दासीमदासीं वा तत्करिष्यामि कौरवाः अयं मां सुदृढं क्षुद्रः कौरवाणामयशोहरः क्लिश्नाति नाहं तत्सोढुं
चिरं शक्ष्यामि कौरवाः जितां वाप्यजितां वापि मन्यध्वं वा यथा नृपाः तथा प्रत्युक्तमिच्छामि तत्करिष्यामि सत्तमाः भीष्मः उक्त
वानस्मि कल्याणि धर्मस्य तु परां गतिं लोके न शक्यते वक्तुमपि विज्ञैर्महात्मभिः बलवांस्तु यथा धर्मं लोके पश्यति पूरुषः स धर्मो
धर्मवेलायां भवत्यभिहितः परैः न विवेक्तुं च ते प्रश्नमेतं शक्नोमि निश्चयात् सूक्ष्मत्वाद्गहनत्वाच्च कार्यस्यास्य च गौरवात् नू
नमन्तः कुलस्यास्य भविता न चिरादिव तथा हि कुरवः सर्वे लोभमोहपरायणाः कुलेषु जाताः कल्याणि व्यसनाभ्याहता भृशं ध
र्मान्मार्गान्न च्यवन्ते येषां नस्त्वं वधूः स्थिता उपपन्नं च पाञ्चालि तवेदं वृत्तमुत्तमं यत्कृच्छ्रमपि संप्राप्ता धर्ममेवान्ववेक्षसे एते द्रो
णादयश्चैव वृद्धा धर्मविदो जनाः शून्यैः शरीरैस्तिष्ठन्ति गतासव इवानताः युधिष्ठिरस्तु प्रश्नेऽस्मिन्प्रमाणमिति मे मतिः अजि
तां वा जितां वापि स्वयं व्याहर्तुमर्हति इति सभापर्वणि द्यूते ६८ वैशं० तथा तु दृष्ट्वा बहु तत्तदेवं रोरूयमाणां कुररीमि

सभा॰ वार्त्तां नोऽनुर्वेकः साध्वथवाप्यसाधु महीक्षितो धार्त्तराष्ट्रस्य भीताः दृष्ट्वा तु तान्पार्थिवपुत्रपौत्रांस्तूष्णींभूतान्धृतराष्ट्रस्य पुत्रः स्मयन्नि
वेदं वचनं बभाषे पांचालराजस्य सुतां तदानीं दुर्यो॰ तिष्ठत्वयं प्रश्न उदारसत्वे भीमार्जुने सहदेवे तथैव पत्यौ वते नकुले याज्ञसेनि
६६ वदंतु ते वचनं त्वत्प्रसूतं अनीश्वरं विब्रुवंत्वार्यमध्ये युधिष्ठिरं तव पांचालि हेतोः कुर्वंतु सर्वे नानृतं धर्मराजं पांचालि त्वं मोक्ष्यसे दा
सभावात् धर्मस्थितो धर्मराजो महात्मा स्वयं चेदं कथयत्विंद्रकल्पः ईशो ह्ययं यद्यनीशोथ वैष वाक्यादस्य क्षिप्रमेकं भजस्व स
र्वे हि मे कौरवेयाः सभायां दुःखांतरे वर्त्तमानास्त्वदीये न विब्रुवंत्यार्यसत्वा यथावत्पतींश्च ते समवेक्ष्याल्पभाग्यान् वैशं॰ ततः सभ्याः
कुरुराजस्य तत्र वाक्यं सर्वे प्रशशंसुस्तदैव चेलावेधांश्चापि चक्रुर्नदंतो हाहेत्यासीदप्यत्र चैव नादः सर्वे चासन्पार्थिवाः प्रीतिमंतः कुरु
श्रेष्ठं धार्मिकं पूजयंतः युधिष्ठिरं ते सर्वे समुदैक्षंत पार्थिवाः किं नु वक्ष्यति धर्मज्ञ इति साचीकृताननाः किं नु वक्ष्यति बीभत्सुर
जितो पांडुनंदनः भीमसेनो यमौ चेति भृशं कौतूहलान्विताः तस्मिन्नुपरते शब्दे भीमसेनोऽब्रवीदिदं प्रगृह्य विपुलं वृत्तं भुजं
चंदनरूषितं भीमसेनः यद्येष गुरुरस्माकं धर्मराजो युधिष्ठिरः न प्रभुः स्यात्कुलस्यास्य न वयं मर्षयेमहि ईशो नः पुण्यत
पसां प्राणानामपि चेश्वरः मन्यते जितमात्मानं यद्येष विजिता वयं नहि मुच्येत जीवन्मे पदा भूमिमुपस्पृशन् मर्त्यधर्मा परा
मृश्य मूर्द्धजानिमान् दीर्घ पश्य विपुलौ वृत्तौ भुजौ मे परिघाविव नैतयोरंतरं प्राप्य मुच्येतापि शतक्रतुः धर्मपाशाहतस्त्वेष नाधि
गच्छामि संकटं गौरवेण निरुद्धश्च निग्रहादर्जुनस्य च धर्मराजनिसृष्टस्तु सिंहः क्षुद्रमृगानिव धार्त्तराष्ट्रानिमान्पापान्निष्पि ६६
ष्येयं तलासिभिः वैशं॰ तमुवाच तदा भीष्मो द्रोणो विदुर एव च क्षम्यतामिदमित्येवं सर्वं संभाव्यते त्वयि इति सभाप
र्वणि द्यूते ६५ कर्ण उवाच त्रयः किलेमे अधना भवंति दासः पुत्रश्चास्वतंत्रा च नारी दासस्य पत्नी त्वधनस्य भद्रे हीनेश्व

पु॰

रा दासधनं च सर्वं प्रविश्य मानं परिवारं भजस्व तत्ते कार्यं शिष्टमावेश्य वेश्म ईशास्तु सर्वे तव राजपुत्रि भवंति ते धार्त्तराष्ट्रा न पार्थाः अन्यं
वृणीष्व पतिमाशु भामिनि यस्माद्दास्यं न लभसे देवनेन अवाच्या वै पतिषु कामवृत्तिर्नित्यं दास्ये विदितं तत्तवास्तु पराजितो नकुलो
भीमसेनो युधिष्ठिरः सहदेवोऽर्जुनश्च दासीभूता त्वं प्रविशाय याज्ञसेनि पराजितास्ते पतयो न वसंति प्रयोजनं जन्मनि किं न मन्यते
पराक्रमं पौरुषं चेह पार्थः पांचाल्यस्य द्रुपदस्यात्मजामिमां सभामध्ये यो व्यदेवीद्ग्लहेषु वैशं॰ तच्छ्रुत्वा भीमसेनोऽत्यमर्ष
णः भृशं निशश्वास तदार्त्तरूपः राजानुगो धर्मपाशानुबद्धो दहन्निवैनं क्रोधसंरक्तनेत्रः भीमः नाहं कुप्ये सूतपुत्रस्य राजन्नेष
सत्यं दासधर्मः प्रदिष्टः किं वा द्विषो मामिदं व्याहरेयुर्नादेवीस्त्वं यद्यनया नरेंद्र वैशं॰ भीमसेनवचः श्रुत्वा राजा दुर्योधनस्तदा
युधिष्ठिरमुवाचेदं तूष्णींभूतमचेतसं भीमार्जुनौ यमौ चैव स्थितौ ते नृपशासने प्रश्नं प्रब्रूहि कृष्णां त्वमजितां यदि मन्यसे एव
मुक्त्वा स कौंतेयमपोह्य वसनं स्वकं स्मयन्निवेक्ष्य पांचालीमैश्वर्यमदमोहितः कदलीस्तंभसंकाशं सर्वलक्षणलक्षितं गजह
स्तप्रतीकाशं वज्रप्रतिमगौरवं अभ्युत्स्मयित्वा राधेयं भीममाधर्षयन्निव द्रौपद्याः प्रेक्षमाणायाः सव्यमूरुमदर्शयत् वृको
दरस्तदालोक्य नेत्रे उत्फुल्य लोहिते प्रोवाच राजमध्ये तं सभ्यान्विश्रावयन्निव पितृभिः सह सालोक्यं मा स्म गच्छेद्वृकोदरः यद्ये
नं मूरुं गदया न भिंद्यां ते महाहवे क्रुद्धस्य तस्य स्रोतोभ्यः सर्वेभ्यः पावकार्चिषः वृक्षस्येव विनिश्चेरुः कोटरेभ्यः प्रदह्यतः विदु
रः पश्यत भीमसेनात्तद्बुध्यध्वं धृतराष्ट्रस्य पुत्राः दैवेरिता नूनमयं पुरस्तात्परो नयो भरतेषूदपादि अतिद्यूतं कृतमिदं
धार्त्तराष्ट्रा यस्मात्स्त्रियं विवदध्वं सभायां योगक्षेमो नश्यतो वः समग्रौ पापान्मंत्रान्कुरवो मंत्रयंति इमं धर्मं कुरवो जानताशु
ध्वस्ते धर्मे परिषत्संप्रदुष्येत् इमां चेत्पूर्वं कितवोऽग्लहीष्यदीशोऽभविष्यदपराजितात्मा स्वप्ने यथैतद्धि धनं जितं स्यादेवं मन्ये

यस्यदीव्यस्यनीशाः गांधारपुत्रस्यवचोनिशम्यधर्मादस्मात्कुरवोमापयात दुर्यो० भीमस्यवाक्येतद्वदर्जुनस्यैवस्थितोस्म्यहं
यमयोश्चैववाक्ये युधिष्ठिरंचेत्प्रवदंत्यनीशमस्माद्दास्यान्मोक्ष्यसेयाज्ञसेनि अर्जु० ईशोराजापूर्वमासीद्देवनःकुंतीपुत्रोधर्म
राजोमहात्मा ईशस्त्वयंकस्यपराजितात्मातज्जानीध्वंकुरवःसर्वएव वैशं० ततोराज्ञोधृतराष्ट्रस्यगेहे गोमायुरुच्चैर्व्याहरद
ग्निहोत्रे तंरासभाःप्रत्यभाषंतराजन्समंततःपक्षिणश्चैवरौद्राः तंवैशब्दंविदुरस्तत्ववेदीशुश्राववघोरंसुबलात्मजाच भीष्म
द्रोणौगौतमश्चापिसर्वेस्वस्तिस्वस्तीत्यपिचैवावदंसुः ततोगांधारीविदुरश्चैवविद्वांस्तमुत्पातंघोरमालक्ष्यराज्ञे निवेदयामा
सतुरार्तवत्तदाततोराजावाक्यमिदंबभाषे हतोसिदुर्योधनमंदबुद्धेयत्त्वंसभायांकुरुपुंगवानां स्त्रियंसमाभाषसिदुर्विनीत
विशेषतोद्रौपदींधर्मपत्नीं एवमुक्त्वाधृतराष्ट्रोमनीषीहितान्वेषीबांधवानामपायात् कृष्णांपांचालीमब्रवीत्सांत्वपूर्वं वि
मृश्यैतत्प्रज्ञयातत्वबुद्धिः धृतरा० वरंवृणीष्वकल्याणिमत्तोयदभिकांक्षसे वधूनांहिविशिष्टामेत्वंधर्मपरमासती
मा द्रौप० ददासिचेद्वरंमह्यंवृणोमिभरतर्षभ सर्वधर्मानुगःश्रीमानदासोस्तुयुधिष्ठिरः मनस्विनमजानंतोमावैब्रूयुःकु
मारकाः एहिवैदासपुत्रेतिप्रतिविंध्यमुपागतं राजपुत्रःपुराभूत्वायथानान्यःपुमान्क्वचित् लालितोदासपुत्रत्वंनाधि
गच्छेद्धिभारत धृतराष्ट्रः एवंभवतुकल्याणियथात्वमभिभाषसे द्वितीयंतेवरंभद्रेददामिवरयस्वमां मनोहिमेभिवि
रतिनैकंत्वंवरमर्हसि द्रौप० सरथौसधनुष्कौचभीमसेनधनंजयौ यमौचवरयेराजन्नदासान्स्ववशानहं धृतरा० ६८
तथास्तुतेमहाभागेयथात्वंनंदिनीच्छसि तृतीयंवरयास्मत्तोनासिद्वाभ्यांसुसत्कृता त्वंहिसर्वस्नुषाणांमेश्रेयसी
धर्मचारिणी द्रौप० लोभोधर्मस्यनाशायभगवन्नाहमुत्सहे अनर्हावरमादातुंतृतीयंराजसत्तम एकमाहुर्वैश्य

वरंद्वौवरौक्षत्रियस्यतु त्रयस्तुराज्ञोराजेंद्रब्राह्मणस्यशतंवराः पापीयांसइमेभूत्वासंतीर्णाःपतयोमम वेत्स्यंतिचैवभद्राणिराजन्पुण्येनक
र्मणा इतिसभापर्वणिद्यूते ६८ कर्णउ० यानःश्रुतामनुष्येषुस्त्रियोरूपेणसंमताः तासामेतादृशंकर्मनकासांचित्सदृश्यते
क्रोधाविष्टेषुपार्थेषुधार्तराष्ट्रेषुवाप्यति द्रौपदीपांडुपुत्राणांकृष्णाशांतिरिहाभवत् अप्लवेंभसिमग्नानामप्रतिष्ठेनिमज्जतां पांचालीपां
डुपुत्राणांनौरेषापारगाभवत् वैशं० तद्वैश्रुत्वाभीमसेनःकुरुमध्येस्यमर्षणः स्त्रीगतिःपांडुपुत्राणामित्युवाचसुदुर्मनाः भीमः
त्रीणिज्योतींषिपुरुषेइतिवैदेवलोब्रवीत् अपत्यंकर्मविद्याचयतःसृष्टाःप्रजास्ततः अमेध्येवैगतप्राणेशून्येज्ञातिभिरुज्झिते देहे
त्रितयमेवैतत्पुरुषस्योपयुज्यते तन्नोज्योतिरभिहतंदाराणामभिमर्षणात् धनंजयकथंस्वित्स्यादपत्यमभिमृष्टजं अर्जुनः नैव
चोक्तानवाप्युक्ताहीनतःपरुषागिरः भारतप्रतिजल्पंतिसदात्तूत्तमपूरुषाः स्मरंतिसुकृतान्येवनवैराणिकृतानितु संतःप्रतिविजा
नंतोलब्धसंभावनाःस्वयं भीमः इहैवतांस्तुवान्सर्वान्हन्मिशत्रून्समागतान् अथनिष्क्रम्यराजेंद्रसमूलान्कृंधिभारत किंनोविव
दितेनेहकिंनःक्लेशेनभारत अद्यैवैतान्निहन्मीहप्रशाधिवसुधामिमां इत्युक्त्वाभीमसेनस्तुकनिष्ठैर्भ्रातृभिर्वृतः मृगमध्येयथा
सिंहोमुहुःपरिघमैक्षत सांत्व्यमानोवीक्ष्यमाणःपार्थेनाक्लिष्टकर्मणा स्विद्यतेसमहाबाहुरंतर्दाहेनवीर्यवान् क्रुद्धस्यतस्यस्रोतो
भ्यःकर्णादिभ्योनराधिप सधूमःसस्फुलिंगार्चिःपावकःसमजायत भ्रुकुटीतदुःप्रेक्ष्यमभवत्तस्यतन्मुखं युगांतकालेसंप्राप्ते
तांतस्येवरूपिणः युधिष्ठिरस्तमावार्यबाहुभ्यांबाहुशालिनं मैवमित्यब्रवीच्चैनंजोषमास्स्वेतिभारत निवार्यतंमहाबाहुंकोपसंर
क्तलोचनं पितरंसमुपातिष्ठद्धृतराष्ट्रंकृतांजलिः इतिसभापर्वणिद्यूते ६९ युधिष्ठिरः राजन्किंकरवामस्तेप्र
शाध्यस्मांस्त्वमीश्वरः नित्यंहिस्थातुमिच्छामस्तवभारतशासने धृतराष्ट्रः अजातशत्रोभद्रंतेअरिष्टाःस्वस्तिगच्छत अनुज्ञा

ताःसहधर्मेणराज्यंपालयतानघाः इदंचैवावबोद्धव्यंवृद्धस्यममशासनं मयाभिगदितंकृत्स्नंपथ्यंनिःश्रेयसंपरं वेत्थत्वंतातधर्माणांग
तिंसूक्ष्मांयुधिष्ठिर विनीतोसिमहाप्राज्ञवृद्धानांपर्युपासिता यतोबुद्धिस्ततःशांतिःप्रशमंगच्छभारत नादारुणिपतेच्छस्त्रंदारुणेपत
न्निपात्यते नवैराण्यभिजानंतिगुणान्पश्यंतिनागुणान् विरोधंनाधिगच्छंतिसंतउत्तमपूरुषाः संवादपरुषाण्याहुर्युधिष्ठिरनरा
धमाः प्रत्याहुर्मध्यमास्त्वेतानुक्ताःपरुषमुत्तरं नैवोक्तानैववानुक्ताअहिताःपरुषागिरं प्रतिजल्पंतिवैधीराःसदात्तूत्तमपूरुषाः
स्मरंतिसुकृतान्येवनवैराणिकृतान्यपि संतःप्रतिविजानंतोलब्ध्वाःप्रत्ययमात्मनः तथाचरितमार्गेणत्वयास्मिन्सत्समागमे
दुर्योधनस्यपारुष्यंतत्तातहृदिमाकृथाः मातरंचैवगांधारींमांचत्वद्गुणकांक्षिणं पश्येदंस्थितंवृद्धमंधंपितरंपश्यभारत प्रेक्षापू
र्वंमयाद्यूतमिदमासीदुपेक्षितं मित्राणिद्रष्टुकामेनपुत्राणांचबलाबलं अशोच्याःकुरवोराजन्येषांत्वमनुशासिता मंत्रीच
विदुरोधीमान्सर्वशास्त्रविशारदः त्वयिधर्मोर्जुनेवीर्यंभीमसेनेपराक्रमः श्रद्धाचगुरुशुश्रूषायमयोःपुरुषाग्र्ययोः अजातश
त्रोभद्रंतेखांडवप्रस्थमाविश भ्रातृभिस्तेस्तुसौभ्रात्रंधर्मेतेधीयतांमनः वैशं० इत्युक्तोभरतश्रेष्ठोधर्मराजोयुधिष्ठिरः कृ
त्वार्यसमयंसर्वंप्रतस्थेभ्रातृभिःसह तेरथान्मेघसंकाशानास्थायसहकृष्णया प्रययुर्हृष्टमनसइंद्रप्रस्थंपुरोत्तमं इतिसभा
पर्वणिद्यूतंसमाप्तं ६८ जनमेजयः अनुज्ञातांस्तदादृष्ट्वासरत्नधनसंचयान् पांडवान्धार्तराष्ट्राणांकथमासीन्मनस्त
दा वैशं० अनुज्ञातांस्तान्विदित्वाधृतराष्ट्रेणधीमता राजन्दुःशासनःक्षिप्रंजगामभ्रातरंप्रति दुर्योधनंसमासाद्यसा
मात्यंभरतर्षभ दुःखार्तोभरतश्रेष्ठइदंवचनमब्रवीत् दुःशासनः दुःखेनैतत्समानीतंस्थविरोनाशयत्यसौ शत्रुसाद्गम ६८
यद्द्रव्यंतद्बुध्यध्वंमहारथाः अथदुर्योधनःकर्णःशकुनिश्चापिसौबलः मिथःसंगम्यसहिताःपांडवान्प्रतिभारत वैचित्रवीर्यं

राजानंधृतराष्ट्रंमनीषिणं अभिगम्यत्वरायुक्ताःश्लक्ष्णंवचनमब्रुवन् नत्वयेदंश्रुतंराजन्यज्जगादबृहस्पतिः शक्रस्यनीतिंप्र
वदन्विद्वान्देवपुरोहितः सर्वोपायैर्निहंतव्याःशत्रवःशत्रुकर्शन पुरायुद्धाद्बलाद्वापिप्रकुर्वंतिमहाहितं तेवयंपांडवधनैःसर्वान्सं
पूज्यपार्थिवान् यदितान्योधयिष्यामःकिंहिनःपरिहास्यति अहीनाशीविषान्क्रुद्धान्दंशायसमुपस्थितान् कृत्वास्कंधेचपृ
ष्ठेचकःसमुत्स्रष्टुमर्हति आत्तशस्त्रारथगताःकुपितास्तातपांडवाः निःशेषान्नःकरिष्यंतिक्रुद्धाह्याशीविषोपमाः सन्नद्धोह्य
र्जुनोयातिविधृत्यपरमेषुधी गांडीवंमुहुरादत्तेनिःश्वसंश्चनिरीक्षते गदांगुर्वींसमुद्यम्यत्वरितश्चवृकोदरः स्वरथंयोजयित्वाशुनि
र्यातइतिनःश्रुतं नकुलःखड्गमादायचर्मचाप्यष्टचंद्रवत् सहदेवश्चराजाचचक्रुराकारमिंगितैः तेत्वास्थायरथान्सर्वेबहुशस्त्रपरि
च्छदान् अभिघ्नंतोरथव्रातान्सेनायोगायनिर्ययुः नक्षंस्यंतेतथास्माभिर्जातुविप्रकृताहिते द्रौपद्याश्चपरिक्लेशंकस्तेषांक्षं
तुमर्हति पुनर्दीव्यामभद्रंतेवनवासायपांडवैः एवमेतान्वशीकर्तुंशक्ष्यामोभरतर्षभ तेवाद्वादशवर्षाणिवयंवाद्यूतनिर्जिताः नि
वसाममहारण्येतथाद्यूतंप्रवर्त्यतां अक्षानुप्त्वापुनर्द्यूतमिदंदीव्यंतुपांडवाः एतत्कृत्यतमंराजन्नस्माकंभरतर्षभ अयंहिशकु
निर्वेदसविद्यामक्षसंपदं दृढमूलावयंराज्येमित्राणिपरिगृह्यच सारवद्विपुलंसैन्यंसत्कृत्यचदुरासदं तेचत्रयोदशेवर्षेपुन
यिष्यंतिचेद्ध्रुवं जेष्यामस्तान्वयंराजन्रोचतांवैपरंतप धृतराष्ट्रः तूर्णंप्रत्यानयस्वैतान्कामंव्यध्वगतानपि आगच्छं
तुपुनर्द्यूतमिदंकुर्वंतुपांडवाः वैशं० ततोद्रोणःसोमदत्तोबाह्लीकश्चमहारथः विदुरोद्रोणपुत्रश्चवैश्यापुत्रश्चवीर्यवान्
भूरिश्रवाःशांतनवोविकर्णश्चमहारथः माद्यूतमित्यभाषंतशमोस्त्वितिचसर्वशः अकामानांचसर्वेषांसुहृदामर्थदर्शिनां
अकरोत्पांडवाह्वानंधृतराष्ट्रःसुतप्रियः इतिसभापर्वणिअनुद्यूते ६९ वैशं० अथाब्रवीन्महाराजधृत

राष्ट्रंजनेश्वरं पुत्रहार्दाद्धर्मपूर्वंगांधारीशोककर्शिता जातेदुर्योधनेक्षत्तामहामतिरभाषत नीयतांपरलोकायसाध्वयंकुलपांस
नः अनदज्जातमात्रोहिगोमायुरिवविस्वरं अंतोनूनंकुलस्यास्यकुमारस्तन्निबोधत माबालानामशिष्टानामभिमंस्थाम
तिंप्रभो माकुलस्यक्षयेघोरेकारणंत्वंभविष्यसि बद्धंसेतुंकोनुभिंद्याद्धमेच्छांतंचपावकं शमेधृतान्पुनःपार्थान्कोपयेत्कोनु
भारत स्मरंतंत्वाजमीढेदंस्मारयिष्याम्यहंपुनः शास्त्रंनशास्तिदुर्बुद्धिंश्रेयसेनेश्रेयायवा नवैवृद्धोबालमतिर्भवेद्राजा
न्कथंचन त्वन्नेत्राःसंतुतेपुत्रामात्वांदीर्णाःप्रहासिषुः तस्माद्दयंमद्वचनात्त्यज्यतांकुलपांसनः तथातेनकृतंराजन्पुत्रस्नेहा
न्नराधिप तस्यप्राप्तंफलंविद्धिकुलांतकरणाययत् शमेनधर्मेणनयेनयुक्तायातेबुद्धिःसास्तुतेमाप्रमादीः प्रध्वंसिनीक्रू
रसामाहितास्त्रीमंदंदुरोढामगच्छतिपुत्रपौत्रान् अथाब्रवीन्महाराजोगांधारींधर्मदर्शिनीं अंतःकामंकुलस्यास्तुनशक्ष्या
मिनिवारितुं यथेच्छंतितथैवास्तुप्रत्यागच्छंतुपांडवाः पुनर्द्यूतंप्रकुर्वंतुपांडवामामकैःसह इतिसभापर्वण्यनुद्यूते ७०
वैशं० ततोव्यध्वगतंपार्थंप्रातिकामीयुधिष्ठिरं उपाब्रवीन्महाराजधृतराष्ट्रस्यधीमतः उपस्तीर्णासभाराजन्नक्षानुप्त्वा
युधिष्ठिर एहिपांडवदीव्येतिपितात्वामाहभारत युधि० धातुर्नियोगाद्भूतानिप्राप्नुवंतिशुभाशुभं ननिवृत्तिस्तयोर
स्तिदेवितव्यंपुनर्यदि अक्षद्यूतेसमाह्वानंनियोगात्स्थविरस्यतु जानन्नपिक्षयकरंनातिक्रमितुमुत्सहे वैशं० असंभ
वेहेममयस्यजंतोस्तथापिरामोलुलुभेमृगाय प्रायःसमासन्नपराभवानांधियोविपर्यस्ततराभवंति इतिब्रुवन्निवृ
तेभ्रातृभिःसहपांडवः जानंश्चशकुनेर्मायांपार्थोद्यूतमियात्पुनः विविशुस्तेसभांताःपुनरेवमहारथाः व्यथयंतःस्मचेतां ६९
सिसुहृदांभरतर्षभ यथापजोषमासीनाःपुनर्द्यूतप्रवर्तयन् सर्वलोकविनाशायदैवेनोपनिपीडिताः शकुनिः अमुंच

स्थविरोयद्वोधनंपूजितमेवतत् महाधनंग्लहंत्वेकंशृणुमेभरतर्षभ वयंवाद्वादशाब्दानियुष्माभिर्द्यूतनिर्जिताः प्रविशेममहारण्यंरौरवाजि
नवाससः त्रयोदशंचसजनेअज्ञाताःपरिवत्सरं ज्ञाताश्चपुनरन्यानिद्वादशाब्दानिकानने अस्माभिर्निर्जितायूयंवनेद्वादशवत्सरान् व
सध्वंकृष्णयासार्धमजिनैःप्रतिवासिताः त्रयोदशेतुनिर्वृत्तेपुनरेवयथोचितं स्वराज्यंप्रतिपत्तव्यमितरैरथवेतरैः अनेनव्यवसायेनसहा
स्माभिर्युधिष्ठिर अक्षानुप्त्वापुनर्द्यूतमेहिदीव्यस्वपांडव अथसभ्याःसभामध्येसमुच्छ्रितकरास्तदा ऊचुरुद्विग्नमनसःसंवेगात्सर्व
एवहि अहोधिग्बांधवानैनंबोधयंतिमहद्भयं बुध्याबुध्यन्नवाबुध्येत्स्वयंवैभरतर्षभ वैशं० जनप्रवादान्सुबहूनितिशृण्वन्न
राधिपः ह्रियाचधर्मसंयोगात्पार्थोद्यूतमियात्पुनः जानन्नपिमहाबुद्धिःपुनर्द्यूतंपराङ्मुखात् अप्यासन्नोविनाशःस्यात्कुरूणाम
चिंतयन् युधिष्ठिरः कथंवैमद्विधोराजास्वधर्ममनुपालयन् आहूतोविनिवर्तेतदीव्यामिशकुनेत्वया शकुनिः गवा
श्वंबहुधेनूकमपर्यंतमजाविकं गजाःकोशोहिरण्यंचदासीदासंचसर्वशः एषनोग्लहएवैकोवनवासायपांडव यूयंवयंवाविजि
तावसेमवनवासिताः त्रयोदशंचवैवर्षमज्ञाताःसजनेतथा समुत्क्षेपेणचैकेननवनवासायभारत प्रतिजग्राहतंपार्थोग्लहंजग्राह
सौबलः जितमित्येवशकुनिर्युधिष्ठिरमभाषत इतिसभापर्वण्यनुद्यूतंसमाप्तं ७१ वैशं० ततःपराजिताःपार्थाव
नवासायदीक्षिताः अजिनान्युत्तरीयाणिजगृहुश्चयथाक्रमं अजिनैःसंवृतान्दृष्ट्वाहृतराज्यानरिंदमान् प्रस्थितान्वनवासा
यतेतोदुःशासनोब्रवीत् प्रवृत्तंधार्तराष्ट्रस्यचक्रंराज्ञोमहात्मनः पराभूताःपांडुपुत्राविपत्तिंपरमांगताः अद्यदेवाःसंप्रयाताःस
मैर्वर्त्मभिरस्थलैः गुणज्येष्ठास्तथाज्येष्ठाःश्रेयांसोयद्वयंपरैः नरकंपातिताःपार्थादीर्घकालमनंतकं सुखाच्चहीनाराज्याच्चविन
ष्टाःशाश्वतीःसमाः बलेनमत्तायेतेस्मधार्तराष्ट्रान्प्रहासिषुः तेनिर्जिताहृतधनावनमेष्यंतिपांडवाः चित्रान्सन्नाहानवमुंचंतु
वैषांवासांसिदिव्यानिवभानुमंति निवास्यंतारुरुचर्माणिसर्वेयथाग्लहंसौबलस्याभ्युपेताः नसंतिलोकेषुपुमांसईदृशाइत्ये

सभा० नये भावितबुद्धयः सदा ज्ञास्यंतितेस्मान् मिहाद्य पांडवाविपर्यये षंढतिलाइवाफलाः दुर्दृशवासोयदि वैदृशानां मनस्विनां कौरवमा
७० हेवषु अदीक्षितानामजिनानि यद्वद्बलीयसां पश्यतपांडवानां महाप्राज्ञः सोमकियो ज्ञसेनः कन्यां पांचालीं पांडवेभ्यः प्रदाय
अकार्षीद् दुष्करं नेबाक्लिबाः पार्थाः पतयो याज्ञसेन्याः सूक्ष्मप्रवारानजिनोत्तरीयान् दृष्ट्वारण्ये निर्धनानप्रतिष्ठान् कां
प्रीतिं लप्स्यसे याज्ञसेनि पतिं वृणीष्वेह यमन्यमिच्छसि एते हि सर्वे कुरवः समेताः क्षांता दांताः सुद्रविणोपपन्नाः एषां वृणीष्वैकतमं पतित्वे न
त्वां नयेत्कालविपर्ययोयं यथाफलाः षंढतिला यथा चर्ममयामृगाः तथैव पांडवाः सर्वे यथा काकयवा अपि किं पांडवांस्त्वं पतितानुपा
से मोघः श्रमः षंढतिलानुपास्य एवं नृशंसः परुषाणि पार्थानश्रावयद्धृतराष्ट्रस्य पुत्रः तद्वै श्रुत्वा भीमसेनोत्यमर्षी निर्भर्त्स्योच्चैः सन्नि
गृह्येव रोषात् उवाचैनं सहसैवोपगम्य सिंहो यथा हैमवतः शृगालं भीमः क्रूरपापजनैर्जुष्टमकृतार्थं प्रभाषसे गांधारविद्यया हि
त्वं राजमध्ये विकत्थसे यथा तुदसि मर्माणि वाक्शरैरिह नो भृशं तथा स्मारयिता तेहं कृंतन्मर्माणि संयुगे ये च त्वामनुवर्तंते काललो
भवशानुगाः गोप्तारः सानुबंधांस्तान्नेष्यामि यमसादनं वैशं० एवं ब्रुवाणमाजिनैर्विवासितं दुःशासनस्तं परिनृत्यतिस्म मध्ये
कुरूणां धर्मनिबद्धमार्गं गौर्गौरिति स्माह्वयन्मुक्तलज्जः भीमः नृशंसं परुषं वक्तुं शक्यं दुःशासन त्वया निकृत्या हि धनं लब्ध्वा को
विकत्थितुमर्हति नैव स सुकृतांल्लोकान्गच्छेत्पार्थो वृकोदरः यदि निर्भिद्य वक्षस्ते न पिबेच्छोणितं रणे धार्तराष्ट्रान्रणे हत्वा मिषतां
सर्वधन्विनां शमं गंतास्मि नचिरात्सत्यमेतद्ब्रवीमि वः वैशं० तस्य राजा सिंहगतेः सखेलं दुर्योधनो भीमसेनस्य हर्षात् गतिं स्वग
त्याऽनुचकार मंदो निर्गच्छतां पांडवानां सभायाः नैतावता कृतमित्यब्रवीत्तं वृकोदरः परिवृत्तार्धकायः शीघ्रं हि त्वां निहतं सानुबंधं संस्मा ७०
र्याहं प्रतिवक्ष्यामि मूढ एवं समीक्ष्यात्मनि चावमानं नियम्य मन्युं बलवान्स मानी राजानुगः संसदि कौरवाणां विनिष्क्रामन्वाक्यमुवा
च भूयः भीमः अहं दुर्योधनं हंता कर्णं हंता धनंजयः शकुनिं चाक्षकितवं सहदेवो हनिष्यति इदं च भूयो वक्ष्यामि सभामध्ये बृहद्वचः तु

सत्यं देवाः करिष्यंति यन्नो युद्धं भविष्यति सुयोधनमिमं पापं हंतास्मि गदया युधि शिरः पादेन चास्याहमधिष्ठास्यामि भूतले वाक्यशूरस्य
चैवास्य परुषस्य दुरात्मनः दुःशासनस्य रुधिरं पातास्मि मृगराडिव अर्जुनः नैव वाचा व्यवसितं भीम विज्ञायते सतां इतश्चतुर्दशे वर्षे
द्रष्टारो यद्भविष्यति भीमः दुर्योधनस्य कर्णस्य शकुनेश्च दुरात्मनः दुःशासनचतुर्थानां भूमिः पास्यति शोणितं अर्जुनः असूयि
तारं वक्तारं प्रस्रष्टारं दुरात्मनां भीमसेन नियोगात्ते हंताहं कर्णमाहवे अर्जुनः प्रतिजानीते भीमस्य प्रियकाम्यया कर्णं कर्णानुगांश्च
रणे हंतास्मि पत्रिभिः ये चान्ये प्रतियोत्स्यंति बुद्धिमोहेन मां नृपाः तांश्च सर्वाञ्छितैर्बाणैर्नेष्यामि यमसादनं चलेद्धि हिमवान्स्थाना
न्निःप्रभः स्याद्दिवाकरः शैत्यं सोमात्प्रणश्येत मत्सत्यं विचलेद्यदि न प्रदास्यति चेद्राज्यमितो वर्षे चतुर्दशे दुर्योधनो हि सत्कृत्य सत्यमे
तद्भविष्यति वैशं० इत्युक्तवति पार्थे तु श्रीमान्माद्रवतीसुतः प्रगृह्य विपुलं बाहुं सहदेवः प्रतापवान् सौबलस्य वधं प्रेप्सुरिदं वचन
मब्रवीत् क्रोधसंरक्तनयनो निःश्वसन्निव पन्नगः सहदेवः अक्षान्यान्मन्यसे मूढ गांधाराणां यशोहर नैते ह्यक्षा निशिता बाणा
चे स्त्वयैते समरे वृताः यथा चैवोक्तवान्भीमस्त्वामुद्दिश्य सबांधवं कर्ताहं कर्मणस्तस्य कुरु कार्याणि सर्वशः हंतास्मि तरसा युद्धे त्वां विक्रम्य स
बांधवं यदि स्थास्यसि संग्रामे क्षात्रधर्ममनुस्मरन् सहदेववचः श्रुत्वा नकुलोपि विशांपते दर्शनीयतमो नृणामिदं वचनमब्रवीत्
सुतेयं यज्ञसेनस्य द्यूतेस्मिन्धृतराष्ट्रजैः यैर्वाचः श्राविता रूक्षाः स्थितैर्दुर्योधनप्रिये तान्धार्तराष्ट्रान्दुर्वृत्तान्मुमूर्षून्कालचोदितान् द
र्शयिष्यामि भूयिष्ठमहं वैवस्वतक्षयं निदेशाद्धर्मराजस्य द्रौपद्याः पदवीं चरन् निर्धार्तराष्ट्रां पृथिवीं कर्तास्मि नचिरादिव वैशं०
एवं ते पुरुषव्याघ्राः सर्वे व्यायतबाहवः प्रतिज्ञा बहुलाः कृत्वा धृतराष्ट्रमुपागमन् इति सभापर्वणि वनप्रवेशे ७२ यु
धिष्ठिरः आमंत्रयामि भरतांस्तथा वृद्धं पितामहं राजानं सोमदत्तं च महाराजं च बाह्लिकं द्रोणं कृपं नृपांश्चान्यानश्वत्थामानमेव
च विदुरं धृतराष्ट्रं च धार्तराष्ट्रांश्च सर्वशः युयुत्सुं संजयं चैव तथैवान्यान्सभासदः सर्वानामंत्र्य गच्छामि द्रष्टास्मि पुनरेत्य वः वैशं०

सभा॰ नवकिंचित्तदोचुस्तेह्रियासन्नायुधिष्ठिरं मनोभिरेवकल्याणंदध्युस्तेतस्यधीमतः विदुरः आर्यापृथाराजपुत्रीनारण्यंगंतुमर्हति
७१ सुकुमारीचवृद्धाचनित्यमेवसुखोचिता इहवत्स्यतुकल्याणीसत्कृताममवेश्मनि इतिपार्थाविजानीध्वमगदंवोस्तुसर्वशः वैशं॰
तथेत्युक्त्वाब्रुवन्सर्वेयथानोवदसेनघ त्वंपितृव्यःपितृसमोवयंचत्वत्परायणाः अथज्ञापयसेविद्वन्त्वंहिनःपरमोगुरुः यच्चान्यदपि
कर्तव्यंतद्विधत्स्वमहामते विदु॰ युधिष्ठिरविजानीहिममेदंभरतर्षभ नाधर्मविजितःकश्चिद्व्यथतेवैपराजयात् त्वंवैधर्मान्विजा
नीषेयुधांवेत्ताधनंजयः हंतारीणांभीमसेनोनकुलस्त्वर्थसंग्रही संयंतासहदेवस्तुधौम्योवेदविदुत्तमः धर्मार्थकुशलाचैवद्रौपदीध
र्मचारिणी अन्योन्यस्यप्रियाःसर्वेतथैवप्रियवादिनः परैरभेद्याःसंतुष्टाःकोवानस्पृहयेदिह एषवैसर्वकल्याणःसमाधिस्तवभार
त नैनंशत्रुर्विषहतेशक्रेणापिसमोच्युत हिमवत्यनुशिष्टोसिमेरुसावर्णिनापुरा द्वैपायनेनकृष्णेननगरेवारणावते भृगुतुंगेच
रामेणदृषद्वत्यांचशंभुना अश्रौषीरसितस्यापिमहर्षेर्जल्पतःपुरा द्रष्टासदानारदस्तेधौम्यश्चायंपुरोहितः माहासीःसांपराये
त्वंबुद्धिंतामृषिपूजितां पुरूरवसमैलंत्वंबुद्ध्याजयसिपांडव शक्त्याजयसिराज्ञोन्यानृषीन्धर्मोपसेवया ऐंद्रेजयेधृतमनायाम्ये
कोपविधारणे तथाविसर्गेकौबेरेवारुणेचैवसंयमे आत्मप्रधानंसौम्यत्वमद्भ्यश्चैवोपजीवनं भूमेःक्षमांचतेजश्चसमग्रंसूर्य
मंडलात् वायोर्बलंप्राप्नुहित्वंभूतेभ्यश्चात्मसंपदः अगदंवोस्तुभद्रंवोद्रक्ष्यामःपुनरागतान् आपद्धर्मार्थकृच्छ्रेषुसर्वकार्येषु
वापुनः यथावत्प्रतिपद्येथाःकालेकालेयुधिष्ठिर आपृष्टोसीहकौंतेयस्वस्तिप्राप्नुहिभारत कृतार्थंस्वस्तिमंतंत्वांद्रक्ष्यामःपुनराग
तं नहिवोवृजिनंकिंचिद्वेदकश्चित्पुराकृतं वैशं॰ एवमुक्तस्तथेत्युक्त्वापांडवःसत्यविक्रमः भीष्मद्रोणौनमस्कृत्यप्रातिष्ठत
युधिष्ठिरः ततःसंप्रस्थितायांकृष्णायांपृथांप्राप्ययशस्विनी आपृच्छद्भृशदुःखार्तायाश्चान्यास्तत्रयोषितः यथार्हंवंदनाश्लेषान्कृ ७१
त्वागंतुमियेषसा ततोनिनादःसुमहान्पांडवांतःपुरेभवत् कुंतीचभृशसंतप्तादौपदींवीक्ष्यगच्छतीं शोकविह्वलयावा

चाकृच्छ्राद्वचनमब्रवीत् वत्सेशोकोनतेकार्यःप्राप्येदंव्यसनंमहत् स्त्रीधर्माणामभिज्ञासिशीलाचारवतीतथा नत्वांसंदेष्टुमर्हामिभर्तॄन्प्र
तिशुचिस्मिते सर्वैर्गुणैःसमाधानैर्भूषितंतेकुलद्वयं सभाग्याःकुरवश्चेमेयेनदग्धास्त्वयानघे अरिष्टंव्रजपंथानंमदनुध्यानबृंहिता
भाविन्यर्थेहिसुस्त्रीणांवैक्लव्यंनोपजायते गुरुधर्माभिगुप्ताचश्रेयःक्षिप्रमवाप्स्यसि सहदेवश्चतेपुत्रिसदावेक्ष्योवनेवसन् यथे
दंव्यसनंप्राप्यनसीदेत्समहामतिः तथेत्युक्त्वातुसादेवीस्रवन्नेत्रजलाविला शोणिताक्तैकवसनामुक्तकेश्यभिनिर्ययौ तांक्रो
शंतींपृथादुःखादनुवव्राजगच्छतीं अथपश्यत्सुतान्सर्वान्हृताभरणवाससः रुरुचर्मावृततनून्ह्रियाकिंचिदवाङ्मुखान् परैः
परीतान्संहृष्टैःसुहृद्भिश्चानुशोचितान् तदवस्थान्सुतान्सर्वानुपसृत्यातिवत्सला सस्वजानाशुचैवंशोकात्तत्तद्विलपतीबहु कु
तुवाच कथंसद्धर्मचारित्रान्वृत्तस्थितिविभूषितान् अक्षुद्रान्दृढभक्तांश्चदैवतेज्यापरान्सदा व्यसनंवःसमभ्यागात्कोयंविधि
विपर्ययः कस्यापध्यानजंचेदमागःपश्यामिवोधिया स्यात्तुमद्भाग्यदोषोयंयाहंयुष्मानजीजनं दुःखायासभुजोत्यर्थंयु
ष्मानप्युत्तमैर्गुणैः कथंवत्स्यथदुर्गेषुवनेष्वृद्धिविनाकृताः वीर्यसत्वबलोत्साहतेजोभिरकृशाःकृशाः यद्येतदहमज्ञा
स्यंवनेवासोहिवोध्रुवं शतशृंगान्मृतेपांडौनागमिष्यंगजाह्वयं धन्यंवःपितरंमन्येतपोमेधान्वितंतथा यःपुत्राधिम
संप्राप्यस्वर्गेच्छामकरोत्प्रियां धन्यांचातीन्द्रियज्ञानामिमांप्राप्तांपरांगतिं मन्येतुमाद्रींधर्मज्ञांकल्याणींसर्वथैवसा ययामत्याजगत्या
वयथाहमभिसांधिता जीवितंप्रियतांमह्यंधिङ्मांसंक्लेशभागिनीं पुत्रकान्नविवास्येतान्मत्कृशांछ्रान्प्रियान्सतः साहंयास्यामिहि
वनंहाकृष्णेकिंजहासिमां अंतवत्सुधर्मेषुधात्राकिंनुप्रमादतः ममांतोनैवविहितस्तेनायुर्नजहातिमां हाकृष्णद्वारकावासि
न्क्वासिसंकर्षणानुज कस्मान्नत्रायसेदुःखान्मांचेमांश्चनरोत्तमान् अनादिनिधनंयेत्वामनुध्यायंतिनराःसदा तांस्त्वंपापीसये

सभा० वारःसगणोव्यर्थतांकथं इमेसद्धर्ममाहात्म्ययशोवीर्यानुवर्तिनः नार्हंतिव्यसनंभोक्तुं नन्वेषांक्रियतांदया सेयंनीत्यर्थविदुषुभीष्मद्रोणकृपा
७२ दिषु विद्वत्सुकुलनाथेषुकथमापदुपागता हापांडोहामहाराजकास्किंसमुपेक्षसे पुत्रान्विवासितःसाधूनरिभिर्द्यूतनिर्जितान् सहदेव
निवर्तस्वननुत्वमसिमेप्रियः शरीरादपिमाद्रेयमामास्त्याक्षीःकुपुत्रवत् व्रजंतुभ्रातरस्तेमीयदिसत्याभिरक्षिणः मत्परित्राणजंधर्म
मिहैवत्वमवाप्स्यसि वैशंपायनः एवंविलपतींकुंतीमभिवाद्यप्रणम्यच पांडवाविगतानंदावनायैवप्रवव्रजुः विदुरादयस्तुतामार्तां
कुंतीमाश्वास्यहेतुभिः प्रवेशयन्गृहंक्षत्तुःस्वयमार्ततराःशनैः धार्तराष्ट्रस्त्रियस्ताश्चनिखिलेनोपलभ्यतत् गमनंपरिकर्ष
णंकृष्णायाद्यूतमंडले रुरुदुःसुस्वराःसर्वाविनिंद्यंत्यःकुरून्भृशं दध्युश्चसुचिरंकालंकरासक्तमुखांबुजाः राजाचधृतराष्ट्रस्तु
पुत्राणामनयंतदा ध्यात्वोद्विग्नहृदयःसुशांतिंनाध्यगच्छति संचिंतयन्नेकाग्रःशोकाकुलितमानसः क्षत्तुःसंप्रेषया
मासशीघ्रमागम्यतामिति ततोजगामविदुरोधृतराष्ट्रनिवेशनं तंपर्यपृच्छत्संविग्नोधृतराष्ट्रोजनेश्वरः इतिसभापर्वणि
वनप्रवेशे ७३ वैशं० तमागतमथोराजाविदुरंदीर्घदर्शिनं साशंकइवपप्रच्छधृतराष्ट्रोंबिकासुतः धृतराष्ट्रः कथंगच्छति
कौंतेयोधर्मराजोयुधिष्ठिरः भीमसेनःसव्यसाचीमाद्रीपुत्रौचपांडवौ धौम्यश्चैवकथंक्षत्तर्द्रौपदीचतपस्विनी श्रोतुमिच्छामित
त्सर्वंतेषांशंसविचेष्टितं विदुरः वस्त्रेणसंवृत्यमुखंधर्मपुत्रोयुधिष्ठिरः बाहूविशालौकृत्वातुभीमोगच्छतिपांडवः सिकताः
किरन्सव्यसाचीराजानमनुगच्छति माद्रीपुत्रःसहदेवोमुखमालिप्यगच्छति पांसूपलिप्तसर्वांगोनकुलश्चित्तविह्वलः दर्शनी ७२
यतमोलोकेराजानमनुगच्छति कृष्णात्वकेशैःप्रच्छाद्यमुखमायतलोचना दर्शनीयाप्ररुदतीराजानमनुगच्छति याम्यानि
धौम्यःसामानिरौद्राणिचविशांपते गायन्गच्छतिमार्गेषुकुशानादायपाणिना धृतराष्ट्रः विविधानीहरूपाणिकृत्वाग

च्छंतिपांडवाः तत्समाचक्ष्वविदुरकस्मादेवंव्रजंतिते विदुरः निकृतस्यापितेपुत्रैर्हृतेराज्यधनेषुच नधर्माच्चलतेबुद्धिर्धर्मराजस्य
धीमतः योसौराजाघृणीनित्यंधार्तराष्ट्रेषुभारत निकृत्यासंविताःक्रोधान्नोन्मीलयतिलोचने नाहंजनंनिर्दहेयंक्रोधदीप्तेनचक्षुषा
सपिधायमुखंराजातस्माद्गच्छतिपांडवः यथाचभीमोव्रजतितन्मेनिगदतःशृणु बाह्वोर्बलेनास्तिसमोममेतिभरतर्षभ बाहूविशालौ
कृत्वातुतेनभीमोपिगच्छति बाहूविदर्शयन्राजन्बाहुद्रविणदर्पितः चिकीर्षन्कर्मशत्रुभ्योबाहुद्रव्यानुरूपतः प्रदिशन्शरसंपातान्कुं
तीपुत्रोर्जुनस्तदा सिकतावपन्सव्यसाचीराजानमनुगच्छति असक्ताःसिकतास्तस्ययथासंप्रतिभारत असक्तंशरवर्षाणितथा
मोक्ष्यतिशत्रुषु नमेकश्चिद्विजानीयान्मुखमद्येतिभारत मुखमालिप्यतेनासौसहदेवोपिगच्छति नाहंमनांस्याददेयंमार्गेस्त्रीणा
मितिप्रभो पांसूपलिप्तसर्वांगोनकुलस्तेनगच्छति एकवस्त्राप्ररुदतीमुक्तकेशीरजस्वला शोणिताक्तार्द्रवसनाद्रौपदीवेदमब्र
वीत् यत्कृतेयंममावस्थातेषांवर्षेचतुर्दशे हतनाथाहतसुताहतबंधुजनाःस्त्रियः बंधुशोणितदिग्धांग्योमुक्तकेश्योरजस्वलाः
एवंकृतोदकाभार्याःप्रवेक्ष्यंतिगजाह्वयं कृत्वातुनैर्ऋतान्दर्भान्धीरोधौम्यःपुरोहितः सामानिगायन्याम्यानिपुरतोयातिभारत
हतेषुभरतेष्वाजौकुरूणांगुरवस्तदा एवंसामानिगास्यंतीत्युक्त्वाधौम्योपिगच्छति हाहागच्छंतिनोनाथाःसमवेक्षध्वमीदृशं इति
पौराःसुदुःखार्ताःक्रोशंतिस्मसमंततः एवमाकारलिंगैस्तेव्यवसायंमनोगतं कथयंतस्तुकौंतेयावनंजग्मुर्मनीषिणः एवंतेषुन
राग्र्येषुनिर्यत्सुगजसाह्वयात् अनभ्रेविद्युतश्चासन्भूमिश्चसमकंपत राहुरग्रसदादित्यमपर्वणिविशांपते उल्काचाप्यपस
व्यंनपुरंकृत्वाव्यशीर्यत प्रव्याहरंतिक्रव्यादाःगृध्रगोमायुवायसाः देवायतनचैत्येषुप्राकाराट्टालकेषुच एवमेतेमहोत्पाताःप्रादु
रासन्दुरासदाः भरतानामभावायराजन्दुर्मंत्रितेतव नारदश्चसभामध्येकुरूणामग्रतःस्थितः महर्षिभिःपरिवृतोरौद्रंवाक्यमुवाच

सभा० ह इतश्चतुर्दशेवर्षेविनंक्ष्यंतीहकौरवाः दुर्योधनापराधेनभीमसेनबलेनच इत्युक्त्वादिवमाक्रम्याशुप्रमंतरधीयत ब्राह्मींश्रियंसुविपु
७३ लांबिभ्रद्देवर्षिसत्तमः वैशं० ततोदुर्योधनःकर्णःशकुनिश्चापिसौबलः द्रोणंद्वीपममन्यंतराज्यंचास्मैन्यवेदयन् अथाब्रवीत्ततोद्रो
णोदुर्योधनममर्षणं दुःशासनंचकर्णंचसर्वानेवभारतान् अवध्यान्पांडवानाहुर्देवपुत्रान्द्विजातयः अहंतुशरणंप्राप्तान्वर्तमा
नोयथाबलं गतान्सर्वात्मनाभक्त्याधार्तराष्ट्रान्सराजकान् नोत्सहेयमभित्यक्तुंदैवंमूलमतःपरं धर्मतःपांडुपुत्रावैवनंगत्वानिर्जि
ताः तेचद्वादशवर्षाणिवनेवत्स्यंतिकौरवाः चरितब्रह्मचर्याश्चक्रोधामर्षवशानुगाः वैरंनिर्यातयिष्यंतिमहद्दुःखायभारत मयातु
भ्रंशितोराज्याद्द्रुपदःसखिविग्रहे पुत्रार्थमयजत्कोपाद्वधायममभारत याजोपयाजतपसापुत्रंलेभेसपावकात् धृष्टद्युम्नंद्रौपदींच
वेदीमध्यात्सुमध्यमां ज्वालावर्णोदेवदत्तोधनुष्मान्कवचीशरी मर्त्यधर्मतयायस्मादस्तिमेसाध्वसोमहान् गतोहिपक्षतांतेषां
पार्षतःपुरुषर्षभः सृष्टप्राणोभृशतरंतस्माद्योत्स्येतवारिभिः मद्वधायश्रुतोह्येषलोकेचाप्यतिविश्रुतः नूनंसोयमनुप्राप्त
स्त्वत्कृतेकालपर्ययः त्वरिताःकुरुतश्रेयोनैतदेतावताकृतं मुहूर्तंसुखमेवैतत्तालच्छायेवहैमनी यजध्वंविविधैर्यज्ञैर्भोगानश्नी
तभारताः इतश्चतुर्दशेवर्षेमहत्प्राप्स्यथवैशसं दुर्योधननिशम्यैतत्प्रतिपद्यस्वयत्क्षमं सामवापांडवेषुप्रयुंक्ष्वयदिमन्यसे
वैशं० द्रोणस्यवचनंश्रुत्वाधृतराष्ट्रोब्रवीदिदं सम्यगाहगुरुःक्षत्तरुपावर्तयपांडवान् यदिवानानिवर्तंतेसत्कृतायांतुपांड
वाः सशस्त्ररथपादाताभोगवंतश्चपुत्रकाः इतिसभापर्वणिवनप्रवेशे ७४ वैशं० वनंगतेषुपार्थेषुनिर्जितेषुदुरो
दरे धृतराष्ट्रंमहाराजतदाचिंतासमाविशत् तंचिंतयानमासीनंधृतराष्ट्रंजनेश्वरं निःश्वसंतमनेकाग्रमितिहोवाचसंजयः ७३
संजयः अवाप्यवसुसंपूर्णांवसुधांवसुधाधिप प्रव्राज्यपांडवान्राज्याद्राजन्किमनुशोचसि धृतराष्ट्रः अशोच्यत्वं

कुतस्तेषांयेषांवैरंभविष्यति पांडवैर्युद्धशौंडैर्हिमित्रवद्भिर्महारथैः संजयः तवेदंसुकृतंराजन्महद्वैरमुपस्थितं विनाशःयेनलो
कस्यसानुबंधोभविष्यति वार्यमाणोहिभीष्मेणद्रोणेनविदुरेणच पांडवानांप्रियांभार्यांद्रौपदींधर्मचारिणीं प्राहिणोदानयेहेतिपुत्रो
दुर्योधनस्तव सूतपुत्रंसुमंदात्मानिर्लज्जःप्रातिकामिनं यस्मैदेवाःप्रयच्छंतिपुरुषायपराभवं बुद्धिंतस्यापकर्षंतिसोवाचीनानिप
श्यति बुद्धौकलुषभूतायांविनाशेप्रत्युपस्थिते अनयोनयसंकाशोहृदयान्नापसर्पति अनर्थाश्चार्थरूपेणअर्थाश्चानर्थरूपि
णः उत्तिष्ठंतिविनाशायनूनंतच्चास्यरोचते नकालोदंडमादायशिरःकृंततिकस्यचित् कालस्यबलमेतावद्विपरीतार्थदर्शनं आ
सादितमिदंघोरंतुमुलंलोमहर्षणं पांचालीमपकर्षद्भिःसभामध्येतपस्विनीं अयोनिजांरूपवतींकुलेजातांविभावसोः कोनुतां
सर्वधर्मज्ञांपरिभूययतपस्विनीं पर्यानयेत्सभामध्येमृतेदुर्द्यूतदेविनं स्त्रीधर्मिणीवरारोहाशोणितेनसमुक्षिता एकवस्त्राचपांचालीपांड
वानभ्यवैक्षत हृतस्वान्हृतराज्यांश्चहृतवस्त्रान्हृतश्रियः विप्रयुक्तान्सर्वकामैर्दासभाववशंगतान् धर्मपाशपरिक्षिप्तानशक्ता
न्विक्रमे क्रुद्धामानर्हांदुःखितांकुरुसंसदि दुर्योधनश्चकर्णश्चकटुकान्यभ्यभाषतां इतिसर्वमिदंराजन्नाकुलं
प्रतिभातिमे धृतराष्ट्रः तस्याःकृपणचक्षुर्भ्यांप्रदह्येतापिमेदिनी अपिशेषंभवेदद्यपुत्राणांममसंजय भरतानांस्त्रि
यःसर्वागांधार्यासहसंगताः प्राक्रोशन्भैरवान्नादान्दृष्ट्वातांकृष्णांसभागतां अग्निहोत्राणिसायाह्नेनचाहूयंतसर्वशः
ब्राह्मणाःकुपिताश्चासन्द्रौपद्याःपरिकर्षणे आसीत्सर्वांतकोघोरोनिर्घातःसुमहानभूत् दिवोल्काश्चापतंस्तत्रराहुश्चार्क
मुपेयिवान् अपर्वणिमहाघोरंप्रजानांजनयन्भयं तथैवरथशालासुप्रादुरासीद्धुताशनः ध्वजाश्चापिव्यशीर्यंतभारतानां

सभा० मभ्युतये दुर्योधनस्याग्निहोत्रे प्राक्रोशन्भैरवंशिवाः ततस्तान्प्रत्यभाषंतरासभाःसर्वतोदिशं प्रातिष्ठततो द्रोणोभीष्म
७४ एसहसंजय कृपश्वसोमदत्तश्च बाल्हीकश्चमहामनाः ततोहमब्रुवंस्तत्रविदुरेणप्रचोदितः वरंददामिते कृष्णेकांक्षितंयद्यदि
च्छसि अवृणोत्तत्र पांचाली पांडवानमितौजसः सरथान्सधनुष्कांस्तानदासान्सासतीतदा अथाब्रवीन्महाप्राज्ञो विदु
रःसर्वधर्मवित् एतदंताहिभरतायद्वःकृष्णासभांगता एषापांचालराजस्यसुतावैश्रीरनुत्तमा पांचाली पांडवानेतान्
देवस्त्वेषोपसर्पति तस्याःपार्थाःपरिक्लेशंनक्षंस्यंतिह्यमर्षणाः वृष्णयोवामहेष्वासाः पांचालावामहौजसः तेनसत्याभि
संधेनवासुदेवेनरक्षिताः आगमिष्यतिबीभत्सुःपांचालैरभिसंवृतः तेषांमध्येमहेष्वासोभीमसेनोमहामनाः
आगमिष्यतिधुन्वानोगदांकालइवापरः ततोगांडीवनिर्घोषं श्रुत्वापार्थस्यधीमतः गदावेगंचभीमस्य नालं
सोढुंनराधिपाः शमोमेरोचतेनित्यंपार्थैस्तत्रनविग्रहः कुरुभ्योहिसदामन्येपांडवान्बलवत्तरान् तथाहिबलवा
न्राजाजरासंधोमहाबलः बाहुप्रहरणेनैवभीमेनयुधिपातितः तस्यतेशमएवास्तु पांडवैर्भरतर्षभ उभयोःप
क्षयोर्युक्तं क्रियतामविशंकया एवंकृतेमहाराजपरंश्रेयमवाप्स्यसि एवंगावल्गणेक्षत्ता धर्मार्थसहितंवचः उ
क्तवान्नगृहीतंवमयापुत्रप्रियेप्सया छ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैय्यासिक्यांसभा ७४
पर्वण्यनुद्यूतंसमाप्तमिति ७५ अस्यानुआरण्यकंपर्वभविष्यति तस्यायमाद्यःश्लोकः जनमेजयः०

सभापर्वकथांश्रुत्वा वासांसिविविधानिच। हिरण्यधान्यंगाश्चैवदद्याद्वित्तानुसारतः। प्रीतयेदेवतानांवैदद्याद्विद्वि
जमुख्यके वाचकेतुसुसंतुष्टेतुष्टाःस्युःसर्वदेवताः। ब्राह्मणान्भोजयेच्छक्त्यापायसेःसर्पिषासितैः एवंकृतेसभा
पर्वण्याश्रुतस्यफलमुत्तमं॥
एवंद्यूतजिताःपार्थाःकोपितामश्चदुरात्मभिः धार्तराष्ट्रैःसहामात्यैर्निकृत्याद्विजसत्तम छ वृत्तांताश्चास्मिन्पर्वणि
मयाभिगमनं सभानिर्माणं सभाप्रवेशः नारदागमनं कच्चित्प्रश्नः देवसभावर्णनं राजसूयमंत्रः जरासंधोत्पत्तिः
सभा० वधश्च राजमोक्षणं दिग्विजयः राजसूयः राज्ञामागमनं बल्याहरणं राज्ञांनियोगः अर्घाभिहरणं शिशुपाल
७५ कोपः वधश्च यज्ञसमाप्तिः वासुदेवाभिगमनं दुर्योधननिवासः सभायांदुर्योधनावहासः दुर्योधनामर्षः दु
र्योधनचिंता धृतराष्ट्रमंत्रः पांडवाह्वानं द्यूतं पराजयः राज्यहरणं द्रौपदीप्रकर्षणं द्रौपदीवस्त्रापहरणं द्रौपदीवाक्यं
पांडवराश्रयः अनुद्यूतं वनप्रस्थापनंइति इतिसभापर्वसमाप्तिमगमत् ७५ शके १६२५ सुभानु ७५
वर्षमाघशुद्धद्वितीयायांगुरौ सांबसदाशिवार्पणमस्तु श्रीरस्तु शुभमस्तुसर्वजगतः श्रीः
[illegible] ३२

616

॥ सभापर्वलड्यानांपुस्तकं ॥